शाल्मलितरो रक्तपुष्पिकायास्त्वगभ्यन्तरविवरनिक्षिप्ताया हिङ्गुगुलिकायाः प्रभावेन स्वयमेव फलपुष्पाणि पतन्तीत्यत्र स्वभाव एव कारणमिति ॥

पङ्कमइलं पि विमलं होइ जलं कअअफलरउम्मीसं ॥
तुल्लं च घअं महुणा मारेइ विसं व खज्जन्तं ॥ ७ ॥

पङ्कमलिनमपि विमलं भवति जलं कतकफलरजोन्मिश्रम्[9] ।
तुल्यं च घृतं मधुना मारयति विषमिव खाद्यमानम् ॥

कतकफलं विष्ट्वा तच्चूर्णे(न)न्यस्ते(न)कलुषमपि जलं प्रसीदति । तुल्यं समानमात्रं घृतं मधुना सह युगपद् भुज्यमानं विषवन्मारयतीत्यत्रापि स्वभावमात्रं हेतुरिति ॥

गन्धअकअधूआइं लित्ताइं चूअपत्तभूईइ ॥
रत्ताहअमारपसूआइ झत्ति धवलाइ जाअन्ति ॥ ८ ॥

---

१ मध्ये-क ख. । २ पूर्वांशां प्रभृतीत्यन्यत्र । ३ उपलक्षणार्थं चैतत्-क.ख. । ४ जाए इत्यन्यत्र पाठः । ५ गइ-क. । ६ विणिहित्त- क. । ७ सतिन्ना- क., सतिन्धा - ख. । ८ गति-क. ख. । ९ रजोन्मिश्रितम्-क. ख. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

गन्धकक्कृतधूपानि लिप्तानि वा[1] चूतपत्रभूत्या ।
रक्तहयमारप्रसूनानि[2] झगिति धवलानि जायन्ते ॥

गन्धको गन्धपाषाणस्तेन दग्धेन धूपितानि, अथवा चूतस्याम्रस्य पर्णभस्मना लिप्तानि, रक्तहयमारस्य लोहितान्यपि पुष्पाणि आशु शुक्लीभवन्ति । अत्र वस्तुस्वभावो हेतुरिति ॥

अथ युक्तिः—

[3]तम्मिअग्गिसिहो पि पुणो पईवओ जलइ गन्धसेलेण ।
रअणी टंगणसहिआ कुंकुमकरणीं समुव्वहइ ॥ ९ ॥

[4]शमिताग्निशिखोपि पुनः प्रदीपको ज्वलति गन्धशैलेन ।
रजनी टंकणसहिता कुङ्कुमकरणिं समुद्वहति ॥

प्रदीपः प्रशान्तज्वालोऽपि अग्निकणिकामात्रशेषः सन् पुनर्गन्धकचूर्णेन क्षिप्तेन ज्वलति ।[5] रजनी हरिद्रा सुवर्णपाचिकया सहिता कुङ्कुमस्य सादृश्यं धारयतीति युक्तेरेवात्र प्रभाव इति ॥

तह कच्छवपिसिअं पि हु [6]बहुसोविअ खंडिअं परिप्फुरइ ॥
तं विअ हिङ्गुजलाल्लं[7] सहसा[8] विअ निप्फुरं होइ ॥ १० ॥

तथा कच्छपपिशितमपि खलु [9]बहुश एव खण्डितं परिस्फुरति ।
तदेव हिङ्गुजलार्द्रं सहसैव निस्फुरं भवति ॥

कच्छपः कूर्मस्तस्य बहुशो लवशः खण्डितमपि मांसं चलति । तदेव हिङ्गुजलेनार्द्रीकृतं निष्पन्दं भवतीत्युभयत्रापि स्वभाव एव हेतुरिति ॥

कठिनाइ वि कअअफलाइ तह अ दिअहस्स पहरमत्तेण ॥
आमलअसलिलणिहिआइ[10] होन्ति णवणीअमउआइ ॥ ११ ॥

कठिनान्यपि कतकफलानि तथा च दिवसस्य प्रहरमात्रेण ।
आमलकसलिलनिक्षिप्तानि भवन्ति नवनीतमृदूनि ॥ गतार्था गाथा ॥

किन्त्वामलकानां स्वरसाभावे शुष्केषु तेषु क्षिप्त्वा तत्र निक्षिप्तं कनकं मृदु भवतीति ॥

---

१ वाम्रपत्रभूत्या–क. ख. । २ प्रसूतानि–क. ख. । ३ विझरिअसिही–क. ख. । ४ प्रशमिताग्निशिखोऽपि–क. ख. । ५ एतदनन्तरम् 'अत्र युक्ति' रिति पाठः क. ख. पुस्तकयोः । ६ बहु-सोधिअ–क. ख. । ७ हिङ्गुजलोल्लं–क. ख. । ८ सहसं विअ– क. । ९ बहुशोधितखण्डितं– क. ख. १० झंत–क. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

काअढमणवगोमअजलाओ दुव्वावि सुरहिरोमाओ ॥
सिङ्गाहि सरो जाअइ कणवीरो कुसुमवीआहि ॥ १२ ॥

उत्पलमनवगोमयजलाद् दूर्वापि सुरभिलोम्नः ।
शृङ्गाच्छरो जायते करवीरः कुमुदवीजात् ॥

पुराणगं शकृति यदा जलं पतति तदा तत एवोत्पलमुत्पद्यते । तथा गोलोम्नो [1] भूमिपतितात् जलसंयोगे सति [2]दूर्वा शाद्वलमुत्पद्यते । तद्वदेव शृङ्गात् सुरभिसंबन्धिन एव शरस्तृणविशेषस्तथा कुमुदवीजात् करवीरोऽश्वमारः । कुमुदस्य परिपाकशीर्णपत्रस्य सिम्बिमात्रं शेषं भवति यदन्तर्बीजानि जायन्ते । तेभ्यो भूतलव्याप्तेभ्यः करवीर उत्पद्यते । सर्वत्रात्र पदार्थधर्म एव प्रभवतीति ॥

[3]अम्लअजोएण कुसुम्भअस्स संभवइ मणहरो वण्णो ॥
तम्बोलस्स वि जुत्तीइ होइ अइसुन्दरो राओ ॥ १३ ॥

[4]अम्लकयोगेन कुसुम्भकस्य संभवति मनोहरो वर्णः ।
ताम्बूलस्यापि युक्त्या भवत्यतिसुन्दरो रागः ॥

अम्लं दाडिमादि यत्किञ्चित् चुक्रं द्रव्यं तद्योगेन पद्मकस्यातिशयलौहित्यात्मनो मनोहरो वर्णो जायते । तथा ताम्बूलस्य नागवल्लीपूगफलचूर्णकसंयोगात्सकस्य यो मनोहरो रागः स युक्त्या तेषां संयोगेनैव हेतुना भवतीत्ययं युक्तिप्रभाव इति ॥

णासइ रअणीराओ सूरकरालुङ्खिओ मुहुत्तेण ॥
सोऊण कुररसद्दं मीणउलं पाअडं होइ ॥ १४ ॥

नस्यति रजनीरागः सूर्यकरस्पृष्टो मुहूर्त्तेन ।
श्रुत्वा कुररशब्दं मीनकुलं प्रकटं भवति ॥

रजनी हरिद्रा तद्रञ्जितस्य वस्त्रादे रागो रविकिरणस्पृष्टो नस्यति पाण्डरत्वमापद्यते । तथा कुरर उत्क्रंशाख्यः पक्षिविशेषः । शिष्टं सुबोधम् ॥

पाअप्पमाणेण कलिंचएण कणकएण भिणिभिणिआ ॥
णासइ गरुआ वि फुडं हिक्का सासावरोहेण ॥ १५ ॥

पादप्रमाणेन सूक्ष्मदारुणा कर्णकृतेन [5]भिणिभिणिका ।
नश्यति गुर्व्यपि स्फुटं हिक्का श्वासावरोधेन ॥

---

१ भूमिपतितस्येति पाठान्तरम् । २ तस्माद् दूर्वेति पाठान्तरम् । ३ अम्बिल-ख. । ४अम्ब्लेन-क.ख । ५ भिमिभिमिका ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

यस्यैव सुप्तपादता स्यात् तदीयपादपरिमाणेन सूक्ष्मेण काष्ठेन कर्णपृष्ठधृतेन क्वचिद् 'झिणिझिणिका'शब्दप्रसिद्धा सुप्तपादता मग्न(स्तब्ध)चरणत्वं नश्यति। तथा श्वासनिरोधेन हिक्का हिध्मा वातकृतश्वासविकारो नश्यतीति युक्तिमाहात्म्यम् ॥

दहिअकणिआभूइसु चलणपडिबिम्बआइं दीसन्ति ॥
घरमज्झसंठिआसु वि उवरि णिसण्णे कओअम्मि ॥ १६ ॥

दधिकणिकाभूतिसु चरणप्रतिबिम्बकानि दृश्यन्ते ।
गृहमध्यसंस्थितास्वपि उपरि निषण्णे कपोते ॥

कपोतः प्रसिद्धपक्षिविशेषः। स चारणयोऽत्र गृह्यते। तस्मिन्नुपरि निषण्णे उपरितनगृहान्तरस्थिते सत्यधस्तनगृहमध्यभूमौ स्थिते दध्नि गोधूमचूर्णे वा भस्मनि वा तस्योपरिचरतः कपोतस्य पादमुद्रा दृश्यन्त इति युक्तेरेव शक्तिः ॥

मंतपहावेण भुअङ्गभूअगहगरलदूसिअङ्गाण ॥
आवेसबन्धकीलाइपच्चआ किं ण दीसन्ति ॥ १७ ॥

मन्त्रप्रभावेण भुजङ्गभूतग्रहगरलदूषिताङ्गानाम् ।
आवेशबन्धक्रीडादिप्रत्ययाः किं न दृश्यन्ते ॥

मन्त्रशक्त्या भुजङ्गादिभिर्दूषिताङ्गानामावेशादयः प्रत्ययाः किं न दृश्यन्ते, प्रत्यक्षमुपलभ्यन्त एवेति न तत्र हेतुविकल्पाः प्रभवन्तीति ॥

किं वा णाणाविहविसमवाहिदूसिज्जमाणसव्वङ्गा ॥
मणिमंतोसहिसत्तीइ खविअरोआ ण जाअन्ति ॥ १८ ॥

किं वा नानाविधविषमव्याध्युपताप्यमानसर्वाङ्गा ।
मणिमन्त्रौषधिशक्त्या क्षपितरोगा न जायन्ते ॥

नानाविधा ज्वरकुष्ठकामलादयो येपि विषमा व्याधयस्तैर्बाध्यमानशरीरा जन्तवः किं वा मण्यादीनां प्रभावेण क्षिप्ररोगा न संपद्यन्ते ॥

उपसंहरति-

इअ जाणिऊण सत्तिं मणिमंतमहोसहीण सुपसिद्धं ॥
एअं ण होइ होइत्ति मा विअप्पं [1]करिज्जइअं ॥ १९ ॥

इति ज्ञात्वा शक्तिं मणिमन्त्रौषधीनां सुप्रसिद्धम् ॥
एतन्न भवति भवतीति मा विकल्पः कार्यः ॥

---

१ करिज्जाम्- क. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

इत्युक्तेन प्रकारेण मण्यादीनां सुप्रसिद्धां प्रत्यक्षानुभूतफलां शक्तिं ज्ञात्वा प्रयोगबलाद् भवति वस्तुनीदं न भवतीत्यभवति च भवतीति विकल्पो पुन कार्यः । ऐतेनोक्तानां मण्यादीनां शक्तिर्यथाङ्गीक्रियते तथा वक्ष्यमाणेष्वपि प्रयोगविशेषेष्वङ्गीकर्तव्या । नात्र विकल्पग्रहिकेण भवितव्यमिति ॥

॥ मणिमंतोसहिपहाववण्णणं णाम विइअं ॥

॥ मणिमन्त्रौषधिप्रभाववर्णनं नाम द्वितीयम् ॥

इदानीं कौतूहलाधिकारं प्रस्तावयन्नाह–

पढमसमारंभेविअ समत्थकोऊहलाण कुसलेहि ॥
काअव्वो मइमोहो विविहालावेहि लोअस्स ॥ १ ॥

प्रथमसमारम्भ एव समस्तकौतूहलानां कुशलैः ।
कर्तव्यो मतिमोहो विविधालापैर्लोकस्य ॥

नानाश्चर्यनिपुणैरप्युपक्रम एव लोकस्य विचित्रैर्वचनविशेषैर्मतिमोहः कर्तव्य इति ॥

अत्र हेतुमाह–

मूढहिअअस्स पुरओ जं कीरइ सअलजणपसिद्धं पि ॥
[1]कोऊहलाहिआरे अविकप्पं तं गुणं फलइ ॥ २ ॥

मूढहृदयस्य पुरतो यत् क्रियते सकलजनप्रसिद्धमपि ।
कौतूहलाधिकारे अविकल्पं तद् गुणं फलति ॥

विदग्धालापैर्व्यामोहितमतेर्जनस्य पुरतो यत् किञ्चित् क्रियते तत् सकललोकप्रसिद्धमपि कौतूहलाधिकारे विषये गुणं फलति । हृतहृदयान् प्रत्यनाश्चर्यमप्याचर्यमाणं गुणाय कल्पते किं पुनराश्चर्यमेव न कल्पिष्यत इति तात्पर्यम् ॥

एतदेव प्रमाणीकर्तुमाह—

मंतेण व तंतेण व जुत्तीइ व लाहवेण व जणस्स ॥
जोवेअ हरइ हिअअं तंविअ छेआ पसंसन्ति ॥ ३ ॥

मन्त्रेण वा तन्त्रेण वा युक्त्या वा लाघवेन वा जनस्य ।
य एव हरति हृदयं तमेव छेकाः प्रशंसन्ति ॥

मन्त्रः प्रसिद्धः । तन्त्रमितिकर्तव्यता । युक्तिर्द्रव्यविशेषसंयोगः । लाघवं हस्तसंचारः । एतैर्यो हृदयं हरति स एव धूर्त्तैः प्रशस्यते । तेन जन(स्य)हृदयसंमोहनमेव मुख्यं साधनमिति ॥

---

१ कौतूहलाहिआरे– क. खः ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

हृदयहरणे फलमाह—

हिअहिअओ देइ धणं करेइ आणं गुणं पसंसेइ ॥
जो जेण रंजिअमणो सो से जीअं पि ण धारेइ[1] ॥ ४ ॥

हृतहृदयो ददाति धनं करोत्याज्ञां गुणान् प्रशंसयति ।
यो[2] येन रञ्जितमनाः सोऽस्य जीवमपि न धारयति ॥

स्वजीवितमपि ददातीत्यर्थः । शिष्टं सुबोधम् ॥

अवसरे विशिष्टाधिकारिप्रयुक्तानां कौतूहलानां साफल्यं प्रतिपादयितुमाह—

काले कअलिंगपरिग्गहेहि[3] कोऊहलाइ एआइ ॥
छेएहि पउज्जन्ताइ कणअधाराउ वरिसंति ॥ ५ ॥

काले कृतलिङ्गपरिग्रहैरेतानि कौतूहलानि ।
छेकैः प्रयुज्यमानानि कनकधारा वर्षन्ति ॥

कृतो लिङ्गस्य पाशुपतादिव्रतचिह्नस्य परिग्रहो यैस्ते तथा । स्पष्टमन्यत् ॥

प्रसङ्गमुपसंहरन्नाह--

अलमहवा वाआवित्थरेण कोऊहलाहिआरत्ति ॥
पढमपरिच्छेअमणण्णमाणसा हो णिसामेह ॥ ६ ॥

अलमथवा वाग्विस्तरेण कौतूहलाधिकार इति ।
प्रथमपरिच्छेदमनन्यमानसा भो निशामयत ॥

कौतूहलाधिकार इत्येवमभिधानं प्रथमपरिच्छेदं शृणुतेति तात्पर्यम् ॥

कोऊहलपओअदंसणसमअविहाणं तइअं ॥
कौतूहलप्रयोगदर्शनसमयविधानं तृतीयम् ॥

विशिष्टे काले विशिष्टेनाधिकारिणा विशिष्टैर्वचनैर्हृतहृदयस्य लोकस्य वक्ष्यमाणाः प्रयोगा दर्शनीया नान्यथेति नियमः ॥

इदानीं प्रयोगानाह—

उहअकरधरिअसरिआपरिअन्तपरिट्ठिआइ वक्काइ ॥
कस्स ण कुणंति चोज्जं[4] तणाइ[5] संमुहं सरंताइ ॥ १ ॥

---

१ धरेइ- क. । २ योपि न रञ्जितमनाः-ख. ।३ एआइ कोऊहलाइ- क. ख. । ४ वणइ- क. । ५ समुहं-क. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

उभयकरधृतसरिकापर्यन्तपरिस्थिते वक्रे ।
कस्य न कुरुतः कौतुकं तृणे संमुखं [1]सरती ॥

हस्तद्वयेन समं कृत्वा धृतस्य निर्ग्रन्थेः शरकाण्डस्य पर्यन्तयोः प्रान्तयोः स्थापिते कुब्ने तृणेमनाग् भूमिसंलग्नमुखे परस्परसंमुखं गच्छती कस्याश्चर्यं न कुरुत इति ॥

ईसीसिजलणकवलिअसरिआदंडम्मि सीसविणिहट्टे ॥
[2]उप्फुत्तिऊण लग्गइ तणखण्डमऊरधरिअम्मि ॥ २ ॥

ईषदीषज्ज्वलनकवलितसरिकादण्डे शीर्षविनिघृष्टे ।
उत्प्लुत्य लगति तृणखण्डमदूरधृते ॥

मनागग्निदग्धे सरिकाग्रे मस्तकभागविनिघृष्टे समीपधृते व्यवहितमपि तृणखण्डमुत्प्लुत्य लगति ॥

णलणएणत्तिअमुहे सलिलं [3]ओमत्थए वि [4]करअम्मि ॥
थोअं पि णच्छडिज्जइ चुज्जमिणं णालए [5]थइए ॥ ३ ॥

आच्छादनांशुकेनाच्छादितमुखे सलिलमवमस्तकेऽपि करके ।
स्तोकमपि न त्यज्यत आश्चर्यमिदं नालके स्थगिते ॥

अवमस्तकः करकोऽधोमुखीकृत आलुकादिर्जलाधारः । नालकं तन्नासिका । तस्य स्थगनवशात् कर्पटपिहितमुखात् [6]करकादेरुद्गोर्यमाणमपि जलं न पततीति तात्पर्यम् ॥

पत्तहपरलणधारा चिउरचअं [7]ओलुणइ वत्थपिहिआपि ॥
दट्ठूण मुहे तिलअं [8]उज्झम्मि विजाण महिलाण ॥ ४ ॥

तनुतरप्रहरणधारा चिकुरचयमवलुनाति वस्त्रपिहितापि ।
दृष्ट्वा मुखे तिलकं [9]गुह्ये विजानीहि महिलानाम् ॥

चिकुरचयं केशकलापं वस्त्रपिहिता सूक्ष्मांशुकवेष्टिता तीक्ष्णायुधधारा छिनत्ति, वस्त्रं चाक्षतमेव स्यादित्येको योगः । तथा महिलानां [10]तिलं गुह्यप्रदेशे विजानीहीति द्वितीयः प्रयोगः ॥

---

१ सरन्ती– क. । २ उफ्फित्तिऊण– क. । ३ ओमत्थिए– क. । ४. करिअम्मि– क. । ५ सइए ।
६ करकादेरुद्गायमाणमपि ? ७ ओणइ– क. । ८ उज्जम्मि वि जाण ? । ९ गुह्येपि इतिपाठान्तरम् ।
१० पिल्वं– ख. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

परसुच्छिण्णअरओगुंठिआइ [1] सिअसिअविणिबद्धाइ ॥
[2] गच्छंति एक्कभावं बहुआइ वि पिसिअखंडाइ ॥ ५ ॥

परशुच्छिन्नक[3] रजोवगुण्ठितानि [4] सितवस्त्रविनिबद्धानि ।
[5] गच्छन्त्येकभावं [6] वहून्यपि [7] पिशितखण्डानि ॥

परशुच्छिन्नको महौषधिविशेषः । तच्चूर्णव्याप्ताः सन्तः शुक्लांशुके मुहुर्तं वेष्टिता बहवोपि मांसच्छेदा एकपिण्डतां यान्तीति तात्पर्यार्थः ॥

[8] जीहग्गसंगद्दीकअवामकरमज्झलग्गपरिसेसे ॥
दहिऊण सरिसवे दंसिऊण इअरे कुणह चुज्जं ॥ ६ ॥

जिह्वाग्रसङ्गार्द्रीकृतवामकरमध्यलग्नपरिशेषान् [9] ।
दग्ध्वा सर्षपान् दर्शयित्वेतरान् कुरुताश्चर्यम् ।

जिह्वाग्रस्पर्शनार्द्रीकृते वामहस्ततले ये लग्नाः सर्षपास्तेभ्यो ये परिशेषा अलग्नास्तान् दग्ध्वा, इतरान् तेभ्योऽन्यान् लग्नान् दर्शयित्वाऽऽश्चर्यं कुरुत । करतलस्यार्द्रत्वात् केचिल्लगन्ति केचिन्न लगन्तीत्यलगतः सर्षपान् दग्ध्वा लग्नानदग्ध्वा हस्ततले दर्शयित्वा 'दग्धा अपि पुनः प्रकृतिस्था' इति प्रयोगेनाश्चर्यम् ❀ ॥

णिहुडुङ्गिदुद्धभाविअसोसिअसिअकलमतण्डुलसणाहं ॥
[10] कढइ खराअवणिहिअं कांसअपात्तत्थिअं दुद्धं ॥ ७ ॥

सुधादुग्धभावितशोषितसितकलमतण्डुलसनाथम् ।
[11] क्वथति खरातपनिहितं कांस्यपात्रस्थितं दुग्धम् ॥

सुधाक्षीरेण भाविताः सिक्ताः सन्तः शोषिता ये कलमतण्डुलास्तैर्युक्तं दुग्धं गव्यादि तं क्षणातपस्थापितकांस्यपात्रस्थं [12] कथति । क्षीरिणी [13] तत् सम्पद्यत इत्यर्थः । कलमतण्डुल-ग्रहणं सामान्यव्रीहिमात्रोपलक्षणार्थम् ॥

भुज्जपुडअम्मि तिलतेल्लपूरिए दित्तजलणणिमिद्दम्मि ॥
साहेह विविहभक्खाइ लोहतविआइ व जहित्थं ॥ ८ ॥

भूर्जपुटके तिलतैलपूरिते दीप्तज्वलननिमित्ते ।
साधयत विविधभक्ष्यान् लोहतापितानिव यथेष्टम् ॥

निमित्तं निक्षिप्तम् । सुबोधमन्यत । भूर्जपुटस्य बहिरपि तैलाभ्यङ्गं केचिदाहुः ॥

---

१ सिअसिअअखंडणिरुद्धाइ–क. । २ वच्छन्ति- क. ख. । ३ रजोवगुण्ठिताः–क. ख. । ४ सितैर्वस्त्रनिवद्धाः — क. ख. । ५ व्रजन्त्येकभावं- क. ख. । ६ बहवोऽपि- क. ख. । ७ पिशितखण्डाः-- क. ख. । ८ जीहग्गसंग-तण्डुअ - क. ख, । ६ परिशेषात्- क. ख. । १० कढिअ -क. कथिअ- ख. । ११ क्वथितं- क. ख. । १२ कथितं- क. ख । १३ ततः -- क. ख. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

वाइङ्गणमम्बिलद्दिअ [1]सुत्ततेल्लद्द[2] सुत्तवलिअं वा ॥
सिज्जइ जलणणिहित्तं मणअं वि ण दहिज्जइ सुत्तं ॥ ९ ॥

वार्ताकमम्लार्द्रीकृतसूत्रतैलार्द्र सूत्रवलितं वा ॥
स्विद्यति ज्वलननिक्षिप्तं मनागपि न दह्यते सूत्रम् ॥

अम्लेन काञ्जिकेनार्द्रेण सूत्रेण तिलतैलार्द्रेण वा समन्ताद् वेष्टितं वार्ताकमग्नौ निक्षिप्तं च्यते, सूत्रं तु यथास्थितमेवास्त इत्यर्थः । वाग्रहणं पूर्वोक्तविकल्पार्थम् ॥

अठ्ठ सरा इच्छाए अठ्ठसु घरएसु पढमपाडीइं ॥
सेसास्तु सत्तवग्गा सत्तसु घरएसु कीरंति ॥
[3]सम्त(?)ट्ठिअसरसहिअं पाडीवग्गक्खरं पठन्तम्मि ॥
संजोइअए णज्जइ [4]फिक्कं [5]अट्ठापआ घरअं ॥ १०-११

अष्टौ स्वरा इच्छयाऽष्टसु गृहेषु प्रथमपाल्याम् ।
शेषास्तु सप्त वर्गाः सप्तसु गृहेषु क्रियन्ते ॥
संमुखस्थितस्वरसहितं पाटीवर्गाक्षरं पठति ।
संयोगवति ज्ञायते स्पृष्टमष्टापदाद् गृहम् ॥

अष्टापदकोष्ठकप्रस्तारे प्रथमपङ्क्तावेवाष्टकायां[6] यदृच्छयाऽष्टौ स्वराः केचन क्रियन्ते तै(?)स्तिरश्चीनगत्या । ततस्तदधोवर्तिनीषु स्पष्टगत्या सप्तकोष्ठकास्वाष्टसु पङ्क्तिषु यदृच्छया कस्यांचित् पङ्क्तौ प्रतिकोष्ठकं क च इति कादयः शाद्यन्ताः सप्त वर्गाः क्रियन्ते । एवं कृते प्राश्निकेन किञ्चिदष्टापदं स्पृष्टं ज्ञायते । कथा- संयोगवति कृतसंकेते कस्मिंश्चित् पुरुषे स्पृष्टकोष्ठकपालीवर्त्यक्षरं पठत्युच्चारयति सति । कीदृशम्- संमुखस्थितस्वरसहितम् । यद् गृहं स्पृष्टं तस्सांमुख्येन स्थितो यः स्वरस्तेन सहितम् । किमुक्तं भवति-- यदा द्वितीयपङ्क्तौ चतुर्थकोष्ठकं स्पृष्टं भवेत् तदा [7]तत्पङ्क्तिगतैकवर्गवर्तिनं कञ्चिद् वर्णं चतुर्थकोष्ठक[8]सम्मुखीनस्वरेण संयुक्तं सांकेतिकमुच्चारयेत । तेन वर्गाक्षरेण स पालीं जानाति, स्वरेण कोष्ठकम् । तदा वक्ति परो यज्ञदत्तेन द्वितीयपाल्यां चतुर्थकं कोष्ठकं स्पृष्टमित्युदाहरणम् । युगलकम् ॥

दूरट्ठिओ वि जाणइ [9]तक्खणाहि चोरमदिट्ठरूवं पि ॥
बहुआण मज्झआरे संजोइअसण्णिओ [10]णिवुणं ॥ १२ ॥

दूरस्थितोऽपि जानाति तत्क्षणाचौरमदृष्टरूपमपि ।
बहूनां मध्यचारे संयोगिकसंज्ञितो [11]निपुणाम् ॥

---

१ त्तिअ- क. ख. । २ तेल्लत्त- क. ३ गप्तट्ठिअ- क. । ४ हिक्कं- क. ख. ५ अट्ठालडा- क. । ६ पंक्तावेवेष्टकायां- क. । ७ तत्पङ्क्तिमत- क. ख. । ८ सम्मुखेन-- क. , समुखीभूत-- ख. ९ तक्खणा- क. । १० णिउणो-- क. । ११ नियत इत्यन्यत्र ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

विज्ञाता तल्लक्षणाच्चौरं परोक्षस्थितोऽप्यदृष्टरूपमपि जानाति । कीदृशः सन्- संयोगिकेन पूर्वं कृतविधिशिष्टसंकेतेन संज्ञितो दत्तसंज्ञः सन् । विदितसंज्ञश्च बहूनां मध्ये यस्य हस्ते चोरितं भाण्डं स्थितं स तन्निश्चितं जानातीति ॥

बहुपरिवारे वि घरे [१]लब्भइ चिरचव्वणिक्करसिओ वि ॥
णिवुणोवि भक्खचोरो हरदइअकएहि भक्खेहि ॥ १३ ॥

बहुपरिवारेपि गृहे [२]लभ्यते चिरचर्वणैकरसिकोऽपि ।
निपुणोपि [३]भक्ष्यचौरो हरदयितकृतैर्भक्ष्यैः ॥

हरदयितो मातुलः । तत्संयुक्तैर्भक्ष्यैर्भक्ष्यचौरो लभ्यते । यतोऽसावविदितभक्ष्यस्वरूपोऽवश्यं तान् भक्षयति, भुक्तवाँश्च प्रयुक्तद्रव्यगुणदर्शनाद् विज्ञायत इति ॥

अप्पेइ मुद्धचोरो भएण मोसं विअद्धरइआइ ॥
डड्ढोत्थिअणामक्खरगुरुगोलअतरणजुत्तीइ ॥ १४ ॥

अर्पयति मुग्धचौरो भयेन मोषं विदग्धरचितया ।
दग्धोत्थितनामाक्षरगुरुगोलकतरणयुक्त्या ॥

दग्धोत्थितनामाक्षरैस्तथा गुरुगोलकतरणयुक्त्या वा प्रयोगद्वयेनान्यं प्रति दर्शितेनाऽप्रौढचौरो भयान् मोषं समर्पयतीति ॥

तदेव प्रयोगद्वयमाह—

[४]दंसेह करे णामक्खराइ खीरतरुदुद्धलिहिआइ ॥
संकिअणामंकिअडड्ढभुज्जमसीमलणपअडाइ ॥ १५ ॥

[५]दर्शयत करे नामाक्षराणि क्षीरतरुदुग्धलिखितानि ।
शङ्कितनामाङ्कितदग्धभूर्जमसीमलनप्रकटानि[६] ॥

क्षीरतरवोऽर्कसुधादयः,[७] येषां भङ्गात् क्षीरं स्रवति, तद्दुग्धेन स्वहस्ततले गुप्त्या लिखितानि चौरनामाक्षराणि [८]विज्ञाः [९]प्रकटयत । कीदृशानि-.शङ्कितस्य चौरत्वेन चेतसि गृहीतस्य सम्बन्धिभिर्नामाक्षरैः प्रकटं कृत्वा यदङ्कितं सद् दग्धं भूर्जं तदुत्थया मस्या कज्जलेन यत् करतलस्य मलनं तेन प्रकटानि स्फुटीभूतानीति ॥

सङ्किअजणणामसगब्भमट्टिआगोलएहि सह सलिले ॥
वरडअभेरण्डसगब्भो णिक्खित्तो गोलओ तरइ ॥ १६ ॥

---

१ लक्खइ २ लक्ष्यते इति च पाठान्तरे । ३ भक्षचौरो--क. ख. । ४ दंसेह-- क. ख. । ५ दर्शयति-- क. ख. । ६ प्रकटयति-- क. ख. । ७ अर्कतूलादयः-- क. ख. । ८ विज्ञाता - क. ख. । ९ प्रकटयति - क. ख. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

शङ्कितजननामसगर्भमृत्तिकागोलकैः सह सलिले ।
वरटकनिलयसगर्भं निक्षिप्तं गोलकं तरति ॥

सलिले मृदादिकृतं मोदकाकारं गोलकं तरति प्लवतेऽन्यैर्गोलकैः सह सलिले निक्षिप्तम् । कीदृशैः- अन्येषां शङ्कितानां चौरत्वेन [1]परिसाध्यानां सम्बन्धिभिर्नामभिः सगर्भैः क्षामोदरीनिलयरहितैः । इदमत्र तात्पर्यम्- [2]यस्य चौरत्वं प्रतिपाद्यं तदीयनामगर्भमुक्तद्रव्यगर्भं च मृदादिगोलकं यस्यकस्यचिन्नामगर्भैर्गोलकैः सह जले निक्षिप्तमन्तर्न्यस्तद्रव्यमाहात्म्यात् प्लवतेऽन्यानि [3] निमज्जन्तीति ॥

क्खीरतरुदुद्धलिहिआइ गूढलेहम्मि ताव णज्जन्ति ॥
जाव मलिणीकीअन्ति णामक्खराइ अङ्गारचुण्णेण ॥ १७ ॥

क्षीरतरुदुग्धलिखितानि [4]गूढलेखे [5]तावज्ज्ञायन्ते ।
यावन्मलिनीक्रियन्ते नामाक्षराण्यङ्गारचूर्णेन ॥

क्षीरतरवः पूर्वोक्ता येषां शाखाग्रभङ्गात् क्षीरं स्रवति । सुबोधमितरत् ॥

विवरीअवण्णलिहिओ सलिलादस्साइपडिअपडिबिम्बो ॥
गूढोपि तह पठिज्जइ तणुभुज्जदलेव्व पट्ठाओ ॥ १८ ॥

विपरीतवर्णलिखितः सलिलादर्शादिपतितप्रतिबिम्बः ।
गूढोपि तथा पठ्यते तनुभूर्जदले इव पृष्ठतः ॥

वर्णानां वैपरीत्यं प्रतिबिम्बवद् विन्यासः । सुबोधमन्यत् ॥

अइबलिआ होइ मसी चुज्जमिणं तम्बभाअणे मलिआ ॥
विहिणा समणिम्बखइरकज्जला जाममत्तेण ॥ १९ ॥

अतिदृढा भवति मसीत्याश्चर्यं ताम्रभाजने मलिता ।
विधिना समनिम्बखदिरकज्जला याममात्रेण ॥

ताम्रभाजनेनैव मलनाद् विधिः । खादरो निर्यासः । शिष्टं गतार्थम् ॥

तिहला णिम्बकुरण्डअभङ्गरअहआरिवीअअकसाओ ॥
समबोलकज्जलं कुणइ मलणविहिणा मसीं बलिअं ॥ २० ॥

त्रिफलानिम्बकुरुण्टकभृङ्गरजोहयारिबीजककषायः ।
समबोलकज्जलां करोति मलनविधिना मसीं दृढाम् ॥

---

१ परिसो(शो)ध्यानां-- क, ख । २ यस्यकस्यचित्-- क, ख । ३ नमज्जन्ति-क. ।४ गूढलेखेपि क.।५ तावन्न-क.

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कषायः क्वाथस्त्रिफलादिभिर्बीजकान्तैः षड्भिः संवध्यते । तेन षडेते मसीकरणप्रकाराः– त्रिफला हरीतक्यामलकविभीतकानि, निम्बोऽरिष्टः, कुरुण्टक आम्रातकः, भृङ्गरजो मार्कवम्, हयारिः करवीरः, बीजकोऽसनो बीजसार इति प्रसिद्धः । बोलं जातीफलवृक्षनिर्यासः । मलनविधिः पूर्वोक्त इति ॥

थोरसुअवच्छवक्कलफणिवल्लिदलेहि चुराणअजुएहि ॥
होइ सुरगोवरूबं फुप्फुलरहिअं पि तम्बोलं ॥ २१ ॥

स्थूलशुकवृक्षवल्कलफणिवल्लीदलैश्चूर्णकयुतैः ।
भवति सुरगोपरूपं पूगफलरहितमपि ताम्बूलम् ॥

शुकवृक्षः शिरीषस्तस्य वल्कलं त्वक्, फणिवल्ली अपत्रिका, चूर्णं रङ्गम्, सुरगोपक इन्द्रगोपकाख्यो रक्तवर्णः कीटः । शिष्टं सुबोधम् ॥

चुराणअ[1]पराणुम्मीसिअलउचतरुवक्कलेण वअणम्मि ॥
लक्खिज्जइ तम्बोलं मंसलसिन्दूरपडिरूपं[2] ॥ २२ ॥

चूर्णकपर्णोन्मिश्रितलकुचतरुवल्कलेन वदने ।
लक्ष्यते ताम्बूलं मांसलसिन्दूरप्रतिरूपम् ॥

लकुचो वहुलाख्यो वृक्षविशेषः । शिष्टं गतार्थम् ॥

राअं करेइ वअणम्मि मंजुआखइरचुण्णअसणाहा ॥
घणतम्बोलसरूबं तहेव तम्बत्थिआछल्ली ॥ २३ ॥

रागं करोति वदने मंजुकाखादिरचूर्णकसनाथा ।
घनताम्बूलसरूपं तथैव [3]ताम्रास्थिकात्वक् ॥

[4]मञ्जुकारसखदिरचूर्णकाभ्यां सनाथा ताम्रास्थिका राङ्गिट्टिका इति देशभाषायां प्रसिद्धा । सुबोधमन्यत् ॥

[5] पव्वाअखइरकाढअरअचुण्णअगब्भिआ विअड्ढाण ॥
वअणम्मि दसणघसणेण वेडिआ कुणइ तम्बोलं ॥ २४ ॥

[6]परिवाणखदिरक्वाथरज(श्)चूर्णकगर्भा विदग्धानाम् ।
वदने दशनघर्षणेन[7] वीटिका करोति ताम्बूलम् ॥

१ पराणोम्मीसिअलिउअ–क. । २ पडिरूपअ–क. । ३ ताम्रास्थिका छाव(दः)–व–ख । ४ मंजकारस–क. । ५ परिवाग ? । ६ परिवात–क. । ७ घर्षणेनैव–ख. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

खदिरकाथः परिशोषितः, खदिरसार इति प्रसिद्धः । वे(वी)टिका नागवल्लीकृता । शिष्टं सुबोधम् ॥

[1] अरणतरुपरणचुरणचुरणअगब्भा अ वेडिआ कुणइ ॥
दसणघसणेण राअं मुहम्मि जिअविद्दुमच्छाअं ॥ २५ ॥

अलणतरुपर्णचूर्णचूर्णकगर्भा च वे(वी)टिका करोति ।
दशनघर्षणेन रागं मुखे जितविद्रुमच्छायम ॥

[2]अलनतरु[3]र्जम्बूपलाशिका । तत्पर्णकृतचूर्णरङ्गचूर्णाभ्यां सगर्भा वीटिका । शिष्टं स्पष्टम् ॥

सिचअंचलपरिवेडिअमइपत्तलपहलणाहअं विहिणा ॥
होइ दुहा [4]वालुंकं अविणासिअवत्थपेरन्तं ॥ २६ ॥

वस्त्रांचलपरिवेष्टितमतिपत्तलप्रहरणाहतं विधिना ।
भवति द्विधा वालु(ङ्)कमविनाशितवस्त्रपर्यन्तम् ॥

वालुङ्कं लोमशिका कर्कटी, चिर्भिटा फुट इति प्रसिद्धः फलविशेषः । तत् सूक्ष्मवस्त्रवेष्टितं तीक्ष्णशस्त्रविदारितं द्विधा भवति वस्त्रं न छिद्यते इति । विधिरत्र पटगाढवेष्टनम् ॥

[5] एक्केणठ्ठिवअ[6]णिपडइ कणिअपहएण [7]भूमिठविअस्स ॥
तंसाहअस्स मुहअं [8]सपईअं णालिएरस्स ॥ २७ ॥

एकेनैव निपतति कर्णिकाप्रहारेण भूमिस्थापितस्य ।
त्र्यंशाहतस्य मुखं [9]सप्रतीकं नालिकेरस्य ॥

कर्णिका लोहखण्डः. तया तिरश्चीनं कृत्वाऽऽहतस्य नालिकेरस्य मुखमग्रभागः सप्रतिकं सज्जसहितं निपतति । तन्नारिकेलं द्विधा भवतीत्यर्थः ॥

छत्तअरहिअं पि फुडं गुंजाफलपंकमज्जिअविसुक्खं ॥
भमइ धुअचलणजुअलो आरूढो पादुआजुअलं ॥ २८ ॥

छत्रकरहितमपि स्फुटं गुञ्जाफलपङ्कमज्जितविशुष्कम् ।
भ्रमति धौतचरणयुगल आरूढः पादुकायुगलम् ॥

गुञ्जाफलानि रक्तिकास्तानि पानीयेन पिष्ट्वा तत्पङ्कमध्ये त्रुडितं सद् विशुष्कमार्द्रीकृतपादयुगलश्छत्रकरहितमपि पादुकायुगलमारूढो भ्रमतीति ॥

---

१ अरड ? । २ अरलुतरु ? । ३ जम्बूफलासिका–ख. । ४ वलुअं–क. । ५ एकेणंविअ– क. ख. । ६ णिवडइ–क. ख. । ७ भूमिठपिअस्स— क. ख. । ८ समूइअं–क. ख. । ९ संप्रतिकं–क. ख.,

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

लहुदारुविणिम्मविअं आसणअं भणिअपंककअलेवं ॥
सुक्खं पि सलिलमज्जिअदिण्णं लगइ कटिचेलम्मि ॥ २६ ॥

लघुदारुविनिर्मितमासनं भणितपङ्ककृतलेपम् ।
शुष्कमपि सलिलमज्जितदत्तं लगति कटिचेले ॥

लघुदारु प्रतनुकाष्ठं, तन्निर्मितं वृष्याद्यासनं पूर्वोक्तेन पङ्केन कृतलेपं शुष्कमपि सज्जनमध्ये त्रुडितं पश्चात् कस्यचिदुपहास्यस्य दत्तं स्फिक्कर्पटलग्नं भवतीति ॥

जाणुणिहित्ताहोमुहणिविडम्बरकांसभाअणविमुक्को ॥
आसण्णंपि हु सिचअं ण डहइ जाणुं सिही डहइ ॥ ३० ॥

जानुनिहिताधोमुखनिविडाम्बरकांस्यभाजनविमुक्तः ।
आसन्नमपि खलु वस्त्रं न दहति जानु(नी) शिखी दहति ॥

जानुनिहितमधोमुखं निविडाम्बरं सुलग्न[1]सूक्ष्मवस्त्रं यत् कांस्यभाजनं तत्र विमुक्तोग्निरासन्नं संलग्नं वस्त्रं नदहति, [2]व्यवहितं तु जानुप्रदेशं दहतीति ॥

सिल्हाजलसंवलिओ [3]पिआलफलचुण्णभाविओ कलमो ॥
फुडइ फुडं [4]खरदिणअर[5]मऊहणिउरुम्बछिप्पन्तो ॥ ३१ ॥

अवश्यायजलसंवलितः पियालफलचूर्णभावितः कलमः ।
स्फुटति स्फुटं खरदिनकरमयूखनिकुरुम्बस्पृश्यमानः ॥

पियालः खरस्कन्धाख्यो वृक्षविशेषः । स्फुटति लाजत्वमापद्यते । शिष्टं सुबोधम् ॥

गरुएण वि ण दलिज्जइ उवरि समारोविएण जलभरिअं ॥
समसंठिअं सरावं समेण पासाणखंडेण ॥ ३२ ॥

गुरुणापि न चूर्ण्यते उपरि समारोपितेन जलभरितम् ।
समसंस्थितं शरावं समेण पाषाणखण्डेन ॥

समसंस्थितं [6] समतलभूभागावस्थितम् । समेन शरावतुल्यपरिमाणेन । सुबोधमन्यत् ॥

हत्थोवरि करसाहामड्डिज्जन्तो न होइ जई धवलो ॥
बालुंकवक्कलरसो तं तित्तं जाण बालुंकं ॥ ३३ ॥

हस्तोपरि करशाखामृद्यमानो न भवति यदि धवलः ।
वालुङ्कवल्कलरसस्तत् तिक्तं जानीहि वालुङ्कम् ॥

---

१ सूक्ष्मवस्त्रपत्रम्–क. ख. । २ व्यवहिते तु–क. ख. । ३ पीअल– क. ख. । ४ खर इत्येतत् पदं नदृश्यते पुस्तकेषु । ५मअोह –क. ख. । ६समभूतभागवत् स्थितं– क. ख. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

वालुङ्कस्य हुण्ढा(फुड्डा)द्यभिधानस्य (फलस्य) या त्वक्[1] प्रकाण्डछदिस्तस्या रसो हस्ततले मृद्यमानो यदि शुक्लो न भवति तदा तिक्तं तज्ज्ञेयमन्यथा मधुरमिति ॥

कज्जल[2] गंडूपअचुण्णरइअमसिलिहिअपुत्थअं सुइरं ।
बहलतमणिब्भरासुवि णिसासु वाइज्जइ जहित्थं ॥ ३४ ॥

कज्जलगण्डूपदचूर्णरचितमसीलिखितपुस्तकं सुचिरम् ।
बहलतमोनिर्भरास्वपि निशासु वाच्यते यथेच्छम् ॥

कज्जलेन तथा गण्डूपदानां भूमिलताख्यानां कृमिविशेषाणां चूर्णेन विरचितया मस्या लिखितं पुस्तकं कृष्णनिशास्वपि वाच्यत इति ॥

सुमलिअसिलालसेन्धअभूमिलआसज्जजावअरसेण ॥
लिहिअक्खराइ णिसिएवि पज्जलिआइ पढिज्जन्ति ॥ ३५ ॥

सुमलितशिलालसैन्धवभूमिलतासर्जयावकरसेण ।
लिखिताक्षराणि [3] निश्यपि [4] प्रज्वलितानि पठ्यन्ते ॥

शिला मनःशिला, अलं हरितालम्, सैन्धवं लवणम्, भूमिलतोक्ता, सर्जः सर्जरसः, [5] एतैः सहितेन यावकरसेनालक्तकरसेन लिखितान्यक्षराणि तमस्यपि देदीप्यमानानि वाच्यन्ते ॥

सिसुमारवसाविरइअदीवसिहागहिअकज्जलकआइ ॥
उवरिलिहिअं पि [6] रूवं [7] हत्थतले दीसइ मसीइ ॥ ३६ ॥

शिशुमारवसाविरचितदीपशिखागृहीतकज्जलकृतया ।
उपरि लिखितमपि रूपं हस्ततले दृश्यते मस्या ॥

शिशुमारो [8] जलचरप्राणिविशेषः, तस्य च वसा मेदस्तया रचिताऽभ्यक्ता या दीपशिखा वर्तिस्ततो गृहीतेन कज्जलेन कृतया मस्या यद् रूपमक्षरादि हस्तस्य पृष्ठभागे लिख्यते तत् करतले दृश्यते इति ॥

सुसिरं पिप्पलसुंगं जीहोवरि [9] संमुहठ्ठिअं सुथिरं ॥
[10] तत्ताउच्चरणवसेण कुणइ घरसकुणिआविरुअं ॥ ३७ ॥

सुसिरं पिप्पलशृङ्गं जिह्वाया उपरि [11] संमुखस्थितं सुस्थिरम् ।
[12] तत् तारोच्चारणवशेन करोति गृहशकुनिकाविरुतम् ॥

---

१ प्रकाण्डच्छवि- क. ख. । २ गण्डोपअ- क. ख. । ३ निशेव- क. ख. । ४ प्रज्वलितान्येव-क.ख. । ५ एतत्सहितेन-क. ख. । ६ रूअं-क । ७ हत्थअले-क. । ८ जलचरः-क.ख. । ९ संमुहसंठिअं-क. । १० सुकाकच्चरणवसेण-क. ११ संमुखसंस्थितं-क. ख. । १२ तत्कालोच्चारणवशेनेत्यन्यत्र ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पिप्पलोऽश्वत्थवृक्षस्तस्य सुषिरं यत् [1]शुङ्गं वेष्टितं नवं पत्रं जिह्वोपरि [2]संमुख(स्थ)मवक्रं सुस्थिरं संस्थितं तत् तारोच्चारणवशेन गृहशकुनिकाया भूमिचटकायाः सम्बन्धि विरुतं करोतीति ॥

आसण्णदिण्णदढगंठिजुअलगहिअं करेहि उव्वलिअं ॥
[3]थूलवलिअं पि तुट्टइ सहसा सणरज्जुअमण्णद्द[4] ॥ ३८ ॥

आसन्नदत्तदृढग्रन्थियुगलगृहीता कराभ्यामुद्वलिता ।
स्थूलवलिताऽपि त्रुट्यति सहसा शणरज्जुरनार्द्रा ॥

आसन्नं परस्परनिकटं दत्तं यद् दृढग्रन्थिद्वयं [5]तत्र कराभ्यां गृहीता, उद्वलितोद्वेष्टिता शणरज्जुर्भङ्गाविशेषदाम, स्थूलवलिता स्थूलावेष्टिताऽपि[6] सती, उभयत आकृष्यमाणा त्रुट्यति छिद्यते, यद्यनार्द्रा भवतीति ॥

गरुआपि समुक्खिप्पइ उवरि विमुक्कम्मि उद्धरिज्जन्ते ॥
सहसा करअम्मि सिला गोमअकअसंधिलेवम्मि ॥३९॥

गुर्व्यपि समुत्क्षिप्यते उपरि विमुक्त उद्ध्रियमाणे ।
सहसा करके शिला गोमयकृतसन्धिलेपे ॥

इदमत्र तात्पर्यम्—यस्याः शिलायाः करको घटो यदि जलाद् विमुक्तो गोशकृता कृतसन्धिलेपः सन्नुद्ध्रियते सा शिला तदुद्वहनादेव [7]महत्यप्युत्क्षिप्यते, करकादिर्यद्यसनस्थानान्निम्नो भवति तदूर्ध्वमुखेपि तस्मिन् पूर्वोक्तप्रयोगसम्पत्तिरिति ॥

सजलणधूमसगब्भो घडओ [8]ओमत्थओ वि जलमज्झे ॥
पिवइ जलं व्यपगतधूमहुअवहो [9]वमइ णीसेसं ॥ ४० ॥

सज्वलनधूमसगर्भो घटकोऽधोमुखीकृतोपि जलमध्ये ।
पिबति जलं व्यपगतधूमहुतवहो [10]वमति निःशेषम् ॥

इदमत्र तात्पर्यम्—यस्य घटस्याभ्यन्तरे सधूमोऽग्निः प्रज्वाल्यते सोऽधोमुखोऽपि तडागादिस्थ-जलमध्ये निक्षिप्तो [11]जलं पिबति तेन पूर्यते। धूमज्वलनप्रशान्तौ तज्जलं सर्वमुद्गिरतीति ॥

ससलद्दिचुण्णकअगब्भवत्तिजुअलस्स उवरिमसिहाइ ॥
पज्जलइ धूममग्गागआइ तलसंठिआ दिइआ ॥ ४१ ॥

---

१ शुङ्गवेष्टितं– क. । २ संमुखस्थ यमवक्रं– क. ख. । ३ थूलवलिआ– क. ख. । ४ मण्णद्दा– क. ख. । ५ तत्– क. ख. । ६ स्थूलवेष्टिता– क. ख. । ७ महत्युत्क्षिप्यते–क. ख. । ८ ओमत्थिओ– क. ख. । ९ अम्बइ –क. । १० अङ्कति–क., अङ्किति–ख. । ११ जलमपिबति–क. ख. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

शशशकृच्चूर्णकृतगर्भवर्त्तियुगलस्योपरितनशिखया ।
प्रज्वलति धूममार्गागतया तलसंस्थिता द्वितीया ॥

अयमर्थः— शशाको मृगविशेषः । तच्छकृच्चूर्णगर्भे [1]द्वे वर्तिके कार्ये तयोरेकोपरि, [2]द्वितीया तदधःस्थानव्यवहितार्था स्थापनीया । उपरितनी प्रज्वाल्यते, तस्याश्चाधोगतिधूमः प्रसरति । ततः स्पृष्टाधोवर्तिनी व्यवहितापि प्रज्वलतीति । अधोगताया अपि धूमेन स्पृष्टोपरितनी तथैव प्रज्वलतीति ॥

वामकरंगुट्ठंगुलिगोविअपेरन्तमज्झपरिवत्तं ॥
छिण्णं पि अछिण्णंविअ सुत्तं दंसिज्जइ जणस्स ॥४२॥

वामकराङ्गुष्ठाङ्गुलिगोपितपर्यन्तमध्यपरिवृत्तम् ।
छिन्नमप्यच्छिन्नमेव सूत्रं [3]दर्श्यते जनस्य ॥स्पष्टार्थम्॥

विसमेहिं वामकाणं दाहिणकाणं समेहि जाणिहिओ ॥
णामक्खरेहिं पुरिसं विवरुक्खमदिट्ठरूवं पि ॥ ४३ ॥

विषमैर्वामकाणां दक्षिणकाणां समैर्ज्ञास्यथ ।
नामाक्षरैः पुरुषं विपरोक्षमदृष्टरूपमपि ॥ स्पष्टा गाथा ॥

सिहरेहि [4]सुपिक्के दालिमम्मि वाहत्तरीइ गुणिएहि ॥
जं होइ ताइ जाणह बीआइ अकाणवक्कम्मि ॥ ४४ ॥

शिखरैः सुपक्वदाडिमे द्वासप्तत्या गुणितैः ।
यद् भवति तानि जानीथ बीजान्यकाणवक्रे ॥ निगदव्याख्यातम् ॥

चिंचाफलवाहिरछल्लिभूइमीसेण कअअचुण्णेण ॥
मिलिएण होइ मइरा सहसव्विअ सलिलसारिच्छा ॥ ४५ ॥

चिञ्चाफलबाह्यत्वग्भूतिमिश्रितेन कतकचूर्णेन ।
मिलितेन भवति मदिरा सहसैव सलिलसदृशा ॥

चिञ्चाऽम्लिकाख्यो वृक्षस्तत्फलस्य या बाह्यत्वक् तद्भस्ममिश्रेण कतकफलचूर्णेन मिलितेन मलितेन वा सद्य एव मदिरा जलतुल्या भवति । मदिरागन्धं तस्य नश्यतीत्यर्थः ॥

गंभीरथिरजलोवरि सुमसिणसज्जरसगुणिठए लिहिअं ॥
आलेक्खं ण [5]णिउड्डइ वहुवण्णअचुण्णसोहिण्णं ॥ ४६ ॥

---

१. द्विवर्तिकार्ये-क. ख. । २. द्वितीयतदधस्थान-क. ख. । ३. दृश्यते-ख. । ४ सुपिक-क.ख. । ५ णिओडइ- क.ख. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

गम्भीरस्थिरजलोपरि सुमसृणसर्जरस[1]गुण्ठिते लिखितम् ।
आलेख्यं न निब्रूडति बहुवर्णकचूर्णशोभावत् ॥

अगाधस्तब्धस्य सलिलस्योपरि सर्जरसस्य शालनिर्यासस्य चूर्णं विकीर्य यच्चित्रं बहूनां सिन्दूरहरितालादीनां वर्णकानां सम्बन्धिनां चूर्णेन लिख्यमानां सच्छोभावल्लिखितं भवति तत् तत्र न मज्जति भित्तिवद् विभातीति ।

बहुआरपिक्कफलमिजिबहुचुण्णुम्मीसवण्णआलिहिअम् ॥
आलेक्खं थिरसलिलंबरम्मि ण णिबुड्डइ कआइ ॥ ४७ ॥

बहुवारपक्वफलमज्जबहुचूर्णोन्मिश्रवर्णकालिखितम् ।
आलेख्यं स्थिरसलिलस्योपरि न निब्रूडति कदाचित् ॥

पूर्ववज्जलस्योपरि लिखितमालेख्यं न निमज्जति । केन वस्तुना लिखितम्- बहुवारस्य श्लेष्मान्तकस्य [2]पक्वं यत् फलं तस्य यो मज्जा तत्सम्बन्धि बहु यच्चूर्णं तेनोन्मिश्रिता ये वर्णकाः सिन्दूरादयस्तैरित्याय(ा)सपरो जलालेख्यप्रकारोऽयमुक्तद्रव्यमिश्रैर्वर्णकैरेवालिख्यते इति ॥

जलभरिअणिच्चल[3]ठ्ठिअसरावमज्झम्मि[4]मुत्तमविअम्पं ॥
जणजणिअ[5]महच्चुज्जं तिट्ठइ[6]उद्धट्ठिअं मुसलं ॥ ४८ ॥

जलभरितनिश्चलस्थितशरावमध्ये मुक्तमविकम्पम् ।
जनजनितमहाश्चर्यं तिष्ठत्यूर्ध्वस्थितं मुशलम् ॥

जलभरितस्य निश्चलस्थितस्य च मृत्पात्रस्य मध्ये निष्कम्पं न्यस्तं [7]सन्मुशलमूर्ध्वस्थितमास्ते । अत एव जनानां जनितमहाश्चर्यमिति ॥

[8]पूसम्मि कुरर[9]दलपत्तिएण वाणेण दूरमुत्तं पि ॥
रोहिअकंटअगब्भं[10]विज्झइ लक्खं सिलिम्वो वि ॥ ४९ ॥

पुष्ये कुररपक्षपत्रितेन वाणेन दूरमुक्तमपि ।
रोहितकण्टकगर्भं विध्यति लक्ष्यं बालोऽपि ॥

पुष्यनक्षत्रे कुररकाख्यस्य पक्षिणः सम्बन्धिभिर्दलैः [11]पक्षैः पत्रितेन कृतपक्षेण शरेण लक्ष्यं बालोपि विध्यति । कीदृशं लक्ष्यम्- रोहितकाख्यस्य मत्स्यस्य सम्बन्धि कण्टकं गर्भेऽन्तर्यस्य स तथा तत् तादृशमिति ॥

---

१ मिश्रिते-क. ख. । २ प्रत्यक्षफलम्- क.ख. । पक्वं परिणतमिति । ३ त्थिअ-क.ख. । ४ मिक्तमविकम्पं-क.ख. । ५ महाचज्जं-क. ख. । ६ मुद्धठ्ठिअं-क. ख. । ७ सन्मुशलरूढस्थितमात्रे- क. ख. । ८ पुस्सम्मि-इतिपाठान्तरम् । ९ दलन्-क. ख. । १० वेधइ-क. ख. । ११ मलैः पक्षैः-क. ख. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

विसचुण्णपुण्णगब्भा कांचणतेल्लाण्णिआ पईवस्स ॥
वत्ती किंकल्लत्थवअविब्भमं [1]वहइ पज्जलिआ ॥ ५० ॥

विसचूर्णपूर्णगर्भा काञ्चनतैलार्द्रिता प्रदीपस्य ।
वर्तिरशोकतरुस्तबकविभ्रमं वहति प्रज्वलिता ॥

काञ्चनं धत्तूरं तद्बीजसमुद्भवेन तैलेनार्द्रीकृता सिक्ता प्रदीपस्य वर्त्तिर्विषस्य [2]क्ष्वेडस्य चूर्(र्णपू) र्णाभ्यन्तरा प्रज्वलिता सती अतिलौहित्यादशोकपुष्पगुच्छच्छविं धारयतीति ॥

सिन्दूरगाढपूरिअभूमिलआवत्तिदीवकंतीइ ॥
जंजं छिप्पइ दव्वं तंतं कणअच्छविं वहइ ॥५१॥

सिन्दूरगाढपूरितभूमिलतावर्त्तिदीपकान्त्या ।
यद्यत् स्पृश्यते तत्तत् कनकच्छविं वहति ॥

सिन्दूरेण गाढं घनं कृत्वा पूरिता याऽसौ भूमिलता भस्त्राकारं मृतगण्डूपदशरीरं तया केनापि तैलेनाभ्यक्तया कृतवर्त्तिर्यो दीपस्तस्य कान्त्या यद् द्रव्यं स्पृश्यते तत् सर्वं सुवर्णच्छायां धारयतीति ॥

[3]सोहइ सुरगोवअगब्भवत्तिविरइअ[4]पईवकंतीए ॥
छिक्कं दुद्धं तक्खण[5]णिसूइअससससोणिअच्छाअं ॥५२॥

शोभते सुरगोपकगर्भवर्तिविरचितप्रदीपकान्त्या ।
स्पृष्टं दुग्धं तत्क्षणनिषूदितशशशोणितच्छायम् ॥

सुरगोप(क इन्द्रगोप)काख्यकीटस्तच्छरीरचूर्णं गर्भेऽर्यन्तरस्यास्तथाविधया वर्त्या विरचितस्य प्रदीपस्य कान्त्या स्पृष्टं (सद्) दुग्धं तत्कालहतशशाकरुधिरतुल्यच्छायं शोभते। अत्र तैलं यत्किंचिदिति ॥

दंसेइ राअरूविअ[6]मेआहिवसाकओ णिसासमए ॥
गेहोवरि प्पईवो वंसाइ भुअंगसरिसाइ ॥ ५३ ॥

दर्शयति राजरूपिक[7]मेदोहिवसाकृतो निशासमये ।
गेहोपरि प्रदीपो वंसान् भुजङ्गसदृशान् ॥

राजरूपिकः श्वेतार्को मन्दार इति प्रसिद्धस्तस्य [8]मेदः फलान्तर्गतं कार्पासप्रायं द्रव्यं तेनाऽहिवसया भुजङ्गवसया विलेपितेन निर्मित (या) वर्तिका (या) कृतो दीपो गृहस्योपरि वंशकाष्ठानि सर्परूपाणि दर्शयति ॥

---

१ वहेइ–क. ख. । २ चेहस्य– क. ख. । ३ रेहइ–क. ख. । ४ पईअ–क. ख. । ५ णिमुद्ध–क. ख. । ६ रोआ–क. ख. । ७ रोदाहि–क. ख. । ८ रोदः –क. ख. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

दीसइ गंधव्वभुअंगतेल्ल[1]पज्जालिए पईवम्मि ॥
भवणे सररज्जुलआदिअं [2]दिग्घविसहरसरिच्छं ॥५४॥

दृश्यते गन्धर्वभुजङ्गतैलप्रज्वालिते प्रदीपे ।
भवने शररज्जुलतादिकं दीर्घविषधरसदृशम् ॥

गन्धर्व एरण्डस्तद्बीजसमुद्भवेन तैलेन तथा भुजङ्गस्य सर्पस्य भाण्डे स्विन्नस्य सतः सच्छिद्रे भाण्डान्तरे भूमिसंस्थे यः शरीरस्नेहः स्रवति तद् भुजङ्गतैलमित्युक्तम्, ताभ्यां, प्रज्वालिते सति प्रदीपे भवने शररज्जुलतादि यत्किञ्चिद् वस्तु तत् (सर्वं) सर्पसदृशं दृश्यते । वर्निरत्राविशिष्टेति ॥

वंसा विअ होन्ति अही[3]दद्दुरतेल्लंजिअच्छिजुअलस्य ॥
पुरिसस्स कसल(ण)देहा भअंकरा कालपासेव्व ॥५५॥

वंशा एव भवन्त्यहयो दर्दुरतैलाञ्जिताक्षियुगलस्य ।
पुरुषस्य कृष्णदेहा भयंकराः कालपाशा इव ॥

दर्दुरो मण्डूकः । तत्तैलं भुजङ्गतैलवद् गृह्यते । तेनाभ्यक्तनेत्रद्वयस्य पुरुषस्य वंशा उक्तरूपसर्पाकारा भवन्तीति ॥

कुररमुहछेअलिहिआ रेहा [4]पन्थम्मि सलिलभरिअं पि ॥
लंघिअमत्ता [5]रित्तं करेइ जलहारिआकुम्भं ॥५६॥

कुररमुखच्छेकलिखिता रेखा पथि सलिलभरितमपि ।
लङ्घितमात्रा रिक्तं करोति जलहारिकाकुम्भम् ॥

[6]कुरर उत्क्रोशाख्यः पक्षिविशेषस्तस्य मुखं चञ्चुस्तद् विदग्धेनालक्षितं गृहीत्वा तेन कृता रेखा पथि जलहारिण्या[7] लङ्घिता सती तद्गृहीतं कुम्भं सजलमपि रिक्तं करोतीति ॥

खरजणणिजराउतिअडु[8]अलित्तवामेक्कचलणकअपहरो ॥
मुअइ फलकुसुमणिवहं झत्ति दुमो [9]कप्परुक्खोव्व ॥५७॥

खरजननीजरायुत्रिकटुकलिप्त[10]वामैकचरणकृतप्रहारः ।
मुञ्चति फलकुसुमनिवहं झगिति द्रुमः कल्पवृक्ष इव ॥

खरजनन्या रासभमातुः सम्बन्धिना प्रसवकालपतितेन जरायुणोल्वणेन शल्यमिति प्रसिद्धेन तथा त्रिकटुकेन मरिचशुण्ठीपिप्पलीचूर्णेनावगुण्ठितेन वामचरणेन कृतैकप्रहारो

१ तेल–क. ख. । २ दीह इति पाठान्तरम् । ३ दंदुर–क. ख. । ४ पत्थम्मि– क. ख. । ५ रिकं– क. ख. । ६ कुररपक्षो विदग्धेनालक्षितं गृहीत्वा रेखा– क. ख. । ७ णा क. ख. । ८ अवगुण्ठिअ– क. ख. । ९ कप्परूक्खोव्व– क. ख. । १० वामचरणकृतैकप्रहार इति तु व्याख्यानुसारी पाठः ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

दत्तैकघातो यः कश्चिद् द्रुमस्तेषां फलपुष्पाणां वृन्दं झगिति तत्कालं [१] प्रमुच्यते। सर्वाणि फलपुष्पाणि पतन्तीत्यर्थः ॥

णीसेसकण्हविण्हासम[२]वण्णअपसवकालगहिआइ ॥
आणेइ जराइ फलाइ तुंगतरु[३]संठिआइम्पि ॥५८॥

निःशेषकृष्णवृष्णीसमवर्णकप्रसवकालगृहीतया[४] ।
आनयति [५]जराय्वा फलानि तुङ्गतरुसंस्थितान्यपि ॥

निःशेषं कृष्णा यासौ वृष्णी [६]एडका तस्याः समवर्णकस्तुल्यरोमच्छायो योऽसौ प्रसवो वत्सस्तत्प्रसवकाल एव गृहीतया [५]जराय्वा जरायुणा हस्तगृहीतया मुष्टिबन्धं कुर्वंस्तुङ्गतरुसंस्थितान्यपि फलानि प्रयोक्ताऽऽनयत्यधः पातयतीत्यर्थः ॥

पूसम्मि भूअदिअहे कालाय(अ)समुद्दिआ विणिक्खित्ता ।
रअलग्गसुणअजोणाइ पडिअगहिआ तहव्वेअ ॥५९॥

पुष्ये भूतदिवसे कालायसमुद्रिका विनिक्षिप्ता ।
रतलग्नशुनीयोन्यां पतितगृहीता तथैव ॥

पुष्यनक्षत्रे चतुर्दश्यां तिथौ कालायसेन शस्त्रेण कृता मुद्रिका [७]वलयः सुरतासक्तायाः सारमेयवध्वा वराङ्गनिक्षिप्ता ततो भूमौ पतिता गृहीता सती वृत्तन्यस्ता पूर्वगाथोक्तकार्यं करोतीति ॥

सत्ताहं तालसिलाकअभोअणसिहिपुरीसलित्तम्मि ॥
हत्थम्मि कअं दव्वं ण णिअच्छइ तिअसणाहो वि ॥६०॥

सप्ताहं तालशिलाकृतभोजनशिखिपुरीषलिप्ते ।
हस्ते कृतं द्रव्यं न निरीक्षते त्रिदशनाथोऽपि ॥

तालं हरितालं, शिला मनःशिला, ताभ्यां सह नवनीतादिना कृतभोजनस्य मयूरस्य विष्ठया लिप्ते करे यद् द्रव्यं भवति तददृश्यत्वमापद्यत इति ॥

[८]सुमुहफलुव्वट्टिणिआ [९]होन्ति सलिले णिहित्तमत्ताओ ॥
किमिवन्द[१०]सरिच्छाओ अज्जअवीआइ वि तहेअ ॥६१॥

सुमुखफलो[११]द्वर्तनिका भवन्ति सलिले निहितमात्रा ।
कृमिवृन्दसदृश्योऽ[१२]जकबीजान्यपि तथैव ॥

---

१ प्रसूते– कः प्रसूयते– ख. । २ वण्दश्र– क. ख. । ३ संथिआ– क. ख. । ४ गृहीतानि–क. ख. । ५ जरया– क. ख. । ६ एडिका– क. ख. । ७ वालिता– क. ख. । ८ सुमुहफलमीसोद्वर्तनिकेति पाठान्तरम् । ९ हन्ति– क. ख. । १० सन्ध(।) हाश्रो– क. ख । ११ द्वर्तिनिका– क. ख. । १२ अजीवक–क. ख. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सुमुखो बृहत्पत्राख्यो हरितक-विशेषः (?), जम्बुक इति क्वचित्प्रसिद्धः, तत्फलचूर्णमिश्रितस्योद्वर्तितस्य कणिका जलमध्यनिक्षिप्ताः क्रिमिसमूहतुल्या भवन्ति। अर्जकस्य कुठेरकस्यापि बीजानि जलमध्यनिक्षिप्तानि पूर्ववद् भवन्तीति ॥

हअकालेअजअरअमीसचिक्कअल्लोल्लिआण पुरिसाण ॥
उम्मलिणिआउ सुइरं किमिव्व चल्लन्ति तणुआओ ॥६२॥

हयकालीयकयवरजोमिश्रचिक्कसोद्वर्तितानां पुरुषाणाम् ।
उद्वर्तनिकाः सुचिरं कृमिवच्चलन्ति तनुकाः ॥

अश्वयकृन्मांसस्य यच्चूर्णं तन्मिश्रितेन यवचूर्णेन कृतोद्वर्तनानां पुरुषाणामुद्वर्तनकणिकाः सूक्ष्मा जलक्षिप्ताः क्रिमिवत् सुचिरं तत्र चलन्तीति ॥

पट्टअबन्धेहि वि लोअणेहि चलणग्गसंठिअं दव्वं ॥
णासाणुसारिदिट्ठी कहेहि णिस्संसअं सअलं ॥६३॥

[1]पट्टकबद्धाभ्यामपि लोचनाभ्यां चरणाग्रसंस्थितं द्रव्यम् ।
नासानुसारिदृष्टिः कथयति निःसंशयं सकलम् ॥

वस्त्रादिना स्थगितलोचनोऽपि नासिकानुसारेण स्थापितदृष्टिः पुरुषः पादाग्रसंस्थितं द्रव्यं सर्व यथावत् कथयति पश्यतीत्यर्थः ॥

जाअवकुसुमोव्वट्टिअछुरिआछिण्णम्मि माउलुंगम्मि ॥
[2]करपीलिअम्मि मउअं गलइ रसं रुहिरसारिच्छम् ॥६४॥

जवाकुसुमोद्वर्तितछुरिकाच्छिन्ने मातुलुङ्गे ।
करपीडिते मृदु गलति रसो रुधिरसदृक्षः ॥

जवाकुसुमानि जवापुष्पाणि, ओड्रपुष्पाणीति कचित् प्रसिद्धानि, तैः पिष्टैर्लिप्तया छुरिकया विदारिते बीजपूरे पश्चात् मृदु कृत्वा हस्तनिष्पीडिते सति तदीयो रसो रक्ताभो भवति ॥

झत्ति सगेहुमझिण्डुअबीअमण्डिअमुहो जणं विहिणा ॥
अडिआसप्पो जलचुलुअताडिओ तडिति दसइव्व ॥६५॥

झगिति सगोधूमझिण्टूकबीजमण्डितमुखो जनं विधिना ।
खटिकासर्पो जलचुलुकताडितस्तडिति दशतीव ॥

खटिका(या)मालिखितः सर्पः सगोधूमैर्झिण्टूकस्य गोपालपीठकस्य बीजैर्विधिना विदग्धेन मण्डितमुखः प्रसाधिताननः सन् जलचुलुकेन ताडितः सजीव इव सन् जनमासन्नं दशतीव। तडित्यव्यक्तानुकरणम् । तडिति शब्देन दशतीत्यर्थः ॥

---

१ पट्टकबन्धाभ्यामपि-क. ख. । २ करमीलिअम्मि-क. ख. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सुसिणिद्धदीहराए [इ] रालारअरंजिआइ वत्तीइ ॥
जलइ जणजणिअचज्जो पईवओ सलिलसंपुण्णो[1] ॥६६॥

सुस्निग्धदीर्घया रालारजोरञ्जितया वर्त्या ।
ज्वलति जनजनिताश्चर्यः प्रदीपकः सलिलसंपूर्णः ॥

येनकेनचित् तैलेन सुस्निग्धया दीर्घया च वर्त्या रालायाः सर्जरसस्य रजसा चूर्णेन रञ्जितयाऽन्तर्बहिर्लिप्तया जलपूरितपात्रोऽपि दीपो ज्वलति । अतएव जनस्य जनिताश्चर्य इति ॥

जलइ जलमज्झणिहिआ[2] खीरद्दुमदुद्धभाविआ वत्ती ॥
जणजणिअकोऊहला तेल्लोल्लं जलहिफेणं व ॥६७॥

ज्वलति जलमध्यनिहिता[2] क्षीरद्रुमदुग्धभाविता वर्तिः ।
जनजनितकौतूहला तैलार्द्रं जलधिफेनमिव ॥

क्षीरद्रुमस्य सुधावृक्षस्य क्षीरेण भाविता लिप्ता वर्त्तिर्जलमध्यन्यस्ता ज्वलति । यथा येनकेनचित् तैलेनार्द्रं समुद्रफेनं जलमध्ये ज्वलतीत्युपमानद्वारेण द्वितीयः प्रयोग उक्तः । जलमध्ये ज्वलनात् कौतूहलजनकत्वमिति ।

वट्टग्गसुसिरविणिहिअझेण्डुअबीआइ मणुहकुसुमाइं ॥
झत्ति सजीवाइंव उहिडन्ति जलसित्तमत्ताइं ॥६८॥

[3]वृन्ताग्रसुषिरविनिहितझिण्टुकबीजानि सूक्ष्मकुसुमानि ।
झटिति सजीवानीवोच्छलन्ति जलसिक्तमात्राणि ॥

सूक्ष्मपुष्पाणि जलसिक्तमात्राणि सावतरणानीवोत्पतन्ति । कीदृशानि–[4]वृन्ताग्रे यः सुषिरोदेशस्तत्र [4]सूक्ष्मविनिहितानि गोपालपीठकबीजानि येषां तानि तथेति ॥

इच्छुरअबीअचुण्णं चक्कंकादलरसो वा णिहित्तो ।
[1]कढिणं करेइ सलिलं सगेरुअं रुहिरसारिच्छं ॥६९॥

इक्षुरकबीजचूर्णं चक्राङ्कादलरसो वा निक्षिप्तः ।
कठिनं करोति सलिलं सगैरिकं रुधिरसदृक्षम् ॥

इक्षुरकस्य कोकिलाक्षस्य सम्बन्धिनां बीजानां चूर्णं, चक्राङ्कायाः सुदर्शना (ख्या) या ओषध्या दलरसो वा पत्रनिःस्यन्दो वा जलमध्यनिक्षिप्तस्तज्जलं गैरिकसंयुक्तं कठिनत्वं लोहितत्वं च प्रापयतीत्यर्थः ॥

---

१ णिमि(हि)आ–क. ख. । २ निक्षिप्ता–क. ख. । ३ वृत्ताग्र–क. ख. । ४ वृताग्रे–क. ख. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

खरतरणिसंमुहट्ठिअणिम्मलकंसमअभाअणाहित्तो ॥
णवतूलअम्मि णिपडइ झत्ति सिही काणखण्डोव्व ॥७०॥

खरतरणिसंमुखस्थितनिर्मलकांस्यमयभाजनाक्षिप्तः ।
नवतूलके[६] निपतति झगिति शिखी करीषखण्ड इव ॥

तीक्ष्णस्यार्कस्य संमुखस्थापितं पतितप्रतिविम्बं यत्[७] कांस्यपात्रं तस्मादुत्पन्नोऽग्निः प्रत्यग्रकार्पासपिण्डे निपतितः प्रज्वलति। शुष्कगोमयखण्ड इव निपतितः प्रज्वलतीत्यर्थः।

मअमअरमच्छदद्दुरसुरपडिमाकमढविच्छिअभुअंगा ।
गरुडसिहिकीरपमुहा अण्णेपि मणोहरा सउणा ॥
लहुदारुमसिणकप्पडतणुअइणभुज्जभण्डविणिम्मविआ ।
सअलजणहिअअदइआ मणहरवण्णुज्जलावअवा ॥
करमलिअछीरदुमबहलदुद्धतललग्गकीडआ विहिणा ।
उप्पाएन्ति चलन्ता जणस्स हिअए महाचुज्जं ॥७१-७२-७३॥

मृगमकरमत्स्यदर्दुरसुरप्रतिमाकमठवृश्चिकभुजङ्गाः ।
गरुडशिखिकीरप्रमुखा अन्येपि मनोहराः शकुनाः ॥
लघुदारुमसृणकर्पटतन्वजिनभूर्जतेजनादिविनिर्मिताः ।
सकलजनहृदयदयिता मनोहरवर्णोज्ज्वलावयवाः ॥
करमलितक्षीरद्रुमबहलदुग्धतललग्नकीटका विधिना ।
उत्पादयन्ति चलन्तो जनस्य हृदये महाश्चर्यम् ॥ ॥

एते मृगादयो लघुदार्वादिनिर्मिता [१]हस्तमृदितसुधावृत्तबहलक्षीरं यत्तलमधोभागस्तेषां, तत्र लग्ना वैदग्ध्येन श्लेषिताः कीटाः क्रिमिविशेषा येषां तथाविधाः सन्तः क्रमिचलनवशात् स्पन्दमानाः सचेतनभ्रान्तिमुत्पादयन्तो जनस्याश्चर्यकारिणो भवन्ति। कमठः कूर्मः, कीरः शुकः, भण्डं नडादिसम्बन्धिलघुतृणं, शिष्टाः प्रसिद्धा इति ॥तिलकम्॥

[२]सित्थअसणाह[३]तणुकसण[४]तिसरचिहुरिक्कतंतुघडिआ व ।
एए[५] चलुच्चलन्ता करिन्ति कोऊहलं गरुअं ॥७४॥

---

१ हस्तमृदितसुधावृत्तक्षीरबहलं यत्तलं तेषामधोभागस्तत्र लग्नाः कीटा येषां तादृशा इत्यर्थः। २ सेत्थअ–क.।
३ तंतुकीसण–क. ख.। ४ तसरि– क.। ५ आपव्वलच्चलन्ता–क.

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सिक्थकसनाथतनुकृष्णत्रिसरचिकुरैकतन्तुघटिता वा ।
एते चलदुच्चलन्तः कुर्वते कौतूहलं गुरुकम् ॥

एते पूर्वोक्ता मृगादय एवंविधाः सन्तो वा कौतूहलं जनयन्ति । कीदृशाः— सिक्थकेन मधूच्छिष्टेन सनाथः संयुक्तस्ततः सूक्ष्मः कृष्णवर्णश्च यस्त्रसरस्य [1]पटविशेषसूत्रस्य चिकुरस्य वा केशस्य सम्बन्धी एकस्तन्तुस्तेन घटिता अलक्षितेन योजितास्तच्चालनवशेनैवागच्छन्तो भ्रमन्तश्चलन्तः स्पन्दमाना वेति ॥

पूआववएसालक्खघडिअकीडाइवीअजुत्तीइ ।
अण्णेपि पओआ णिअबुद्धिइ रइए करिज्जाह ॥७५॥

पूजाव्यपदेशालक्ष्यघटितकीटादिवीजयुक्त्या ।
अन्यानपि प्रयोगान् निजबुद्ध्या रचितान् कुरुत ॥

पूजादिव्यपदेशेन प्रतिमादौ जनैरदृश्यं कृत्वा घटिता ये कीटादयस्त एव बीजभूता कल्पनाकृतानां युक्त्यन्तराणां कारणभूता युक्तिस्तयाऽन्यानपि यथेष्टान् प्रयोगान् कुरुतेति ॥

मन्दालोए अविअड्ढपेच्छिए[2] णिउणआइ कीरन्ता ।
पइरिक्के कीरन्ता णवरे एए फलं देन्ति ॥७६॥

मन्दालोकेष्वविदग्धप्रेक्षिते निपुणतया क्रियमाणानि ।
एकान्ते क्रियमाणानि केवलमेतानि फलं ददति ॥

हस्तलाघवसाध्यानां प्रयोगाणामप्रतिभेदहेतु[3]नियमायेयं युक्तिः । शिष्टं गतार्थम् ॥

सुसिरावअवसरूवं सबीअअं विरइऊण माअङ्गं ।
उदरट्ठिअसालोरं मअणंजणपूरिअकओलं ॥

जुत्तीइ तस्स धूओ जा[4] दिज्जइ पउअगुग्गुलुम्मीसो ।
ता मअमलिणकओलो कुणइ रवं वरगइन्दोव्व ॥७७-७८॥

सुषिरावयवसरूपं विरचय्य सबीजकं मातङ्गम् ।
उदरस्थितसालूरं मदनाञ्जनपूरितकपोलम् ॥

युक्त्या तस्य धूपो [5]यावद् दीयते प्रचुरगुग्गुलून्मिश्रः ।
तावन्मदमलिनकपोलः करोति रवं [6]वरगजेन्द्र इव ॥

१ पटाविशेषसूत्रस्य—क. ख. । २ वीच्छिए— क. ख. । ३ हेतुनियमोपयुक्तिः— क. ख. । ४ जो— क. ख. । ५ यो— क. ख. । यदित्येन्यत्र । ६ वनगजेन्द्र ?।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

वीजकं पारदम् । मदनं सिक्थकं तेनाञ्जनेन च पूरितकपोलः । सालूरो मण्डूकः । इदमत्र तात्पर्यम्– अन्तःसुषिरं हस्तिनं कारयित्वा तस्योदरे पारतं मण्डूकं (च) क्षिप्त्वा धूपव्याजेनान्तरूष्माणं [1]धूमं च संक्रमय्य चलनध्वनितेन (ध्वनिं) तथा कपोलाभ्यां गलितसाञ्जनसिक्थकत्वान्मदस्रुतिं च दर्शयेदिति ।।युगलकम् ।

लोहं व जलणवण्णं दित्तङ्गारं व लिहइ जीहाइ ।
वोउत्थेरअसहिअं सुंठिं चिरचव्विअं [2]काउं ॥७९॥

लोहं वा ज्वलनवर्णं दीप्ताङ्गारं वा लेढि जिह्वया ।
मुण्डितिकासहितां शुण्ठीं चिरचर्वितां कृत्वा ॥

वोडत्थेरअं [3]श्रमणशीर्षकं, तदेव मुण्डितकं तेन सहितां शुण्ठीं चिरचर्वितां कृत्वा शस्त्रमग्निसन्तप्तमङ्गारांश्च लिहतो जिह्वा न दह्यते नापि पीड्यत इति ॥

सूईइ सूअएण व ओट्ठकओले वि भिन्दइ जहित्थं ।
पढमं विअ बहुसो चविऊण कीरंढअदलाइ ॥८०॥

सूच्या सूचकेन वा ओष्ठकपोलानपि विध्यति यथेच्छम् ।
प्रथममेव बहुशश्चर्वयित्वा [4]कीरण्टकदलानि ॥

कीरंढकस्य (?) पत्राणि [5]प्रथममेव चिरं चर्वयित्वा सूक्ष्मया सूच्या स्थूलेन वा सूचकेनौष्ठौ कपोलौ च गल्लौ (च) यथेच्छं निर्भयं कृत्वा विध्यन् [6]व्यथां नानुभवतीति ॥

खुल्ला सारिआ व्व कवड्डिआ व्व मुठ्ठीइ [7]गहिअओमुक्का ।
उण्हत्तेण जाणिज्जइ पुंजणिहित्ता अइट्ठा वि ॥८१॥

सूक्ष्मा सारिका वा कपर्दिका वा मुष्ट्या गृहीतावमुक्ता ।
उष्णत्वेन ज्ञायते पुञ्जनिक्षिप्ताऽदृष्टाऽपि ॥

सूक्ष्मा सारिका वराटिका [8]वा मुष्ट्या गृहीता [9]च्युता, उष्णत्वेन समूहनिक्षिप्ताऽदृष्टाऽपि ज्ञायत इति स्पष्टार्था गाथा, एवंविधानां प्रयोगाणामुपलक्षणार्था[10]चेति । [11]सारिका सारापीडसंबन्धिनी । [12]वराटिका कपर्दिका ॥

पाअरसगब्भणाराअतुलणजुत्तीइ कुणह दव्वाण ।
थोअबहुत्तं सव्वाअरेण जणरंजणसमत्थं ॥८२॥

---

१ धूपं– क. ख. । २ कऊण– क. ख. । ३ श्रवणाशीर्षक– क. ख. । ४ कीरेष्टक ?। ५ प्रथममेवाचिरं– क.ख. । ६ व्यथा– क.ख. । ७ गहिआए– क. ख. । ८ कपर्दिका– क. ख. । ९ श्च्युता– क.ख. । १० र्थेति– क. ख. । ११ चारिका–क. ख । १२ वराटिका: कपर्दिका:– क. ख. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

[1]पारतसगर्भनाराचतुलनयुक्त्या कुरुत द्रव्याणाम् ।
स्तोकबहुत्वं सर्वादरेण जनरञ्जनसमर्थम् ॥

[2]अशिरस्कनाराचस्यान्तर्निहितपारदस्य तुलने या युक्तिर्हस्तलाघवं तया यथाप्रतिभासं द्रव्याणां स्तोकत्वं बहुत्वं वा कुरुतेति ॥शिष्टं स्पष्टम् ॥

कुणह हरदइअदलरसणिण्णासिअरूवसूअकअलेवे ।
घसिऊण णिआवअवे सूरं कलहोअपडिरूबम् ॥८३॥

कुरुत हरदयितदलरसनिर्णाशितरूपसूतकृतलेपे ।
घृष्ट्वा निजावयवे [3]सूर्यं कलधौतप्रतिरूपम् ॥

[4]हरदयितो धत्तूरस्तत्पत्ररसेन नाशितरूपं यत् सूतं पारदं तेन कृतलेपे स्वाङ्गे [3]सूर्यं ताम्रं निघृष्य कलधौतप्रतिरूपं रूप्यसमं कुरुतेति ॥

कोसम्बितेल्लविरइअदीवसिहा [5]रअणदीबअसिहेव्व ।
चालेउंपि ण तीरइ परुसेणावि पवणणिवहेण ॥८४॥

कौशाम्बीतैलविरचितदीपशिखा रत्नदीपकशिखेव ।
चालयितुमपि नशक्यते परुषेणापि पवननिवहेन ॥

कौशाम्बी कोशातकी, तद्बीजतैलेन कृतसेकाया वर्त्तेरुद्गता या दीपशिखा दीपज्वाला सा रत्नदीपशिखावद् वायुनापि कम्पयितुमशक्या भवतीति ॥

मअणंजणगुलिआरइअलोअणं रूबअं रुअंतंव ।
वाप्फोहखालिअकओलं दीसइ पुरधूवछिव्वन्तं ॥८५॥

मदनाञ्जनगुलिकारचितलोचनं रूपकं रुददिव ।
बाष्पौघक्षालितकपोलं दृश्यते पुरधूपस्पृश्यमानम् ॥

सिक्थकाञ्जनाभ्यां कृतया गुलिकया निर्मितनेत्रं यत्किञ्चिद् रूपकं देवताकारादि तद् गुग्गुलुधूमस्पृश्यमानं रुददिव बाष्पाधौतगण्डस्थलं दृश्यत इति ॥

धवलसिचअम्मि लिहिअं रूवं सुरवच्छकुसुमसलिलेण ।
सुक्खम्मि णलक्खिज्जइ लक्खिज्जइ सलिलकल्लविए ॥८६॥

---

१ पातर- क. ख. । २ अशिरस्य- क. ख. । ३ शुल्वमिति पाठान्तरम् । ४ हरदयितं धत्तूरम- क. ख. ।
५ रदण- क. ख ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सुरवृक्षः [1]पारिभद्रकाख्यो [2]निम्बाद्रन्यो वृक्षविशेषः। तस्य पुष्परसेन यत्किञ्चिद् रूपं सितवस्त्रे लिखितं भवति तत् तस्मिन् शुष्के न दृश्यते, जलमध्यनिक्षिप्ते तु दृश्यत इति।

कउहफलभूइगालिअसुतत्तजलमज्झविणिहित्ता दवइ ।
लक्खा [3]ताइ विलित्तं चित्तं ण हु पूव्वइ जलेण ॥८७॥

ककुभफलभूतिगालितसुतप्तजलमध्यनिहिता द्रवति ।
लाक्षा, तया विलिप्तं चित्रं न खलु वाध्यते जलेन ॥

ककुभोऽर्जुनवृक्षः। तत्फलानि दग्ध्वा कृता या भूतिर्भस्म [4]तया मिश्रितं ततो गालितं वस्त्रादिनाऽपनीतभस्मीकृतपङ्कं यत् सुतप्तं जलं तन्मध्यनिक्षिप्ता लाक्षा विलीयते। तया विलिप्तमालेख्यं जलेन प्रक्षाल्यमानं न नश्यतीति ॥८७॥

तेल्लोल्लालत्तअसुत्तवलइअतेल्लब्भत्तए ।
साहेह खराणलम्मि खीरिणीं कंसअपत्तए ॥
सुत्तं सह जावएण तत्थ ण[5]डहिज्जइ [6]चुज्जं ।
पिलिहोअरकामलाण भंजइ खीरिणी दप्पं ॥८८॥

तैलाद्रीलक्तकसूत्रवलयिततैलाभ्यक्ते ।
साधयत खरानले क्षीरिणीं कांस्यपात्रे ॥
सूत्रं सह [7]यावकेन तत्र न दह्यत आश्चर्यम् ।
प्लीहोदरकामलानां भिनत्ति क्षीरिणी दर्पम् ।

तैलार्द्रं यदलक्तकलिप्तं सूत्रं तेन वलयितं समन्ताद् वलितं (वेष्टितं) तैलाभ्यक्तं च यत् कांस्यपात्रं तत्र तीक्ष्णाग्नौ [8]निक्षिप्य क्षीरिणीं साधयत। तस्यां साध्यमानायां तत्सूत्रं न दह्यते। सा च क्षीरिणी सिद्धोपयुक्ता सती प्लीहोदरस्य कामलायाश्च दर्पं नाशयतीति[9] ॥८८॥

लक्खारसपरिभाविअतेल्लण्डअवीअचुण्णसंजुत्तं ॥
जुत्तीइ होइ सलिलं ससससिसुपिसिअछविसारिच्छं ॥८९॥

लाक्षारसपरिभावितकोकिलाक्षवीजचूर्णसंयुक्तम् ।
युक्त्या भवति सलिलं शशशिशुपिसितच्छविसदृशम् ॥

---

१ पारिभद्रको- क. ख. । २ निम्बाख्य इति पाठान्तरम् । ३ तीग्र- क । ४ तेन- क. ख. । ५ उइज्जइ-क.ख. ६ अज्जाअं-क., आशुच्यम्-ख. । ७ पावकेन- ख. । ८ निक्षिप्ते- क. ख. । ९ एतदनन्तरं 'युगल(क)म्' इत्यधिकः पाठः ख. पुस्तके ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

लाक्षारसेन [१]शोषितचूर्णीकृतेन मिश्रितं यत् तेल्लंढकस्य कोकिलाक्षस्य वीजानां चूर्णं तेन संयुक्तं जलमतिलौहित्यं घनत्वं च गच्छतीत्युपमा(ना)र्थ इति ॥

एएणविअ चुण्णेण भाविआ वअणविवरअविणिहित्ता ।
गुलिआ जणेइ जणजणिअविम्हअं [२]सोणिउप्पीडं ॥६०॥

एतेनैव चूर्णेन भाविता वदनविवरविनिहिता ।
गुलिका जनयति जनजनितविस्मयां शोणितोत्पीडाम् ॥

एतेनैव समनन्तरोक्तेन द्रव्यद्वयसाधितेन चूर्णेन सम्पादिता गुलिकाऽऽस्यनिक्षिप्ता सती सर्वमास्यनिस्यन्दं लोहितीकरोतीति । रुधिरोत्पीडां जनयतीत्युक्तमतएव विस्मयजनकत्वमिति ॥

पुणरुत्तरुहिरोल्लिअसोसिअसिन्धुत्थचुण्णणिम्मविआ ॥
मुहकुहरम्मि णिहित्ता गुलिआ रुहिरं वमावेइ ॥६१॥

पुनरुक्तरुधिरार्द्रीकृतशोषितसिन्धूत्थचूर्णनिर्मिता ।
मुखकुहरे निहिता गुलिका रुधिरं वामयति ॥

भूयो भूयो येनकेनचित् पश्वादिसम्बन्धिना रुधिरेणार्द्रीकृतं पुनः पुनश्च शोषितं यत् सैन्धवलवणचूर्णं तेन निर्मिता गुलिकाऽऽस्याभ्यन्तरनिक्षिप्ता पूर्ववन्निस्यन्दं लोहितं करोतीति शोणितं स्रावयतीत्युक्तम् ॥

जीहाहिट्ठपरिट्ठिअसाहोडअपण्णछिण्णमम्मस्स ॥
छाअस्स विण्हिअस्स व वच्चइ [३]जममंदिरं जीओ ॥६२॥

जिह्वाधःपरिस्थितशाखोटकपर्णछिन्नमर्मस्य ।
छागस्य वृष्णिकस्य वा व्रजति [४]यममन्दिरं जीवः ।

शाखोटकाख्योवृक्षः [५]पूतिकाष्ठ इति प्रसिद्धः । तस्य पत्रेण [६]जिह्वाधस्तलस्थापितेन छिन्नं विदारितं तद्वर्त्ति [७]मर्म जीवस्थानं यस्य तथाविधस्याजस्योरभ्रस्य वा जीवोत्सादो भवति, म्रियत इत्यर्थः ॥

[८]णिहिआ मुहुत्तमेत्तं पुरीसमग्गन्तरम्मि जुत्तीइ ॥
छाअस्स हिङ्गुगुलिआ णासेइ ससोणिअं जीअं ॥६३॥

[९]निहिता मुहूर्तमात्रं पुरीषमार्गान्तरे युक्त्या ।
छागस्य हिङ्गुगुलिका नाशयति सशोणितं जीवम् ॥

---

१ शोषितेन– क. ख. । २ सोणितप्पीलं–क. ख. । ३ जममंदिरे– क. ख. । ४ यममन्दिरे– क. ख. । ५ प्रतिकाष्ठ– क. ख. । ६ जिह्वातलस्थापितेन– क. ख. । ७ मर्मस्थानं जीवं– क. ख. । ८ णिमिश्रा– क. ख. । ९ निर्मिता– क. ख. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

निहिता[1] निक्षिप्ता, मुहूर्तमात्रं-घटिकाद्वयमात्रम्। शिष्टो गाथार्थः स्पष्टः॥

अद्धन्तरइअमेरम्मि भाअणे साउसलिलसम्पुण्णे॥
पाडिज्जइ सोहग्गं अद्धम्मि जहिं जणो भणइ॥
[2]सुरदालिलित्तकरकोडिधुवणविहिणा जणस्स दिज्जन्तं॥
चुलुएहि थोहथोहं तत्तो तित्तं जलं पाउं॥
इअरद्धसंठिअं पि हु सलिलं सविसेसरइअदव्वेहि॥
करसाहन्तरदिण्णं [3]पअइत्थं विम्हअं कुणइ॥६४-६६॥

अर्धान्तरचितमर्यादे भाजने स्वादुसलिलसम्पूर्णे।
पात्यते दौर्भाग्यमर्धे यस्मिञ्जनो भणति॥
सुरतालिलिप्तकरकोटिधावनविधिना जनस्य दीयमानम्॥
चुलुकैः स्तोकस्तोकं ततस्तिक्तं जलं पातुम्॥
इतरार्धसंस्थितमपिखलु सलिलं सविशेषरचितद्रव्यैः[4]।
करशाखान्तरदत्तं प्रकृतिस्थं विस्मयं कुरुते॥

इदमत्र तात्पर्यम्-[5]मिष्टजलभरितं पात्रं कृत्वा तस्यार्धान्ते मध्ये मर्यादा विभागरेखा दीयते, उच्यते च-[6]किमर्धमितस्तिक्तं करोमि। ततो यत्र जनो भणति तत्रार्धे दौर्भाग्यं तिक्तत्वं पात्यते। कथं- देवताल्या ओषधिविशेषस्य रसेन लिप्तानामङ्गुलीनां प्रान्तैर्मार्जनविधिनाऽलक्षितेन प्रकारेण जनस्याल्पैश्चुलुकैः पातुं दीयमानं जलं तिक्तं भवति। यदा त्वतिक्तभागाज्जलं दीयते तदाऽङ्गुलिविवरमार्गेण चुलुकानि देयानि, तेनाङ्गुल्यग्रगतौषधिरसस्पर्शपरिहारात् प्रकृतिस्थमविकृतमेव जलं भवेत् तज्जनस्य विस्मयं करोतीति॥तिलकम्॥

सालूरवसावहिअ[7]मसिणजलोआइ लित्तहत्थस्स॥
फंसेण[8] [9]झत्ति जाअइ तुसारकणसीअलो अग्गी॥६७॥

सालूरवसावर्तितमसृणजलौकसा लिप्तहस्तस्य।
स्पर्शेन झगिति जायते तुषारकणशीतलोऽग्निः॥

सालूरो दर्दुरः। तस्य वसाग्रहणं प्रागुक्तम्। तया [10]पिष्टं यज्जलसर्पिणीचूर्णं तेन विलिप्तपाणेः। शिष्टं स्पष्टार्थम्॥

---

१ निर्मिता- क. ख.। २ सुरदारु-क. ख.। ३ पइअत्थं--क. ख.। ४ दन्तैः- क. ख.। ५ स (मृ) ष्टजलभरित- क. ख.। ६ किमर्धमत- क. ख.। ७ मसिअ- क. ख.। ८ हंसेण-क. ख.। ९ झत्ति जाएइ-क.ख.। १० पिष्टजलसर्पिणीबिलिप्तपाणिः- क. ख.।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कामिणिकुसुमुम्मोसिअखरजलसिद्धाइ दद्दुरवसाइ ॥
अब्भंगिअकरकमलो छिवइ कढन्ते वि घअतेल्ले ॥९८॥

कामिनीकुसुमोन्मिश्रितखरजलसिद्धया दर्दुरवसया ।
अभ्यक्तकरकमलः स्पृशति क्वथितान्यपि घृततैलानि ॥

कामिनी कदली (?), तत्कुसुमरसोन्मिश्रा यासौ खरजलेन रासभमूत्रेण साधिता सम्पादिता दर्दुरवसा मण्डूकस्नेहस्तया लिप्तहस्तः सुतप्तान्यपि घृततैलानि यथेच्छं स्पृशन्न दह्यत इति ॥

सालूरवसाभुप्पिअमआलिमूलं [1]विणिहिप्पइ जत्थ ॥
परिहरइ तत्थ जलणो महाणसे पअणकम्मविहिं ॥९९॥

सालूरवसाभ्यक्तमयालिमूलं निक्षिप्यते यत्र ।
परिहरति तत्र ज्वलनो महानसे पचनकर्मविधिम् ॥

सालूरवसा प्रागुक्ता, तयाऽभ्यक्तं मयाल्याः पोतिकाया मूलं यत्र पचनस्थाने निक्षिप्यते तत्राग्निः स्वकार्यकरणासमर्थो भवतीत्यर्थः ॥

तम्बाघअसंजोइअतेल्लंडअबीजचुण्णलित्तेहि ॥
[2]मीणोव्व जले विअरइ णासासुइणअणवअणेहि ॥१००॥

ताम्राघृतसंयोजितकोकिलाद्वबीजचूर्णलिप्तैः ।
मीन इव जले विचरति नासाश्रुतिनयनवदनैः ॥

ताम्रा गौः । तद्घृतेन संयोजितं यत् कोकिलाद्वबीजचूर्णं तेन लिप्तैरभ्यक्तैर्घ्राणश्रवणनेत्रास्यैर्जले त्रुडितः सन मीनवद् यथारुचि विचरतीति ॥

डिंडुहरअणेण मुहट्ठिएण जलणिहिजलम्मि णिणिओओ ॥
वरभवणब्भन्तरसंठिओव्व[3] णकिलिम्मइ कआइ ॥१०१॥

जलसर्परत्नेन मुखस्थितेन जलनिधिजले निब्रूडितः ।
वरभवनाभ्यन्तरसंस्थित इव न क्लाम्यति कदाचित् ॥

डिंडुहो (डुण्डुभो?) जलचरः सर्पविशेषः । तत्सम्बन्धिना रत्नेन मणिना, रदनेन दन्तेन वेति केचित् । आस्यान्तरस्थितेनाब्धितोये निमग्नः पुरुषो रमणीयगृहान्तरस्थित इव तज्जलेन नकदाचित् क्लममनुभवतीति ।

---

१ णिहप्पए- क. ख. । २ मीणव्व- क. ख. । ३ संठिउव्व- क. ख. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अइकसणभसणकामिणिणवणीअब्भङ्गिएहि पाएहि ॥
भमइ जलोबरि अइरं करहाइणपाउआरूढो ॥१०२॥

अतिकृष्णभषणकामिनीनवनीताभ्यक्ताभ्यां पादाभ्याम् ।
भ्रमति जलस्योपरि चिरं करभाजिनपादुकारूढः ॥

अतिकृष्णा याऽसौ भषणकामिनी श्वस्त्री शुनी तदीयनवनीतेन लिप्तचरण [1]उष्ट्रचर्मरचितपादुकारूढः स्थलवज्जले भ्रमतीति ॥

अलिअणिवेसिअचित्तो उत्ताणो दढणिरुद्धणिस्सासो ॥
सरलविमुक्कावअवो सलिलोवरि तरइ णावव्व ॥१०३॥

[2]अलिकनिवेशितचित्त उत्तानो दृढनिरुद्धनिश्वासः ।
सरलविमुक्तावयवः सलिलस्योपरि तरति नौवत् ॥

अलिके ललाटे भ्रूमध्ये, अवस्तुनि शून्ये वा निवेशितचित्तो निविडस्तम्भितश्वासः पृष्ठत्यक्तसर्वाङ्गः पुरुषो जलस्योपर्यन्त्रूडित एव नौर्यथा तरतीति ॥

पारअसगब्भसुघडिअछाअणअं[3] धूवदहणअमगरुअं ॥
लोहमअं दित्तङ्गारपूरिअं वाइ गअणम्मि ॥१०४॥

पारदसगर्भसुघटिताच्छादनकं धूपदहनकमगुरुकम् ।
लोहमयं दीप्ताङ्गारपूरितं तिष्ठति गगने ॥

इदमत्र तात्पर्यम्- शस्त्रमयं धूमदहनपात्रं संपुटं कारयेत्। तस्योपरितनमाच्छादनमन्तर्निहितपारदं सुघटितं कारयित्वाऽधस्तनं[4]पात्रं दीप्ताग्निपूरितं कृत्वा स्थाप्यमानं निराधारमास्त इति ॥

भिण्डुअवीअमीसिअजवसहिअतिले जलम्मि होमंते ॥
कस्स ण कीरइ चुज्जं तडतडसद्दे समुट्ठन्ते ॥१०५॥

झिण्टुकवीजमिश्रितयवसहिततिले जले हूयमाने ।
कस्य न क्रियत आश्चर्यं तडतडिति शब्दे समुत्तिष्ठति ॥

[5]गोपालकवीजयुक्ते यवसहिते च तिले पानीयमध्ये हूयमाने यस्तडतडिति शब्द उत्तिष्ठति तस्मिन् सति कस्याश्चर्यं न क्रियत इति ॥

१ उष्ट्रचरणरचित- क. ख. । २ अलक- क. ख., अलीक इति पाठेऽवस्तुनि शून्ये इति व्याख्यायते ।
३ च्छादणअं- क. ख. । ४ अधरं पात्रमित्यपि पाठः । ५ गोपालपीठक ?

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

आदीविऊण विहिणा ववगअजालं अ णिव्वपाऊण[1] ॥
[2]कप्पासतूलपुंजअमहवा कट्टिअअ[3]फुप्फंतं ॥ ॥
वामकरतंसपरिअंतस्सोवरि दीअगहिअसेलेण ॥
जा ताअइ सत्थं ता तत्थ सिही समुत्थेहि ॥१०६-७॥

आदीप्य विधिना व्यपगतज्वालं च शमयित्वा ।
कार्पासतूलपुञ्जकमथवा [4]कट्टिपकापुष्पाग्रन्त ॥
[5]वामकरत्र्यस्र (?) वर्तितस्योपरि द्वितीयगृहीतशैलेन ॥
यावत् ताड्यते शस्त्रं तावत् तत्र शिखी समुत्तिष्ठति ॥

गाथाद्वयस्येदं तात्पर्यम्—कार्पासपिच्छं युक्त्या ज्वालयित्वाऽसमग्रदग्धमेव व्यपगतज्वालत्वेन निर्वाप्यते। वामकरे तिर्यग्[6]वृत्तांतस्य कार्पासतूलस्योपरि शस्त्रं द्वितीयकरधृतेन शैलेन पाषाणेन यावदाहन्यते तावत् तत्र शस्त्रेऽग्निः समुत्तिष्ठति। अथवा कटिपकस्य वस्त्रविशेषस्य [7]पुष्पान्तं दशां दग्ध्वा पूर्ववदग्नि[8]रुत्पाद्यते इतियुगलकम् ॥

जुत्तीइ जलणकुण्डे दाऊण घअं ससमिहकप्पासं ॥
गूढणलिआसणाहे [9]पच्छा होमो करेअव्वो ॥ ॥
संजोइऊण रालाचुण्णं घेत्तूण[10] वेणुणालम्मि ॥
जा फूवेइ पईवं णलिआदारत्थमण्णत्तो ॥ ॥
ता झत्ति पज्जलन्तो दीसइ कुंडम्मि [11]वड्ढिअच्छाओ ॥
जणजणिअकोऊहलो सिहासहस्साउलो जलणो ॥१०८-१०॥

युक्त्या ज्वलनकुण्डे दत्त्वा घृतं ससमित्कार्पासम् ।
गूढनलिकासनाथे पश्चाद् होमः प्रकर्त्तव्यः ॥
संयोज्य रालाचूर्णं गृहीत्वा वेणुनाले ।
यावत् फूत्करोति प्रदीपं नालिकाद्वारस्थमन्यतः ॥
तावज्झगिति प्रज्वलन् दृश्यते कुण्डे वर्द्धितच्छायः ।
जनजनितकौतूहलः शिखासहस्राकुलो ज्वलनः ॥

१ विज्झऊण– क. ख. । २ कप्पासऊल– क. ख. । ३ फुप्पन्तं– क. ख. । ४ कट्टिअका– क. ख. । ५ वामकरतिर्यग्ध्रियमाणस्योपरि– क. ख. । ६ धृतान्तस्य ?। ७ पुच्छान्तं ?। ८ रुत्पद्यते– क. ख. । ९ पश्चा– क. ख. । १० घेतूण– क. ख. । ११ वड्ढिअ– क. ख. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

इदमत्र गाथात्रयीयं तात्पर्यम्— ज्वलनकुण्डे होमाधारे युक्त्याऽलक्षितेन प्रकारेण समिद्भिः कार्पासेन सहितं घृतं दत्त्वा। आदावेव समिधं दत्त्वा तदुपरि व्यतिरिक्ता घृताभ्यक्ता इन्धनिकास्तासामुपरि सघृतः कार्पासो देय इति दानयुक्तिः। एवं घृतादिकं दत्त्वा पश्चात् तावत् कुण्डे गूढनिक्षिप्तसुषिरनालिके होमः कर्त्तव्यः। यासौ तत्र नाड़ी क्षिप्यते सा कुण्डे योन्यन्तर्गता बहिर्विवृतमुखी क्रियते। ततश्च यावत् पूजोपकरणव्यपदेशेन नाडीद्वारस्थं दीपं होमकर्ता फूत्करोति नाड्यन्तः संयोजितसर्जरसचूर्णप्रज्वा[१]लनाय दीपशिखामन्तः प्रवेशयति तावत् तेन चूर्णेन ज्वलता कुण्डान्तःस्थितकार्पासेन्धनानि ज्वलन्ति। तेषु ज्वलत्सु स्नेहकार्पाससंयोगाद् वर्द्धितकान्तिर्झगिति ज्वलन्नग्निर्दृश्यते। वलँश्च सन्निहितो [२]भवन्निन्धनेऽनग्निज्वलनभ्रान्तस्य जनस्याश्चर्यं जनयतीति॥तिलकम्॥

जोणिकुहरम्मि वसिअं उदुसमए महिलाण सत्ताहं ॥
जलणणिहित्तं दंसेइ सौवीरअंजणं पुरिसं ॥१११॥

योनिकुहर उषितमृतुसमये महिलानां सप्ताहम् ।
ज्वलननिक्षिप्तं[३] दर्शयति सौवीरकाञ्जनं पुरुषम् ॥

सौवीरकाञ्जनं कर्तृ, अग्निमध्यनिक्षिप्तं सत् तत्र पुरुषं दर्शयति पुरुषाकृति प्रकटीकरोति, कीदृशम्- सप्ताहानि स्त्रीणामृतुसमये पुष्पकाले वराङ्गस्थापितम् । ऋतोः सप्ताहस्यासम्भवाद् द्वयोस्तिसृणां वा महिलानां योनावुषितं कार्यम्। केचित्तु स्त्रीणां स्वाभाविकस्यार्तवस्य षोडशरात्रिविपरिणामत्वस्मृतेरेकस्या एवर्तुमत्या वराङ्गे सप्ताहं स्थापनं व्याचक्षते ॥

अहिरिउहुआसलिहिआ पडिमा विमलब्भअपडलमज्झम्मि ॥
कुंडम्मि संमुहणिहिआ[४] लक्खिज्जइ [५]जलणजालेव्व ॥११२॥

अहिरिपुहुताशलिखिता प्रतिमा विमलाभ्रकपटलमध्ये ।
कुण्डे संमुखनिहिता लक्ष्यते ज्वलनज्वालेव ॥

अहिरिपोर्मयूरस्य हुताशेन पित्तेन विमले निर्मलेऽभ्रकपत्रे लिखिता देवादिप्रतिमाऽग्निकुण्ड[६]सांमुख्येन स्थापिता ज्वलनमध्ये ज्वालेव स्फुटं लक्ष्यते यथा ज्वाला स्फुटं लक्ष्यते तथा सापीति ॥

जलचरविहंगपुच्छग्गवद्धसिहिदीविआउरअणीइ ॥
दीसंति नभद्धपहे उक्काओव्व संचरन्तीओ ॥११३॥

जलचरविहङ्गपुच्छाग्रबद्धशिखिदीपिका रजन्याम् ।
दृश्यन्ते नभोऽर्धपथे उल्का इव सञ्चरन्त्यः ॥

स्पष्टार्था गाथा। जलचरग्रहणं रात्रौ गतिमत्त्वात् ॥

---

१ प्रज्वलनाय- क. ख. । २ पदमिदं नातिस्पष्टं क. ख. पुस्तकयोः । ३ निहितं- क. ख. । ४ णिमित्रा क. ख. । ५ जलणजाअव्वं- क. ख, । ६ संमुखेन- क. ख. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तम्बअपत्तणिहित्त[1] वीअपूरअवीअतेल्लमज्झम्मि ॥
घम्मट्ठिअम्मि दीसइ मज्झण्हदिनअरो सरहो ॥११४॥

ताम्रपात्रकनिहितवीजपूरकवीजतैलमध्ये ।
घर्मस्थिते दृश्यते मध्याह्ने दिनकरः सरथः ॥

ताम्रपात्रे [2]सन्निहितं यन्मातुलुङ्गबीजतैलं तन्मध्ये, निदाघे मध्याह्नसमये प्रतिबिम्बितः सूर्यः सरथो दृश्यत इत्यतिशयोक्तिः। तात्पर्यन्तु सुदीप्तोऽपि तत्र प्रतिबिम्बितः सुखतरालोक्यो भवतीति ॥

पूसे मुनितरुकुसुमरसघट्टविवरंजणंजिअच्छिजुओ ॥
मज्झण्हट्ठिअ पेच्छइ गअणे गहमंडलमसेसं ॥११५॥

पुष्ये मुनितरुकुसुमरसघृष्टविवराञ्जनाञ्जिताक्षियुगः ।
मध्याह्न एव प्रेक्षते गगने गृहमण्डलमशेषम् ॥

मुनितरुरगस्त्यवृक्षः। तस्य पुष्परसेन घृष्टं यद् विवराञ्जनं स्रोतोञ्जनं तेनाञ्जितं नेत्रयुग्मं यस्य स तथाविधः पुरुषो मध्याह्नकाल एव व्योम्नि तारकावृन्दं समग्रं पश्यति। मन्दातपे तु काले सुतरां पश्यतीति मध्याह्नग्रहणमिति ॥

वज्जाणलविहडिअवच्छदारुकअकीलओ विहग्गोव्व ॥
विम्हइअसअललोओ अच्छइ गअणे णिरालंबो ॥११६॥

वज्रानलविघटितवृक्षदारुकृतकीलको विहङ्ग इव ।
विस्मापितसकललोकस्तिष्ठति गगने निरालम्बः ॥

वज्रानलेन विद्युता विघटितो विदारितो यो वृक्षस्ततः कृतः कीलकः शङ्कुर्गगने निक्षिप्तः सन् तत्र कंचित् कालं निरालम्बः पक्षिवत् तिष्ठतीति। पाषाणाभिघातेन पुनः पततीति ॥

[3]जुवइजराकअधूअं चित्तं [4]चिन्ताउरं व भित्तीइ ॥
ता [5]रुवइ जा ण दिज्जइ तस्स पुरुप्पाइओ धूओ ॥११७॥

युवतिजराकृतधूपं चित्रं [6]चिन्तातुरमिव भित्तौ ॥
तावद् रोदिति यावत् नदीयते तस्य पुरोत्पादितो धूपः ॥

[7]पुरो गुग्गुलुः, जरा जरायुः शल्यं गर्भशल्यमिति। शिष्टं स्पष्टम् ॥

१ णिहित्ते- क. ख. । २ निहितं ?। ३ जुअइ- क. ख. । ४ चित्ताउरं- क. ख. । ५ रुअइ- क. ख. । ६ चित्रान्तरमिव- क. ख. । ७ पुरुर्गुग्गुलुः- क. ख. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सिसुमारमलविलेविअदाहिणकरकमलमुट्ठिबन्धेण ॥
अवहरइ [1]चित्तकम्मं पअडेइ पुणो विमुक्केण ॥११८॥

शिशुमारमलविलेपितदक्षिणकरकमलमुष्टिबन्धेन ।
अपहरति चित्रकर्म प्रकटयति पुनर्विमुक्तेन ॥

शिशुमारो मत्स्यविशेषस्तस्य मलेन पुरीषेण लिप्तदक्षिणहस्तकृतमुष्टिबन्धेन पुरुषो भित्तिगतं चित्रमपहरति, तत्र तन्न दृश्यत इत्यर्थः । प्रमुक्तेन मुष्टिबन्धेन पुनस्तच्चित्रं प्रकाशयतीति ॥

छुच्छुन्दरिविसमअणफलकणअकणवीरकुंभिआधूओ ॥
णच्चावेइ सचुज्जं चित्तं हरिआलसंजुत्तो ॥११९॥

छुच्छुन्दरीविषमदनफलकनककरवीरकुम्भिकाधूपः ।
नर्त्तयति साश्चर्यं चित्रं हरितालसंयुक्तः ॥

छुच्छुन्दरी सुगन्धमूषिका, विषं प्रसिद्धं, कनकं धुत्तूरं, करवीरो हयमारः, कुम्भिका स्थलजा ग्राह्या । एतैर्धूपो हरितालसहितश्चित्रं नर्तयति । हरितालेन सहितं चित्रं नर्त्तयतीति हरितालसंयुक्तमिति चित्रविशेषणं केचित् पठन्तीति ॥

[2]कणकमठचिण्ण[3]परिणअहरिआलविलित्तकरअलो[4]झत्ति ॥
मुट्ठिबन्धेण णआण [5]मण्डणमवहरइ रङ्गम्मि ॥१२०॥

कणकमठचीर्णपरिणतहरितालविलिप्तकरतलो झगिति ।
मुष्टिबन्धेन नटानां [6]मण्डनमपहरति रङ्गे ॥

कणकमठः स्थूलकूर्मः । तेन चीर्णं भुक्तं सत् परिणतं शकृद्भूतं यद् हरितालं तेन [7]लिप्तहस्तो मुष्टिबन्धेन रङ्गगतानां नर्तकानां मण्डनमपहरति प्रसाधनमदृश्यं करोतीति ॥

परित्तणुअविअडविमले अब्भए विविहवण्णएहि [8]लिहिअं ॥
तेल्लपडहच्छलहुमुहभाण्डअमुहसंठिअं[9] विहिणा ॥ ॥
ठविअं [10]घरविवरगअसूरमऊहणिवहछिप्पन्तं ॥
जणजणिअगरुअचुज्जं दीसइ गअणम्मि आलेक्खं ॥१२१–२२॥

---

१ चित्तअम्मं–क. ख. । २ कणअमठ–क. ख. । ३ वरिणअ–क. ख. । ४. मण्डणं हरइ–क. ख. । ५ करतले–क, ख. । ६ मण्डनं हरति–क, ख. । ७ लिप्तहस्ते–क. ख. । ८ वण्णअलिहिअं–क. ख. । ९ संठिअं–क. ख. । १० घरविवर–क. ख. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

परितनुकविकटविमलेऽभ्रके विविधवर्णकैर्लिखितम् ।
तैलपरिपूर्णलघुमुखभाण्डमुखसंस्थितं विधिना ॥
स्थापितं गृहविवरगतसूर्यमयूखस्पृश्यमानम् ।
जनजनितगुर्वाश्चर्यं दृश्यते गगन आलेख्यम् ॥

गाथाद्वयस्येदं तात्पर्यम्- अतितनुकं विस्तीर्णं विमलं च यदभ्रकपटलं तत्र सिन्दूरादिवर्ण-(क)लिखितमालेख्यम् । तैलेन प्रतिपूर्णस्य स्वल्पमुखस्य भाण्डस्य मुखे विधिना गगनसंमुखं चित्ररूपेणा[१]भ्रकसंलग्नभाण्डस्थिते तैलरूपेण च प्रकारेणास्थापितं सद् गृहाच्छिद्रप्रविष्टरविर श्मिस्पृश्यमानमाकाशे दृश्यत इति । अत एवाश्चर्यजनकत्वमस्येति ॥ युगलकम् ॥

जंवेअ विअडविमले [२]आदस्सए विणिहिअं जहिच्छाइ ॥
रूवं[३] सिहण्डिपित्ते मनोहरावअवकअसोहं ॥
घरमज्झट्ठि[४]अजलभरिअकुम्भणिपडिअ[५]रविप्पहालिद्धं[६] ॥
दीसइ दिणअरकरमग्गणिग्गअं तंवेअ णभम्मि ॥१२३-२४ ॥

यदेव विकटविमल आदर्शे विनिहितं यथेच्छया ।
रूपं शिखण्डिपित्ते मनोहरावयवकृतशोभम् ॥
गृहमध्यस्थितजलभरिअकुम्भनिपतित[७]रविप्रभास्पृष्टम् ॥
दृश्यते दिनकरकरमार्गनिर्गतं तदेव नभसि ॥

आदर्शे मयूरपित्तेन लिखितं यथेष्टं चित्रं गगने दृश्यते । कीदृशम्- गृहमध्यस्थित-वारिपूर्णपात्रप्रतिबिम्बितसूर्यकान्तिस्पृष्टं तदनु रविकिरणमार्गेणैव गृहाद् बहिर्निर्गतमिति गाथा-द्वयस्येदं तात्पर्यम् ॥

जो उद्देसो लिप्पइ सिहिसिहिणा द्प्पणस्य घम्मम्मि ॥
सो उद्देसो रविणो लक्खिज्जइ राहुगहिअव्व ॥१२५॥

य उद्देशो लिप्यते शिखिशिखिना दर्पणस्य घर्मे ।
स उद्देशो रवेर्लक्ष्यते राहुगृहीत इव ॥

गाथायास्तात्पर्यमिदम्- यो भाग आदर्शस्य शिखिशिखिना मयूरपित्तेन लिप्यते तत एव भागात् तत्प्रतिबिम्बितमर्कमण्डलं राहुग्रस्तवद् दृश्यत इति ॥

---

१ ऽभ्रकासंलग्न-क. ख. । २ अद्दाए-क. ख. । ३ रूअं-क. ख. । ४ ठिअ-क. ख. । ५ पडिअं-क. ख. । ६ रविप्पभालिद्धं-क. ख. । ७ निपतितं-क. ख. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

समचरणोद्धपरिट्ठिअसंघअभुअपुरिसकरअलविमुक्का ॥
विहिणा पच्छिज्जन्ती देइ जलं करिआ णालओ॥ १२६॥

समचरणोच्चपरिस्थितसंहतभुजपुरुषकरतलविमुक्ता ।
विधिना प्राथ्र्यमाना ददाति जलं [1]करका नालात् ॥

अस्या अपीदं तात्पर्यम्- समपादस्य या स्तब्धता [2]तयोपरिस्थितस्य संश्लिष्टबाहोः पुरुषस्य करतलयोर्जलार्थिभिः संमुखनालकत्वेन स्थापिता [1]करका नतिं कृत्वा दातृपुरुषेच्छां विनैव जलं ददाति । कीदृशी सती- वैदग्ध्येन विचित्रैः प्रार्थनावचनैर्विलम्बहेतुना प्राथ्र्यमाना 'भगवति [3]करके देहि जल'मित्यादिना याच्यमानेति ॥

ववगअजीओवि फुडं भल्लाअतेल्लब्भकिअसरीरो ॥
जीअइ जलम्मि णिहिओ सहसव्विअ मच्छणिउरुम्बो ॥१२७॥

व्यपगतजीमोपि स्फुटं भल्लातकतैलाभ्यक्तशरीरम् ।
जीवति जले निक्षिप्तं सहसैव मत्स्यनिकुरुम्बम् ॥

स्पष्टार्था गाथा । [4]भल्लातकतैलं तद्बीजसम्भवः स्नेहः । तद्ग्रहणयुक्तिर्मण्डूकतैलवदिति ।

[5]मच्छोअरसिहिभाविअमच्छंडअचुण्णमीसिए सलिले ।
सहसेव्व विप्फुरन्तो उप्पज्जइ मच्छसंघातो ॥१२८॥

मत्स्योदरशिखिभावितमत्स्यण्डकचूर्णमिश्रिते सलिले ।
सहसेव विस्फुरन्नुत्पद्यते मत्स्यसंघातः ॥

मत्स्योदरशिखी मत्स्यपित्तं तद्भावितं [6]यन्मत्स्यण्डकचूर्णं तन्मिश्रिते जले तत्कालमेव मत्स्या जायन्त इति ॥

णइसेवालसमुब्भवचुण्णुम्मीसम्मि माहिसे महिए ॥
आलोडिअम्मि जाअन्ति जाममत्तेण मण्डोआ ॥१२९॥

नदीशैवालसमुद्भवचूर्णोन्मिश्रे माहिषे मथिते ।
आलोडिते जायन्ते याममात्रेण मण्डूकाः ॥

नद्यादौ यच् शैवालं जलमलमण्डेति प्रसिद्धम् तद् गृहीत्वा शोषितं सत् चूर्णीक्रियते । तेन भावितं माहिषं मथितं घूर्णितं दधि, तयोरालोडितयोः प्रहरमात्रेण मण्डूका जायन्त इति ॥

---

१ करिका-क. ख. । २ तयातयोपरि-क. ख. । ३ करिके-क. ख. । ४ भल्लातकबीजतैलं-क. ख. । ५ मत्सोदर-क. ख. । ६ यन्मत्स्योदरचूर्णं-क. ख. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सिहिपित्तलित्तकरजुअलगाढगहिअट्ठिआइ खणमत्तं ॥
झत्ति विमुक्काइ [1]होन्ति विच्छुआ णिंवपत्ताइ ॥१३०॥

शिखिपित्तलिप्तकरयुगलगाढगृहीतस्थितानि क्षणमात्रम् ।
झगिति विमुक्तानि भवन्ति वृश्चिका निम्बपत्राणि ॥

निम्बपत्राण्येव वृश्चिकाः सम्पद्यन्ते इति सम्बन्धः । कीदृशि-शिखिनो मयूरस्य पित्तेन लिप्तं यत् करयुगलं तेन निबिडं कृत्वा गृहीतानि क्षणमात्रं च तत्रैव स्थितानि पश्चाद् मुक्तानि सन्तीति ॥

[2]अंकोल्लतेल्लभुप्पिअकरसंपुडखणणिरुद्धमुक्केहि ॥
णिग्गुण्ढीणिंबदलाण विच्छुआ होन्ति इक्केहि ॥१३१॥

अङ्कोलतैलाभ्यक्तकरसंपुटक्षणनिरुद्धमुक्तैः ।
निर्गुण्डीनिम्बदलानां वृश्चिका भवन्त्येकैः ॥

अङ्कोल [3]ईरकिल्लाख्यो वृक्षः । तत्फलबीजसम्भवेन तैलेनाभ्यक्तेन करयुगेन क्षणमात्रं निरुद्धैर्निपीड्य क्षणमात्रस्थापितैस्ततस्त्यक्तैर्निर्गुण्ड्या [4]भूतवेश्या ओषधिविशेषस्य निम्बस्य चैकतरैः पत्रैर्वृश्चिका भवन्ति । निर्गुण्डीपत्रैर्निम्बपत्रैर्वेति विकल्पो न समुच्चय इत्यर्थः॥

पवणावत्तुत्थिअगअणगहिअतरुपण्णकविलदाढाहि[5] ॥
भुंजइ पुरिसो दसपुरिसभोजणं कडिणिवद्धाहि ॥१३२॥

पवनावर्तोत्थितगगनगृहीततरुपर्णकपिलदंष्ट्राभ्याम् ।
भुङ्क्ते पुरुषो दशपुरुषभोजनं कटिनिबद्धाभ्याम् ॥

पवनस्यावर्त्तोऽज्जुनवात इति प्रसिद्ध ऊर्ध्वगतिर्धूलिमण्डलक्ष्यो गतिविशेषस्तेनोत्थितं चाकाशत एव गृहीतं यद् वृक्षस्य किञ्चित् पत्रं तथा कपिलस्य सूकरस्य दंष्ट्रा । केचित् तु कपिलं श्वानमाहुस्ताभ्यां कटिप्रदेशे ग्रथिताभ्यां पुरुषो दशानां (पुरुषाणां) पर्याप्तं भोजनं भुङ्क्त इति ॥

कलितरुपत्ताइ णिमन्तिओसि भणिऊण जा[6] घरोज्जन्ति[7] ॥
दाहिणचलणक्कन्तेहि तेहि [8]जेमिज्जइ जहिच्छं ॥१३३॥

कलितरुपत्राणि निमन्त्रितोसि भणित्वा यानि गृह्यन्ते ।
दक्षिणचरणाक्रान्तैस्तैर्जेम्यते यथेच्छम् ॥

१ हुन्ति-क. ख. । २ अकोल्ल-क. ख. । ३ इरकीलाख्यो-क. ख. ४ भूतकेश्या-क. ख. । ५ दाढाइं-क. ख. । ६ आ-क. ख. । ७ घरोयन्ति-क. ख. । ८ जिमिजइ-क. ख. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

रात्र्यारम्भे गत्वा कलितरोर्विभीतकस्य प्रातर्मया निमन्त्रितोऽसीत्युक्त्वा निशान्ते यानि पत्राणि गृह्यन्ते तैर्दक्षिणपादाक्रान्तैर्हेतुभूतैर्यथेच्छं यावद्रुचि जम्यते भुज्यते इति ॥

मसिभाअणविहिविरइअणलिआसंजुत्तकरविअं[1] विडलं[2] ॥
काऊण तत्थ कीरइ[3] मइरा सलिलं व जुत्तीइ ॥
ओमत्थिआइ[4] ता वि ण णीआइ तं णालअम्मि थइअम्मि ॥
ओमत्थिअं ण मुच्चइ कलअइ रिक्कं जणो जेण ॥
पच्छा समाहिवइअरपलंवपंगुरणमज्झणिम्मिआइ ॥
जा णालअं थइज्जइ मुहमारुअपूरिअं झत्ति ॥
ता पवणवसुत्तंभिअपढमणिवेसिअसुराइसंपुण्णो ॥
होइ समुप्पाइअगरुअविम्हओ सअललोअस्स ॥
सहसा संपुण्णो वि हु सिढिलिज्जन्तम्मि णालए कमसो ॥
मइराइएण वहुणा पूरिज्जइ मुहणिहित्तेण ॥
इअ करविआविहाणं सुसिलिट्ठं आअरेण कीरन्तं ॥
कणासुअसरिसाणवि जणेइ गरुअं चमक्कारं ॥१३४-१३६॥

मसीभाजनविधिविरचितनलिकासंयुक्तकरिकां विपुलाम् ।
कृत्वा तत्र[5] क्रियते मदिरा सलिलं वा युक्त्या ॥
अधोमुखीकृतायास्तस्या अपि न निर्याति तन्नालके स्थगिते ।
अधोमुखीकृतं न मुच्यते कलयति रिक्तं जनो येन ॥
पश्चात् समाधिव्यतिकरप्रलम्बपरिधानमध्यनिर्मितायाः ।
यावन्नालकं स्थग्यते मुखमारुतपूरितं झगिति ॥
तावत् पवनवशोत्तम्भितप्रथमनिवेशितसुरादिसंपूर्णः ।
भवति समुत्पादितगुरुविस्मया सकललोकस्य ॥
सहसा [6]संपूर्णोपि खलु खिलीक्रियमाणे नालके क्रमशः ।
मदिरादिकेन बहुना पूर्यते मुखनिक्षिप्तेन ॥
इति करिकाविधानं सुश्लिष्टमादरेण क्रियमाणम् ।
कर्णासुतसदृशानामपि जनयति गुरुकं चमत्कारम् ॥

१ करयिअं- क. ख. । २ विडलां- क. ख. । ३ हीरइ ?। ४ ता अवि- क. ख. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

⁷गाथाषट्केन करिकाविधानकुलकम् । तस्यायमर्थः- इति गाथापञ्चकोक्तेन क्रमेण सुश्लिष्टमलक्षितव्यवधानं बहुमानेन क्रियमाणं करिकाविधानं मूलदेवतुल्यानामपि विस्मयजनकं भवति । कथं क्रियमाणम्- प्रथमतस्तावत् मसीभाजनस्य विधानेन निर्माणप्रकारेण खर्वगम्भीरजलाधाररचनारूपेण मुखभागपरिघटितपरिमण्डलतरुपत्ररूपेण च रचितनलिकया ⁸ससुरया तदन्तः प्रविष्टयाऽङ्गुलमात्रव्यवहितं तलभागमस्पृशन्त्या कण्ठच्छिद्रे सुश्लिष्टया संयुक्तां करिकां विपुलां बृहतीं कृत्वा तस्यां मदिरा सलिलं वा यथेष्टं ⁹द्रवद्रव्यं युक्त्याऽर्धभागावस्थानरूपया¹⁰ क्रियते । एवं कृत्वा चिरं सा परीक्ष्यते । यावन्नालके धारानिर्गमनद्वारे स्थगिते सति तन्मदिरादि वस्त्वधोमुखीकृताया अपि तस्या न निर्गच्छति । अनन्तरं जनप्रत्यक्षं तद् द्रव्यमधोमुखीकरणेनापि ततो नमुच्यते ननिःसरति । येन हेतुना तां करिकां जनः शून्यां बुध्यते । एवं तां जनस्य शून्यत्वेन दर्शयित्वा तदन्तरं समाधानव्यपदेशेन प्रलम्बं भूमिसंलग्नं कृतं यत् प्रावरणं तस्य मध्येऽन्तःस्थापितायास्तस्या झगिति मुखपवनपूरितं यावन्नालकं विधीयते तावन् मुखपवनवशेनोत्तम्भितमुल्लोलितं यत् प्रथमनिवेशितमधोभागस्थितं सुरादि तेन संपूर्णोपरिभागवर्तिना भरिता सती सा करिका पूर्वं रिक्ता दृष्टाऽधुना तेन प्रयोगेण पूर्णा दृश्यमाना सर्वलोकस्य विस्मयजनिका भवति ।। विशेषविस्मयार्थविधिस्तस्यां प्रयुज्यते । सहसा पूर्वप्रयुक्तेन प्रयोगेण संपूर्णापि सती अलक्षितेन प्रकारेण शनैः शनैर्नालके शिथिलीक्रियमाणे निवृत्तत्वेनोपपद्यमाने उपर्यारूढं मदिराद्यधो गच्छति । उपरितनभागश्च शून्यो भवति। स भागः काष्ठद्वारनिवेशितेनान्येन मदिरादिना पूर्यते, ततश्च पूर्णायामप्यस्यां तत् केन तन्मदिराद्यन्तर्निविष्टमिति लोकस्याद्भुततरा प्रतीतिर्भवतीति षड्भिः कुलकम् ।। ।।

सिग्गुजडारसमअरंदमत्तपसुत्तइजलाण जुत्तीइ ॥
वारहपलाइ विहिणा कढिऊण तिहाअसेसाइ ॥
सिसिरम्मि तत्थ[1] फलमअक्कोलारुणहिममअंकपलमेक्कं ॥
हिप्पइ[2] कालाउरुकरिससालिपलसंजुअं मसिणं ॥
गुरुधण्णरासिमज्झम्मि मासं परिवसिअमुद्दधरिऊण ॥
पच्छा गुंजाफलसरिसाओ[3] कीरंति गुलिआओ ॥
अह ताण दोण्हि तिण्हि व पढमं निअत्तणो समासण्णो ॥
जह ण विकप्पेइ जणो तह धरणिअलम्मि थविऊण ॥
आणाविऊण दूराओ मट्टिअं करअलम्मि काऊण ॥
तत्थ णिहिप्पइ एक्का अलक्खिआ जोअधूलित्ति ॥
विहिणा जलकणणविआ मअणाहिं मट्टिआ विसंसन्ती ॥
विम्हअवशविअसिअलोअणस्स दंसिज्जइ जणस्स ॥

---

१ पलमेकं- क. ख. । २ विप्पइ- क. ख. । ३ सच्छहाओ- क. ख. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

इअ[1] मअणाहिविहाणं कीरंतमणाउलाइ बुद्धीइ ॥
हिअए [2]सुविअड्ढाणवि विम्हअजणणक्खमं होइ ॥१४०–४६॥

शिग्रुजटारसमकरन्दमत्तपशुपतिजलानां युक्त्या ।
द्वादश पलानि विधिना क्वाथयित्वा त्रिभागशेषाणि ॥
शिशिरे तत्र फलमदकोलारुणहिममृगाङ्कपलमेकम् ।
क्षिप्यते कालागुरुकर्ष[3]शालिपलसंयुतं मसृणम् ॥
गुरुधान्यराशिमध्ये मासं पर्युषितमुद्धृत्य ।
पश्चाद् गुन्जाफलसदृश्यः क्रियन्ते गुलिकाः ॥
अथ तासां द्वे तिस्रो वा प्रथमं निजात्मनः समासन्ने ।
यथा नविकल्पयति जनस्तथा धरणितले स्थापयित्वा ॥
आनाय्य दूरान्मृत्तिकां करतले कृत्वा ।
तत्र निक्षिप्यत एकाऽलक्षिता योगधूलिरिति ॥
विधिना जलार्द्रीकृता मृगनाभि मृत्तिका विशिष्यन्ती ।
विस्मयवशविकसितलोचनस्य दर्शयते जनस्य ॥
इति मृगनाभिविधानं क्रियमाणमनाकुलया बुद्ध्या ।
हृदये सुविदग्धानामपि विस्मयजननक्षमं भवति ॥

गाथासप्तकेन मृगनाभिविधानकुलकम् । तस्यायमर्थः— इत्यनेन गाथाषट्कोच्यमानेन प्रकारेणैकाग्रया बुद्ध्या संपाद्यमानं विशिष्टकस्तूरिकाविधानं सुविदग्धानामपि हृदये विस्मयोत्पादकं भवति । कथं संपाद्यमानम्—प्रथमं तावत सौभाञ्जनमूलक्वाथस्य माक्षिकस्य समदच्छागमूत्रस्य च युक्त्या मिश्रीकरणेन समभागतया द्वादशपलानि विधिना सम्यग्विधानेन क्वाथयित्वा त्रिभागशेषाणि चत्वारि पलानि ग्राह्याणि । शीतीभूते तस्मिन् फलं जातीफलं, मदः कस्तूरिका, कोलः कक्कोलः, अरुणं कुङ्कुमं, हिमं चन्दनं, मृगाङ्कः कर्पूरः, एषां षण्णां पलमेकं कृष्णागुरुकर्षेण [4]शालेर्जातकस्य च पलेन संयुक्तं सूक्ष्मपिष्टं क्षिप्यते । तत् सर्वमेवंविधं कृत्वा [5]श्रेष्ठभाण्डस्थं पृथुव्रीहिराशिमध्ये मासं पर्युषितं सत् तत उद्धृत्य पश्चाद् [6]रक्तिकापरिमाणास्ततो गुलिकाः कर्तव्याः । अथ तासां मध्याद् द्वे तिस्रो वा [7]जनैरलक्ष्यमाणाः कृत्वा स्वसंनिकर्षे [8]भूतले स्थापनीयाः । एवं कृत्वा कंचित् पुरुषं दूरान्मृत्तिकामानाय्य तां चात्मनो हस्ततले कृत्वा तन्मध्य एका पूर्वस्थापिता गुलिका योगधूलिव्यपदेशेनालक्षिततया क्षिप्यते । सा च विधिना वैदग्ध्येन सलिलार्द्रीकृता मृत्तिका मृद्यमानगुलिकायाः[9] सौरभवशेन कस्तूरिकां विशेषयन्ती ततोधिकसौरभा

१ इह– क. ख. । २ हिअएसुविअडढाण विलअ– क. ख. । ३·४ शालिजालकस्य– क. ख. । ५ श्रेष्ठतामुखं ख. । ६ रक्तिकापरिमाणभूता इति क्वचित् पाठः । ७ जनैरलक्ष्यमाणं– क. ख. । ८ भूभूततले– क. ख. । ९ गुलिकायां– क. ख. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

भवतीति विस्मितस्य लोकस्य दर्श्यते[1] इति ॥ सप्तभिः कुलकम् ॥

एसा[2] इक्कव्विअ सरअकरविअन्तम्मि विणिहिआ गुलिआ ॥
कुणइ पसरंतपरिमलमेलिअमुहलालिणिउरुम्बं ॥१४७॥

एषैकैव सरकक्करिकान्तरे विनिहिता गुलिका ।
करोति प्रसरत्परिमलमेलितमुखरालिनिकुरुम्बम् ॥

समनन्तरोक्तया आसवभाण्डविधिवासनप्रयोजनप्रयोजना स्पष्टार्था गाथा ॥

सुसिरसुपिहाणपीठअपाउअमज्झम्मि णिहअणिम्मिआइ ॥
काऊण विविहदव्वाइ जाइ जणविम्हअकराइ ॥
पच्छा पाउअदेहो [3]समाहिववएसजणिअजणमोहो ॥
देन्तो ताइ सगव्वं जणस्स कोऊहलं कुणइ ॥१४८-४९॥

सुषिरसुपिधानपीठकपादुकामध्ये निभृतनिर्मितानि ।
कृत्वा विविधद्रव्याणि यानि जनविस्मयकराणि ॥
पश्चात् प्रावृतदेहो समाधिव्यपदेशजनितजनमोहो
ददत् तानि सगर्वं जनस्य कौतूहलं कुरुते ॥

गाथायुगलस्यायमर्थः- सुषिरमन्तःशून्यं[4] सुपिधानं चालक्षितस्थगनमयं पीठकमासनं, पादुके च तथाविधे, एतयोर्मध्येऽन्तर्निभृतमलक्षितं कृत्वा निक्षिप्तानि तद्देशकालाद्यसंभवाज्जनविस्मयकराणि यानि द्रव्याणि तानि, समाधिव्याजेनोत्पादितलोकमतिविभ्रमः, ततः पीठकादेरलक्षितं कृत्वाऽऽकृष्य पुनः पीठकादि तथैव स्थगयित्वा वितरँल्लोकस्याश्चर्यमुत्पादयतीति युगलकम्॥

अम्बम्बाअअवीअऊराइ महुसित्थअथइअविंटाइ ॥
अच्छन्ति चिरं महुविणिहिआइ अविणट्ठरूवाइ ॥१५०॥

आम्राम्रातकवीजपूरकानि मधुसिक्थकस्थगितवृन्तानि ॥
तिष्ठन्ति चिरं मधुविनिहितान्यविनष्टरूपाणि ॥

आम्रं प्रसिद्धम्, आम्रातको वृक्षविशेषस्तत्फलं, बीजपूरं मातुलुङ्गम्, एतानि माक्षिकमध्ये स्थापितानि चिरकालमविनष्टरूपाणि भवन्ति। कीदृशानि सन्ति—माक्षिकसिक्थकाभ्यां मिश्रिताभ्यां पूरितानि वृन्तानि येषां तानि तथा ॥

---

१ दृश्यन्ते- क. ख. । २ इक्कं बिम्र- क. ख. । ३ समाधि- क. ख. । ४ सल्यं-क. सत्वं- ख. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

आमाइं घए पिक्काइ महुघए अणहविरंटसहिआइं ॥
अच्छन्ति अम्बआइं चिरकालं णिव्विआराइं ॥१५१॥

आमानि घृते पक्वानि मधुघृतेऽनघवृन्तसहितानि ।
तिष्ठन्त्याम्राणि चिरकालं निर्विकाराणि ॥

आमान्यप्राप्तरसानि घृते पक्वानि माक्षिकघृतयोर्मध्येऽक्षतनालानि स्थाप्यमानानि चूतफलानि चिरकालमविनष्टरूपाणि सन्त्यासत इति ॥

अणहमपरिणअमविमुक्कबन्धणं सगुडतेल्लविणिहित्तं ॥
अच्छइ णिवाअणिहिअं माअंदमपरिमिअं कालं ॥१५२॥

अनघमपरिणतमविमुक्तबन्धनं सगुडतैलविनिहितम् ।
तिष्ठति निवातनिहितं माकन्दमपरिमितं कालम् ॥

सगुडतिलतैलमध्ये निक्षिप्तमाम्रमपरिमितं कालं तिष्ठति न नश्यति । कीदृशं सन्निक्षिप्तम्—अनघम् अक्षतं लगुडलोष्ठादिनाऽनाहतम्, अपरिणतमपक्वं तथा सवृन्तं तथा निवातस्थापितं भाण्डस्थम् इति ॥

एएणव्विअ विहिणा अमलअपडुल्लमाउलुंगाइं ॥
अच्छन्ति सविंटाइं अ चिरआलमजाअदोसाइं ॥ ॥
मसिणोरहाणअपरिमज्जिआइं जणजणिअकोउहल्लाइं ॥
दंसेइ सिद्धवणदेवआव्व णाणाविहफलाइं ॥१५३–५४॥

एतेनैव विधिनाऽऽमलकपटोलमातुलुङ्गानि ।
तिष्ठन्ति सवृन्तानि च चिरकालमजातदोषाणि ॥
मसृणमसूरकपरिमार्जितानि जनजनितकौतूहलानि ॥
दर्शयति सिद्धवनदेवतेव नानाविधफलाइं ॥

आमलकादीन्युक्तान्यन्यान्यप्यनुक्तानि नानाविधानि समनन्तरगाथोक्तेनैव विधानेन स्थाप्यमानानि बहुकालमविनष्टान्येव तिष्ठन्ति । तानि च विदग्धः सूक्ष्ममसूरचूर्णनिघृष्टस्नेहानि कृत्वा स्वकालादन्यत्र काले दर्शयति सिद्धा मे वनदेवतैतानि ददातीति व्यपदिशन्निति युगलकम् ॥

इअ बहुविहकोऊहलहिअहिअअविअड्ढकामिणीदइओ ॥
एत्थ समप्पइ हरमेहलाइ पढमो परिच्छेओ ॥१५५॥

इति बहुविधकौतूहलहृतहृदयविदग्धकामिनीदयितः ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अत्र समाप्यते हरमेखलायाः प्रथमः परिच्छेदः ॥स्पष्टार्था गाथा॥

कौतूहलाधिकारः प्रथमपरिच्छेदः समाप्त ॥आदितो गाथाः १५५॥

सम्बन्धादिसमुद्देशो मणिमन्त्रादिशक्तता ।
कौतूहलानां समयोविधानं दर्शनादिके ॥
कौतूहलाधिकारस्य नानावस्तुसमाश्रयाः ।
परिच्छेदस्य विषयाः प्रथमस्य प्रकीर्तिताः ॥

इति
हरमेखलायाः प्रथमः परिच्छेदः ॥

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

श्रीः

अथ द्वितीयः परिच्छेदः

अह [1]खलकुट्टणिवंचणाकज्जसज्जणब्भत्थणा[2] विणिम्मविअं ॥
कुट्टणिपमुहाण[3] विडम्बणाहिआरं णिसामेह ॥१॥

अथ खलकुट्टनीवञ्चनाकार्यसज्जनाभ्यर्थनाविनिर्मितम् ।
कुट्टनीप्रमुखानां विडम्बनाधिकारं निशामयत ॥

द्वितीयस्याधिकारस्य रचने हेतुः फलं च गाथयाऽनया प्रतिपादितमिति ॥

समघअमहुभरिअपईवगहिअकज्जलविमीसिआ दिण्णा ॥
खुट्टीण कुणइ मइरा महामअं जम्मपेरन्तं ॥२॥

समघृतमधुभरितप्रदीपगृहीतकज्जलविमिश्रिता दत्ता ।
कुट्टनीनां करोति मदिरा महामदं जन्मपर्यन्तम् ॥

तुल्यमात्राभ्यां क्षौद्रघृताभ्यां पूरितो यः प्रदीपस्ततो गृहीतेन कज्जलेन संयुक्तः सुराद्यासवः पानाय दत्त आजीवं महान्तं मदमुत्पादयतीति ॥

सममहुघअतिमितेल्लभरिअपईवकंतीइ ॥
कुट्टीण दीहकालं कुणइ मअं ताविआ मइरा ॥३॥

सममधुघृततिमितैलभरितप्रदीपकान्त्या ।
कुट्टनीनां दीर्घकालं करोति मदं तापिता मदिरा ॥

पूर्वोक्तद्रव्याभ्यां सममात्रेण मत्स्यानां क्वाथस्नेहेन पूरितस्य प्रदीपस्य सम्बन्धिनी याऽसौ दीप्तिस्तया तप्तः सुराद्यासव उक्तकार्यं करोतीति । अत्र द्रव्याणि त्रीणि सममात्राणीति ॥

तम्माघअं सलोणं दसाहमेक्कं वराहरसअं वा ॥
पाऊण मुंचइ मअं छाअच्छीरं व णासाइ ॥४॥

ताम्राघृतं सलवणं दशाहमेकं वराहरसकं वा ।
पीत्वा मुञ्चति मदं छागक्षीरं वा नासिकया ॥

पूर्वोक्तप्रयोगद्वयेनोत्पन्नो मदोऽनेन प्रयोगत्रयेण निवर्तते । ताम्रा गौस्तद्घृतं सैन्धवसंयुक्तम्, अथवा सूकरमांसयूषोऽथवा छागक्षीरं दशदिनानि नस्येनोपयुज्य मदान्मुच्यत इति ॥

---

१ खलखुट्टिवंचणा-क. ख. । सजणब्भत्थणा-क. ख. । ३ पमुहाइ-क. ख. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

धवलहअमारमूलं रम्भाकुसुमाइ विल्लफलमज्जा ॥
दिण्णो भोअणसमए खलकुट्टणीअणं [1]वमेइ ॥५॥

धवलहयमारमूलं रम्भाकुसुमानि विल्वफलमज्जा ।
दत्तो [2]भोजनसमये खलकुट्टनीजनं वमयति ॥

श्वेतस्य हयमारस्य करवीरस्य मूलं, रम्भा कदली तत्पुष्पाणि, बिल्वमज्जा चैतत् संयुक्तं भोजनेन सह दत्तं भुक्तं प्रच्छर्दयतीति ॥

सरएण पाणएण व दिण्णं तम्बोलमीसिअं अहवा ॥
कंगुट्ठं अविणअकुट्टणीए दिवसं विरेएइ ॥६॥

सरकेण पानकेन वा दत्तं ताम्बूलमिश्रितमथवा ।
कङ्कुष्ठमविनयकुट्टनीं दिवसं विरेचयति ॥

सरकमकृत्रिमं मद्यादि, पानकं कृत्रिमं सुरादि, कङ्कुष्ठं तिक्तदुग्धिका । शिष्टं स्पष्टम् ॥

[3]छीरल्लिदुद्धमीसिअरूबिअबीएहि गुडसणाहेहि ॥
होइ रुहिराइसारो खाणे पाणे व दिण्णेहि ॥७॥

क्षीरिणीदुग्धमिश्रितरूपिकबीजैर्गुडसनाथैः ।
भवति रुधिरातिसारः खादने पाने वा दत्तैः ॥

क्षीरिणी सुधावृक्षस्तत्क्षीरेण मिश्रितै रूपिकस्यार्कवृक्षस्य बीजैर्गुडसंयुक्तैः । शिष्टं स्पष्टम् ॥

सुसरहकत्तिणिहित्ते तम्बोले कुट्टणीण मुहरोओ ॥
ता होइ जा ण मुच्चइ विडवड्ढिअहिअअपरितोसो ॥८॥

[4]सुसरठकृत्तिनिहिते ताम्बूले कुट्टनीनां मुखरोगः ।
तावद् भवति यावन्न मुच्यते विटवर्धितहृदयपरितोषः ॥

सरठः कृकलासः । सुशब्दो विशेषणे । तच्चर्मणि यदीया ताम्बूलवीटा निबध्यते तस्य तावद् मुखरोगो भवति यावत् तत् पुनर् (न) मुच्यते । मुक्ते तु निवर्तेत इति ॥

भल्लाअअकट्ठकरंडअम्मि [5]आवीडअपूरओ जस्स ॥
अहिवअणे व णिहिप्पइ मुहरोओ तस्स संभवइ ॥९॥

---

१ वमइ–क. ख. । २ भोजनसहितं–क. ख. । ३ छीरल्लो–क. ख. । ४ स्थूल(सरठ) कृत्ति–क. ख. ।
५ आपेडपसूरओ–क. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

भल्लातककाष्ठकरण्डके आवीटपूरको यस्य ।
अहिवदने वा निक्षिप्यते मुखरोगस्तस्य संभवति ॥

भल्लातकस्यारुष्करस्य दारुणः सम्बन्धि यत् करण्डकं पिटकादि तत्र, मृतसर्पमुखे वा, यस्य संबन्धी ताम्बूलवीटाधारः सावीटः पत्रिकावटक इति प्रसिद्धो निक्षिप्यते तस्य मुखरोगो जायत इति ॥

वग्गुलिवअणणिहित्ते तम्बोले वैरिणो महाघोरो ॥
घोणासमुहविणासिए दंतधावणे होइ मुहरोओ ॥१०॥

वल्गुलिवदननिहिते ताम्बूले वैरिणो महाघोरः ।
गोनासमुखविन्यस्ते दन्तधावने भवति मुखरोगः ॥

वल्गुलिश्चर्मशकुनिर्वृक्षचरः, तलेल इति क्वचित् प्रसिद्धः । तन्मुखे यदीयस्ताम्बूलवीटो न्यस्यते तस्य मुखरोगो भवति । तथा गोनासमुखे यच्चर्वितं दन्तधावनं न्यस्यते तस्यापि मुखरोगो भवतीति ॥

कणअसिहिणिहिअ[1]महुअरधूआ[2]ऊरिअकुं[3]भोअर[4]णसिअं ॥
कुणइ जलं दिण्णं कुट्टणीण मूअत्तणमसज्झं ॥११॥

कनकशिखिनिहितमधुकरधूमापूरितकुम्भोदरन्यस्तम् ।
करोति जलं दत्तं कुट्टनीनां मूकत्वमसाध्यम् ॥

कनको मातुल[5]स्तत्काष्ठजाग्निनिक्षिप्तभ्रमरशरीरधूमेनापूरितस्य घटस्य कुक्षौ निक्षिप्तं यज् जलं तत् पीतं सदसाध्यं वाग्वैकल्यं करोतीति ॥

मालईपसूअकअवासकुंभपरिवासिअसलिलमुप्पसइ ॥
मूअत्तणमिणमो दुद्धरंवि सत्ताहमत्ताण ॥१२॥

मालतीप्रसूनकृतवासकुम्भपर्युषितसलिलमुद्ध्वंसयति ।
मूकत्वमिदं दुर्धरमपि सप्ताहमात्रेण ॥

इदं पूर्वगाथयोक्तं मूकत्वं सलिलमेवंविधं निवारयति सप्ताहमात्रमुपयुक्तम् । कीदृशं सलिलं-मालतीप्रसूनानि सुमनःपुष्पाणि तैः कृताधिवासो यः कुम्भस्तत्र पर्युषितं रात्रिमेकां स्थितं सदिति ॥

चणएहि समं खाइआ पाउं दिण्णा व सीअलजलेण ॥
अह कुणइ कुंभिआ कुट्टणीण कडिपवणमइमुहरं ॥१३॥

---

१ पिम्मिश्र-क. । २ धूमा-क. । ३ कुण्डोग्रर-क. । ४ णिहित्तं-क. ख. । ५ तत्काष्ठजेनौ-क. ख.

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

चणकैः समं खादिता पातुं दत्ता वा शीतलजलेन ।
अथ करोति कुम्भिका कुट्टनीनां कटिपवनमतिमुखरम् ॥

कुम्भिका ओषधिविशेषः । सा स्थलजा गृह्यते । सा चणकैः सह भुक्ता, अथवा शीतोदकेन सह पीता सशब्दमधोमारुतं करोतीति ॥

अइतुरअं जे भमन्ति सलिलोवरि मुडफुल्लआ ।
कसणा भमराव्व तारुअत्ति पसिद्धआ ॥
इक्को कीडाण ताण (सु)चुण्णिअदेहओ दिण्णो ।
सह चुण्णएण कडिमारुअमोचअओ ॥१४॥

अतित्वरितं ये भ्रमन्ति सलिलस्योपरि
कृष्णा भ्रमरा इव तारुका इति प्रसिद्धाः ॥
एकः कीटानां तेषां सुचूर्णितदेहो दत्तः
सह चूर्णकेन कटिमारुतमोचकः ॥

ये लघुप्रमाणाः कृमिविशेषा जलस्योपरि [1]सत्वरं कृत्वा कृष्णवर्णा (भ्रमरा इव) भ्रमन्ति तेषां मध्यादेकः सुपिष्टशरीरस्ताम्बूलरङ्गेण सह दत्तः पूर्वोक्तं कार्यं वारयतीति ॥

सरडिन्दिन्दिरविंजरपुअचुण्णफिक्केसु होइ अंगेसु ॥
खलकुट्टणीण कुट्ठं सवेअणं कण्डुसंजुत्तम् ॥१५॥

सरठेन्दिन्दिरवृश्चिकचूर्णस्पृष्टेषु भवत्यङ्गेषु ।
खलकुट्टनीनां कुष्ठं सवेदनं कण्डूसंयुक्तम् ॥

कृकलासभ्रमरवृश्चिकानां शरीरचूर्णेन यस्य गात्रं लिप्यते तस्य यथोक्तं कुष्ठं [2]जन्यत इति ॥

फणिणो घरगोहाइ व मुहम्मि सत्ताहसंठिआ गुंजा ॥
खइआ जणेइ कुट्ठं चारजलं तं समुप्पुसइ ॥१६॥

फणिनो गृहगोधाया वा मुखे सप्ताहसंस्थिता गुञ्जा ॥
खादिता जनयति कुष्ठं [3]चारजलं तत् समुद्ध्वंसयति ॥

गुञ्जा रक्तिका सर्पस्य मुखे, गृहगोधायाः कुड्यमत्स्य इति कचित्प्रसिद्धस्य कृमिविशेषस्य वा (मुखे) सप्तमात्राणि दिनानि निक्षिप्ता, भुक्ता सती कुष्ठं जनयति । तत् कुष्ठं [4]चारस्य पियाल(फल)स्य रस उपयुक्तः सन् निवारयतीति ॥

---

१ चतुरं-ख. । २ जनयति-ख. ३ चोरजल-ख. । ४ चोरस्य-ख. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सिद्धत्था अहिमुहम्मि कद्दमकअपङ्ग्वारअम्मि पक्का ॥
णिद्धूमवअरीदारुसमुब्भवजलणे णिक्खित्ता ॥
णिक्खित्ता सअणअले [1]फिक्कसमुग्गअफोडअआ ॥
खलकुट्टणीअणं खपेन्ति कद्दमपरिअररहिआ ॥१७-१८॥

सिद्धार्था अहिमुखे कर्दमकृतपरिवारके पक्काः ॥
[2]निर्धूमवदरीदारुसमुद्भवज्वलने निक्षिप्ताः ॥
निक्षिप्ताः शयनतले स्पर्शसमुद्गतस्फोटकाः ॥
खलकुट्टनीजनं क्षपयन्ति कर्दमपरिकररहिताः ॥

सिद्धार्थाः सर्षपाः सर्पस्य मुखे विनिहिताः कर्दमकृतवेष्टने तदनु कर्दमेन पङ्केन कृतलेपने तदन्वम्लवदरीकाष्ठजे विधूमाग्नौ पक्काः, तथाविधाः सन्तः शय्यापृष्ठे यस्य निक्षिप्यन्ते तस्य स्पर्शेन स्फोटानङ्गेषूत्पादयन्तस्तं क्षपयन्ति, यदि पद्मिनीपङ्के नासौ सर्वाङ्गं न कृतपरिकरो दत्तलेपो भवति । तस्मिन् दत्ते तु तस्य स्फोटाः शाम्यन्तीति युगलकम् ॥१७-१८॥

भल्लाअअरसकविअच्छुरोमजीअहरजलणगुंजाहि ॥
फिक्कम्मि[3] होइ अंगे लूआ खरदिणअरे काले ॥१९॥

भल्लातकरसकपिकच्छुरोमजीवहरज्वलनगुञ्जाभिः ।
स्पृष्टे भवत्यङ्गे लूता खरदिनकरे काले ॥

भल्लातकमरुष्करम्, कपिकच्छुरोमाण्यात्मगुप्तापर्णानि, जीवहरं विषम्, ज्वलनश्चित्रकः, गुञ्जा रक्तिकाः, एतैर्द्रव्यैः समैः कृतेन चूर्णेन [4]स्पृष्टेऽङ्गे ग्रीष्मकाले लूता जायत इति ॥

[5]तत्प्रत्याख्यानमाह—

सा वारिउं ण तीरइ सामारुणमलअचंदणतअरेहि ॥
कुट्ठोसीरेहि विणा पसरन्ती मन्तसहिएहि ॥२०॥

सा वारयितुं न पार्यते श्यामारुणमलयचन्दनतगरैः ।
कुष्ठोशीराभ्यां विना प्रसरन्ती मन्त्रसहितैः ॥

सा लूता प्रसरन्ती वर्धमाना वारयितुं न शक्यते वक्ष्यमाणमन्त्रसहितैरेतैर्द्रव्यैर्विना । कैः- श्यामा गन्धप्रियङ्गुः, अरुणं कुङ्कुमम्, मलयं चन्दनम्. चन्द्रः कर्पूरः, तगरो जिह्मः, कुष्ठं वाप्यम्, उशीरमभयम् (एतैः ।) एतैर्लेपपानादिना प्रयुक्तैर्निवर्तत इति । मन्त्रो यथा [6]ॐ नम उड्डाम-

---

१ पप्फ-ख. । २ परिधूम-ख. । ३ भिक्कम्मि-ख. । ४ घृष्टेङ्गे-ख । ५ तत्प्रत्यायानमाह-ख. ।
६ ॐ नम उड्डामहेश्वराय-ख., ॐ नम उद्दामेश्वराय-मु. पु. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

महेश्वराय [1]कुमनि कुमनि स्वाहा । एतेन मन्त्रेणाभिमन्त्रितानि श्यामादीनि पूर्वोक्तप्रयोगोत्पन्नाया लूताया निवारणमित्यर्थः ॥

सरडस्साहिपइणो व सोणिअरत्तम्मि लंघिए सुत्ते ॥
महिलाण गलइ रुहिरं पच्छाइअलंघिए ठाइ ॥२१॥

सरठस्याहिपतेर्वा शोणितरक्ते लङ्घिते सूत्रे ।
महिलानां गलति रुधिरं प्रक्षालितलङ्घिते तिष्ठति ॥

सरठस्य कृकलासस्य, अहिपतेर्द्विमुखसर्पस्य वा शोणितेन रुधिरेण रक्ते लिप्ते सूत्रे लङ्घिते सति महिलानां लङ्घयित्रीणां स्त्रीणां शोणितं गलति रजः स्रवति । तस्मिंस्तु सूत्रे पूर्वं प्रक्षालिते तदो लङ्घिते तद् रक्तं तस्या निरुध्यते इत्यर्थः ॥

वणमूसअखल्लाविणिहिअम्मि कइतन्तुगाढवद्धम्मि ॥
कुट्टीण मलणिरोहो होइ पुरीसम्मि दुव्विसहो ॥२२॥

वनमूषकचर्मविनिहिते[2] कपितन्तुगाढबद्धे ।
कुट्टनीनां मलनिरोधो भवति पुरीषे दुर्विसहः ॥

वनमूषकः [3]खलहड इति क्वचित् प्रसिद्धः, तस्य चर्मणि वानरस्नायुना निविडग्रथिते यस्य पुरीषं स्थाप्यते तस्य दुःसहव्यथो मलनिरोधो भवति । तन्मुक्तग्रन्थौ स निवर्तते इति ॥

गोसलिलपिट्ठवग्गुलिमललित्तसरावथइअवच्चस्स ॥
वेरीण मलणिरोहो होइ महादुक्खसंजणणो ॥२३॥

गोसलिलपिष्टवल्गुलिमललिप्तशरावस्थगितवर्चस्कस्य ।
वैरिणो मलनिरोधो भवति महादुःखसञ्जननः ॥

गोमूत्रेण पिष्टं वल्गुलेर्वनचर्मशकुनेः पुरीषं तेन लिप्तं यच्छरावं तेन स्थगितमाच्छादितं वर्चः शकृद् यस्य तस्य तीव्रव्यथो मलनिरोधो भवति, शरावापासनेन निवर्तत इति ॥

तरुदेवउलालयचम्मसउणिमललित्तमल्लअणिरुद्धे ॥
होइ पुरीसम्मि फुडं रिउणो मलमारुअणिरोहो ॥२४॥

तरुदेवकुलालयचर्मशकुनिमललिप्तमल्लकनिरुद्धे ।
भवति पुरीषे [4]स्फुटं रिपोर्मलमारुतनिरोधः ॥

---

१ कुहरिकुन्दरि ठठ-मु. पु. २ विनि हित-ख. । ३ तालहड इति स्थलान्तरवर्त्ती पाठः । ४ स्थितं-ख. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

वृक्षे देवगृहे वा यश्चर्मशकुनिः सनीडो निवसति तस्य संबन्धिना शकृता लिप्तेन शरावेण निरुद्धं स्थगितं यस्य मलं स्थाप्यते तस्याधोवातस्य मलस्य च निरोधो जायते, शरावापासनात्तु निवर्तत इति ॥

तालहडकत्तिणिक्खित्तणिविडसंजमिअमुत्तकद्दमआ[1] ॥
खलकुट्टणी किलामइ मुत्तणिरोहाउला सुइरं ॥२५॥

तालहणकृत्तिनिक्षिप्तनिविडसंयमितमूत्रकर्दमा ।
खलकुट्टनी क्लाम्यति [3]मूत्रनिरोधाकुला सुचिरम् ॥

तालहडस्य वनमूषिकस्य चर्मणि दृढनिबद्धो मूत्रजः पङ्को यस्याः सा [2]मूत्रनिरोधातुरा चिरं क्लान्ता भवतीति । मुक्ते निरोधनिवृत्तिरिति ॥

रिट्ठंडअरसगुंठिअमल्लअथइअम्मि हिंडइ पुरीसे ॥
णहचंचुहणणवावअवाअसणिउरुम्बखज्जन्तो ॥२६॥

रिष्टाण्डकरसगुण्ठितमल्लकस्थगिते हिण्डति पुरीषे ।
नखचञ्चुहननव्यापृतवायसनिकुरुम्बखाद्यमानः ॥

रिष्टः काकस्तदण्डान्तर्वर्तिना रसेन कललेन लिप्तं यच्छरावं तेन स्थगितं पुरीषं यस्य स चेत् हिण्डति व्रजति [4]तदा नखचञ्चुघातव्यग्रैः काकसमूहैर्भक्ष्यमाणो भवतीति ॥

लिहिऊण जस्स णामं चूअदले कसणरिट्ठरुहिरेण ॥
कीरइ पुरीसमज्झे सो खज्जइ [5]काअणिवहेण ॥२७॥

लिखित्वा यस्य नाम चूतदले कृष्णरिष्टरुधिरेण ।
क्रियते पुरीषमध्ये स खाद्यते काकनिवहेन ॥

यस्याम्रपत्रे सर्वकृष्णवायसरक्तेन नाम लिखित्वा तत् पत्रं तदीयशकृन्मध्ये स्थाप्यते स काकसंघातैर्भक्ष्यत इति ॥

विच्छुअकंटअसहिए मअणफलान्तम्मि विणिहिए होइ ॥
विसमं वराङ्गदुक्खं महिलाणं मुत्तचिक्खिल्ले ॥२८॥

वृश्चिककण्टकसहिते मदनफलान्तर्विनिहिते भवति ।
विषमं वराङ्गदुःखं महिलानां मूत्रकर्दमे ॥

१ मुत्तचिक्खल्ला-ख. । २ मूत्रनिरोधातुरा-ख. । ३ मूत्रनिरोधे मन्दश्चिरं क्लान्तो-ख. । ४ तत्-ख. ।
५ काक-ख. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

स्त्रीणां स्वमूत्रोत्पन्ने पङ्के एवंविधे क्रियमाणे दुःसहा योनिवेदना भवति । कीदृशे- वृश्चिकस्य सम्बन्धी यः कण्टको येनासौ दशति तत्संयुक्ते, मदनफलस्यान्तर्निक्षिप्त इति ॥

विच्छुअकंटअविद्धं खलकुट्टिपुरीसमद्दअसणाहं ॥
कुणइ कुसारणिहित्तं वरंगदुक्खं महाघोरं ॥२९॥

वृश्चिककण्टकविद्धं खलकुट्टनीपुरीषमार्द्रकसनाथम् ।
करोति शङ्कुतलनिहितं वराङ्गदुःखं महाघोरम् ॥

स्त्रीणां पुरीषमेवं क्रियमाणं तासामेव घोरां योनिव्यथां करोति । कथं क्रियमाणम्-वृश्चिककण्टकेन विद्धं तथार्द्रकेन सनाथमेतादृशं सत् शंकुतलगर्ते न्यस्तमिति । खलशब्दः कुट्टनीविशेषणं स्त्रीविषयत्वात् प्रयोगस्येति ॥

[1]विअडोम्बकाअकोसिअ[2]कइमाज्जारछाअणउलरोमेहि ॥
पच्छाइए पुरीसे रिउणो सम्भवइ उम्माओ ॥३०॥

द्विजडुम्बकाककौशिककपिमार्जारच्छागनकुलरोमभिः ।
प्रच्छादिते पुरीषे रिपोः सम्भवत्युन्मादः ॥

द्विजडोम्बयोः केशैः, काकोलूकयोः पक्षैर्मर्कटादीनां रोमभिर्यस्य पुरीषमवच्छाद्यते तस्योन्मादो जायत इति ॥

चुण्णं सुरगोवअभूलआण महिलाण छिपइ जो गुज्झे ॥
तस्सेव तत्थ पसरो पडइ धओ सेसपुरिसाण ॥३१॥

चूर्णं सुरगोपक[3]भूलतयोर्महिलानां क्षिपति यो गुह्ये ।
तस्यैव तत्र प्रसरः पतति ध्वजः शेषपुरुषाणाम् ॥

सुरगोप इन्द्रगोपाख्यः कीटः, भूलता गण्डूपदः, ध्वजो लिङ्गम् । शिष्टं गतार्थम् ॥

वरडीघरचुण्णसणाहसलिलपक्खालिए वरंगम्मि ॥
णरलिङ्गसंगमो महिलाणं महिअं विणा णत्थि ॥३२॥

वरटीगृहचूर्णसनाथसलिलप्रक्षालिते वराङ्गे ।
नरलिङ्गसङ्गमो महिलानां मथितं विना नास्ति ॥

वरटी क्षामोदरी, तस्या गृहमास्पदम्, तच्चूर्णेन संयुक्तं यज्जलं तेन प्रक्षालिते गुह्ये स्त्रीणां पुंश्चिह्नेन सह सङ्गमो नास्ति यावन्मथितदध्ना तत्र पुनः प्रक्षालितमिति ॥

---

१ दिअडुम्ब-ख. । २ कवि ? । ३ भूलतानां-ख. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अविणट्ठसिप्पिसंपुडलेवो थंभेइ कामिणिवरंगं ॥
सुरभिमहिआभिसेओ पुणोवि उत्थंभणं कुणइ ॥३३॥

अविनष्टशुक्तिसंपुटलेपस्तम्भयति कामिनीवराङ्गम् ।
सुरभिमथिताभिषेकः पुनरप्युत्तम्भनं कुरुते ॥

अविनष्टोऽविघटितो यः [1]शुक्तिसम्पुटः । अविश्लिष्टकपाटद्वयमित्यर्थः । तेन [2]घृष्टेन लेपो योनेः स्तम्भनं सम्प्रयोगायोग्यतां करोति । तस्याः स्तम्भननिवारणं मथितगोदधिसेकः करोति । शुक्तिरत्र नदीसंभवेति ॥

होन्ति [3]अहोमुहोम्मुह [4]सुरभीविसाणग्गलेविए कमसो ॥
महिलाण वरंगे रइणिरोहपसरा जहिच्छाइ ॥३४॥

भवतोऽधोमुखोन्मुखसुरभीविषाणाग्रलेपिते क्रमशः ।
महिलानां वराङ्गे रतिनिरोधप्रसरौ यथेच्छया ॥

स्त्रीणामधोमुखस्य गोशृङ्गस्याग्रं निघृष्य (तेन) योनिलेपे कृते रतिनिरोधः सुरतव्यापाराभावो जायते । ऊर्ध्वगतश्रृङ्गाग्रलेपे(न) रतिप्रसरः पुनः सुरतयोग्यता प्रयोक्तुरिच्छावशाज्जायत इति ॥

तम्बाए वइल्लस्स व ओणअसिंगग्गलेविअं पडइ ॥
उत्थाइ पुरिससाहणमुम्मुहसिंगग्गलेवेण ॥३५॥

ताम्राया वलीवर्दस्य वाऽवनतश्रृङ्गाग्रलिप्तं पतति ।
उत्तिष्ठति पुरुषसाधनमुन्मुखश्रृङ्गाग्रलेपेन ॥

गोर्गव्या दान्तस्य वा पूर्ववदधोमुखश्रृङ्गाग्रलेपेन नरध्वजः पतति न रतिकार्यक्षमो भवति । ऊर्ध्वगश्रृङ्गाग्रलेपेन पुनरुत्तिष्ठति रतिकार्यक्षमो भवतीति ॥

जा गअणगहिअवग्गुलिपुरीसकअलिंगलेवेण [5]रमिआ ॥
[6]अण्णेण ण सा तीरइ सिविणे वि रमाविउं रमणी ॥३६॥

या गगनगृहीतवल्गुलिपुरीषकृतलिङ्गलेपेन रमिता ।
अन्येन न सा [7]पार्यते स्वप्नेपि रमयितुं रमणी ॥

या स्त्री वृत्तचरस्य वल्गुलेश्चर्मचटकस्य गगनादेव गृहीतेन भूमिमप्राप्तेन शकृता कृतसाधनलेपेन पुरुषेण [8]संभुक्ता साऽन्येन पुरुषान्तरेण नकथंचिद् रमयितुं शक्येति ॥

---

१ शुक्तेः सम्पुटः ?। २ पिष्टेन–ख. । ३ अहोमुहुम्मुह ?, अहोमुहुद्धम्मुह ?। ४ सुरभि–ख. । ५ संभुक्ता–ख. । ६ सा अण्णेण ण तीरइ इति पाटान्तरम् । ७ शक्यते–ख. । ८ संयुक्ता–ख. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

[1]तंवेअ डड्ढमणीसअधूममच्छारणालपरिपिट्ठं ॥
लेवेण पुणोवि करेइ रइघरुत्तम्भमवलाण ॥३७॥

[2]तदेव दग्धमनिःसृतधूममच्छारनालपरिपिष्टम् ।
लेपेन पुनरपि करोति रतिगृहास्तम्भमबलानाम् ॥

तदेव यथोक्तं वल्गुलिपुरीषम् । आमपात्रसंपुटादन्तर्धूमतया दग्धं सत् पश्चान्निर्मलकाञ्जिकपिष्टं, लिङ्गलेपेन प्रयुक्तं, पूर्वप्रयोगकृतवराङ्गबन्धं स्त्रीणां निवारयतीति ॥

वालेअबीअवट्टिअकरिकेसरलित्तलिंग[3]रमिआओ ॥
रमिउं [4]रमणी ण णरो तीरइ अण्णो सअण्णोवि ॥३८॥

वालेयबीजवर्तितकरिकेशरलिप्तलिङ्ग[5]रमिताः ।
[6]रमयितुं [7]रमणीर्न नरः [8]पारयत्यन्यः सतृष्णोपि ॥

खरचरमधातुभावितेन नागकेशरेण लिप्तलिङ्गो यः पुरुषस्तेन रमिताः याः स्त्रियस्तास्तदन्यः पुरुषः साभिलाषोऽपि रमयितुं न शक्नोतीति ॥

होइ[9] अहोमुहवससिंगलेविए णाभिमंडले महिला ॥
बद्धवरंगा उम्मुहविसाणलेवं[10] अवावंती ॥३९॥

भवत्यधोमुखवृषशृङ्गलेपिते नाभिमण्डले महिला, ।
बद्धवराङ्गोन्मुखविषाणलेप[11]मप्राप्नुवन्ती ॥

अधोमुखस्य दान्तशृङ्गाग्रस्य निघर्षणेन लिप्तनाभिमण्डला स्त्रीः स्तम्भितयोनिर्भवति । ऊर्ध्वमुखशृङ्गलेपं यदा नाभिमण्डले करोति तदा निवृत्तयोनिस्तम्भा भवतीति ॥

वीअमलत्तअपडगाढवेडिअं सेलुरुक्खतलणिहिअं ॥
खट्टापाअतले व णरस्स संढत्तणं कुणइ ॥४०॥

वीजमलक्तकपटगाढवेष्टितं शेलुवृक्षतलनिहितम् ।
खट्वापादतले वा नरस्य षण्ढत्वं करोति ॥

पुरुषस्य संबन्धि रेतो लाक्षारसरक्तवस्त्रनिविडबद्धं शैलुवृक्षस्य श्लेष्मान्तकतरोरधस्तान्निक्षिप्तं, तस्यैव वा पुरुषस्य सम्बन्धिन्याः खट्वायाः पादस्याधस्तान्निक्षिप्तं तस्य पुरुषस्य षण्ढत्वं करोतीति ॥

---

१ तंविअ-ख. । २ एतदेव-ख. । ३ रमिआण-ख. । ४ रमणीण-ख. । ५ रमितानाम्-ख. । ६ रन्तुं-ख. । ७ रमणीनाम्-ख. । ८ न पारयत्यन्यः-ख. । ९ होन्ति-ख. । १० लेवेण पुणो जुवई-ख. । ११ लेपेन पुनर्युवती-ख. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सोवण्णे तारमए व भाअणे धोअमोत्तिअजलेण ॥
पडिअं पुरुसअलिंगं पुणोण्णअं होइ पीएण ॥४१॥

सौवर्णे तारमये वा भाजने धौतमौक्तिकजलेन ।
पतितं पुरुषलिङ्गं पुनरुन्नतं भवति पीतेन ॥

पूर्वोक्तप्रयोगप्रतिविधानमेतत् । हेममये रूप्यमये वा पात्रे धौतानि क्षालितानि यानि मौक्तिकानि मुक्ताफलानि तत्संबन्धि यद् वारि तेन पीतेन सता षण्ढीभूतोपि पुरुषः पुनः पुंस्त्वं लभत इति ॥

छव्विन्दुणिसाचुण्णं पसुवइसलिलेण भाविअं वहुसो ॥
पाणम्मि भोअणे वा दिण्णं सण्डत्तणं कुणइ ॥४२॥

षड्विन्दुनिशाचूर्णं पशुपतिसलिलेन भावितं बहुशः ।
पाने भोजने वा दत्तं षण्ढत्वं करोति ॥

षड्विन्दुरिति विन्दुषट्कोपलक्षितः कृमिविशेषः क्षणिरिति कचित्प्रसिद्धः, निशा पिण्डहरिद्रा, पशुपतिसलिलं छागमूत्रं तेन भावितं बहुशो, बहुवारं [1]शोषितं शुष्कं सदार्द्रीकृतम्, षण्ढत्वं रतिकार्याक्षमत्वम् । शिष्टं स्पष्टम् ॥

समतिलगोक्खुरचुण्णं छाअच्छीरेण साहिअं ससिअं ॥
जमिअं[2] महुसंजुत्तं तइमं सण्डत्तणं हरइ ॥४३॥

समतिलगोक्षुरचूर्णं छागक्षीरेण साधितं ससितम् ।
खादितं मधुसंयुक्तं तदिदं षण्ढत्वं हरति ॥

गोक्षुरकः श्वदंष्ट्रा तच्चूर्णं तिलेन सममानं छागक्षीरेण पक्वं सितशर्करयासहितं शीतीभूतं माक्षिकेण सह संभुक्तं पूर्वप्रयोगकृतं षण्ढत्वमपहरतीति ॥

करहट्ठिविवरविणिहिअणरपरसुआकीलएण मिहुणस्स ॥
सअणसिरुद्देसपरिट्ठिएण बन्धो रए होइ ॥४४॥

करभास्थिविवरविनिहितनरपर्शुकाकीलकेन मिथुनस्य ।
शयनशिरोद्देशपरिस्थितेन बन्धो रते भवति ॥

करभास्थि उष्ट्रकङ्कालनलिका, तच्छिद्रे निक्षिप्तो योऽसौ पुरुषपर्शुकाशङ्कुस्तेन मिथुनस्य स्त्रीपुंसयोः शयनशिरोभागन्यस्तेन सुरतकाले बन्धोऽन्योन्याविश्लेषः श्ववद् भवतीति ॥

---

१ शोधितं-ख. २ । खइअमिति पुस्तकान्तरे ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कोडब्भकअगवअपुरीसगोलओ मिहुणसअणविणिहित्तो ॥
कुणइ रए लिंगवरंगबन्धमोसारिओ मोक्खं ॥४५॥

कीटकक्कृत्तगवलपुरीषगोलको मिथुनशयनविनिहितः ।
करोति रते लिङ्वराङ्गबन्धमपसारितो मोक्षम् ॥

[1]गवलाः कीटाः कृमिविशेषास्तैः [2]कृत्तो यः खण्डशः कृतः परिवर्तुलः पिण्डः स स्त्रीपुंसयोः शय्यायां निक्षिप्तः पूर्ववद् रते बन्धं करोति । [3]अपसारितो बन्धनिवृत्तिं करोति । पूर्वगाथोक्तस्यापि बन्धस्यैवमेव निवृत्तिरिति ॥

[4]धवलघरगोहिआभुत्तजिण्णणवणीअताललित्तेण ॥
हत्थेण हरइ जुवईपओहरे मुट्ठिबन्धेण ॥४६॥

धवलगृहगोधिकाभुक्तजीर्णनवनीततालालिप्तेन ।
हस्तेन हरति युवतीपयोधरौ मुष्टिबन्धेन ॥

धवला याऽसौ गृहगोधिका कुड्यमत्स्य इति व्याख्याता तया भुक्तं सज्जीर्णं यन्नवनीतयुक्तं हरितालं तेन लिप्तकरो मुष्टिबन्धं कुर्वन् स्त्रीणां स्तनौ हरति । उक्तेन द्रव्येण लिप्तहस्तः स्त्रीस्तनसांमुख्येन मुष्टिबन्धं कुर्वन् स्त्रीणां स्तनावदृश्यौ करोतीत्यर्थः ॥

चिल्लअसमिहट्ठसअं रिट्ठमहासउणिसोणिआरुणिअं ॥
णामेण जाण हुज्जइ ताण महावेरमुब्भवइ ॥४७॥

चिल्लकसमिदष्टशतं रिष्टमहाशकुनिशोणितारुणितम् ।
नाम्ना ययोर्हूयते तयोर्महावैरमुद्भवति ॥

चिल्लको वृक्षविशेषस्तत्संबन्धिनीनां समिधामष्टोत्तरशतं काकोलूकस्य रक्तेन लिप्तं ययोर्द्वेष्ययोर्नाम्ना हूयते तयोः परस्परं द्वेष उत्पद्यते । होमविधिस्तन्त्रान्तरा(द)वसेय इति ॥

दज्झन्ति जाण णामेण काअकाआरिपक्खपिच्छाइ ॥
पणअपरूढं पि खणेण ताण पेम्मं विसंवअइ ॥४८॥

दह्यन्ते ययोर्नाम्ना काककाकारिपक्षपिच्छानि ।
प्रणयप्ररूढमपि क्षणेन तयोः प्रेम विसंवदति ॥

ययोर्द्वेष्ययोर्नाम्ना वायसकौशिकयोः पक्षाः पावके दह्यन्ते भस्मीक्रियन्ते तयोरन्योन्यानुनय(:) स्थिरापि प्रीतिस्तत्कालमेव निवर्तत इति ॥

---

१ 'गवला' इत्येतत् पदं न दृश्यते ख. पुस्तके । २ कृतो-ख. । ३ निसारितो-ख. । ४ धअल-ख. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

हअमहिसवसापूरिअपईवगहिअंजणंजिअच्छीण ॥
णिअजणणी वि विरज्जइ अचिरा वड्ढन्तसंतावा ॥४९॥

हयमहिषवसापूरितप्रदीपगृहीताञ्जनाञ्जिताक्षाणाम् ।
निजजनन्यपि विरज्यति [1]अचिराद्वर्धमानसन्तापा ॥

अश्वस्य महिषस्य च सम्बन्धिन्या वसया स्नेहेन पूरितो यो दीपस्ततो गृहीतेन कज्जलेन रञ्जितनेत्राणां पुरुषाणां यदभिसन्धानेन तत् प्रयुक्तं सा स्वमातापि सती तं प्रति विरागहेतुर्जायते, शीघ्रमेव वर्धमानानुशयेति ॥

थिरवेरजीअरुहिरेण जस्स मिथुनस्स णिंवपत्तम्मि ॥
णामक्खराइ लिखिज्जन्ति ताण परप्परं वेरं ॥५०॥

स्थिरवैरजीवरुधिरेण यस्य मिथुनस्य निम्बपत्रे ।
नामाक्षराणि लिख्यन्ते तयोः परस्परं [2]वैरम् ॥

नैसर्गिकत्वाद् यस्य युग्मस्य स्थिरमाजीवं वैरं तस्य काकोलूकयोऽश्वमहिषस्य वाऽन्यस्य वा कस्यचिद् रक्तेन पिचुमर्दपल्लवे संज्ञावर्णा लिख्यन्ते तयोः परस्परं प्रतिवैरं भवतीति ॥

[3]दिअदिअंवरकेसेहि मूसअमज्जाररोमसहिएहि ॥
अद्दासु कओ धूओ पिअंवि देस्सं जणं कुणइ ॥५१॥

[4]द्विजदिगम्बरयोः केशैर्मूषकमार्जाररोमसहितैः ।
आर्द्रासु कृतो धूपः प्रियमपि द्वेष्यं जनं कुरुते ॥

ब्राह्मणक्षपणकयोः सम्बन्धिभिः केशैस्तथोन्दुरुवृषदंशयो रोमभिः सहितैरार्द्रासु रौद्रे नक्षत्रे कृतो धूपो यस्य द्वेष्यस्य शरीरे वाससि वा दीयते तं प्रियमपि द्वेष्यं करोतीति ॥

सुरदारुतअरसुरसासुमुह[5]फल[6]गुडवआविसाणेहि ॥
एसो पुणोवि पेमं करेइ मुणिणिम्मिओ धूओ ॥५२॥

सुरदारुतगरसुरसासुमुख[7]फलगुडवचाविषाणैः ।
एष पुनरपि प्रेम करोति मुनिनिर्मितो धूपः ॥

सुरदारुर्देवदारुः, तगरं कुटिलं, सुरसा मञ्जुका, सुमुखो बृहत्पत्रस्तद्बीजानि, ([6]गुड़ं शर्करा), वचोग्रगन्धा, विषाणं कुष्ठम् एतैर्मुनिसंख्यैः सप्तभिर्द्रव्यैः, मुनिनिर्मितो मुनिभिर्वा तपोधनैः कैश्चित् प्रणीतोऽयं धूपो नष्टामपि प्रीतिं पुनरुत्पादयतीति । पूर्वोक्तप्रयोगप्रतिविधानमेतदिति ॥

---

१ सुचिराद्–ख. । २ नित्यवैरम्–ख. । ३ केसेहिदिअदिअम्बराण–ख. । ४ केशैर्द्विजदिगम्बरयोः–ख. ।
५ बीअ ? । ६ गुडपदार्थो व्याख्यायां नोपलभ्यते । ७ बीज–ख. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

घेत्तूण[1] जस्स णाम णिक्खिप्पइ हम्मिओअरे णिहुअं ॥
मअणारचरणाकस्सणरज्जू सो णूणमुव्वसइ ॥५३॥

गृहीत्वा यस्य नाम निक्षिप्यते हर्म्योदरे निभृतम् ।
मृतनरचरणाकर्षणरज्जुः स नूनमुद्वसति ॥

हर्म्योदरे उपरितनमन्दिरस्याभ्यन्तरे यन्नामग्रहणपूर्वकं परासुपुरुषपादाकर्षणदामोत्क्षिप्यते तद्गृहमुद्वसतीति ।

अइरा वड्ढन्तोद्दामदुक्खसंदावखविअजणणिवहं ॥
उव्वसइ घरं पुरिसट्ठिसंकुणा दारणिहिएण ॥५४॥

अचिराद् वर्धमानोद्दामदुःखसन्तापक्षपितजननिवहम् ।
उद्वसति गृहं पुरुषास्थिशङ्कुना द्वारनिहितेन ॥

यस्य गृह (स्य) द्वारदेशे नरकीकसकीलको निखन्यते तद्गृहमुक्तविशेषणविशिष्टमुद्वसतीति ॥

मज्झण्हलुठिअखरभूमिरेणुणा वामहत्थणिहिएण ॥
कुट्टणिघरम्मि कलहमणुदिअहमणुट्ठिअं होइ ॥५५॥

मध्याह्नलुठितखरभूमिरेणुना वामहस्तनिहितेन ।
कुट्टनीगृहे कलहमनुदिवसमनुष्ठितं भवति ॥

मध्याह्नकाले लुठितः परिवर्तित शरीरः खरो रासभो यस्यां भूमौ तद्धूलिर्यस्मिन् गृहे वामहस्तेन गृहीत्वा क्षिप्यते तत्र सततं कलिर्भवतीति ॥

हरदइअसिहंडिपुरीसहलिणिजीअहरविरइओ धूओ ॥
सूलच्छरुहिरसहिओ जणेइ मोहं विअम्भन्तो ॥५६॥

हरदयितशिखण्डिपुरीषहलिनीजीवहरविरचितो धूपः ।
शूलाक्षरुधिरसहितो जनयति मोहं विजृम्भमाणः ॥

हरदयितो धत्तूरः, शिखण्डिपुरीषं मयूरशकृत्, हलिनी लाङ्गली, जीवहरं विषम्, तैर्महिषरुधिरसहितैर्विरचितो धूपो विजृम्भमाणः प्रसरन् मोहं निःसंज्ञत्वं करोतीति ॥

सूलच्छरुहिरद्दीकअकणअपंचंगविसकलासहिओ ॥
धूओ णिसासु मोहं जणेइ पुरमीसिओ दिण्णो ॥५७॥

१ घिचूण—ख. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

शूलाचरुधिरार्द्रीकृतकनकपञ्चाङ्गविषकलासहितः ।
धूपो निशासु मोहं जनयति पुरमिश्रितो दत्तः ॥

महिषरुधिरेणार्द्रीकृतानि कनकस्य कितवस्य यानि मूलत्वक्पत्रपुष्पफलरूपाणि पञ्चाङ्गानि तैः, विषकला विषस्य षोडशोंशः, तेन सहितस्तथा गुग्गुलुना मिश्रितो निशासु प्रयुक्तो धूपो मोहं जनयतीति ॥

अजअरपुरीसधूओ तणजलुआवहलचुण्णधूओ व ॥
दिण्णो जणेइ मोहं ता जा रविदंसणं जाअं ॥५८॥

अजगरपुरीषधूपस्तृणजलौकोवहलचूर्णधूपो वा ।
दत्तो जनयति मोहं तावद् यावद् रविदर्शनं जातम् ॥

अजगरस्य महासर्पस्य सम्बन्धिना शकृता कृतो धूपः, [1]तथा स्थलजलौकसां कृमिविशेषाणां प्रभूतेन शरीरचूर्णेन कृतो यो धूपः स[2]वा प्रयुक्तः सन्नासूर्योदयान्मोहं जनयति, तेन रात्रौ प्रयोक्तव्य इत्युक्तं भवतीति ॥

[3]दिंडुहतेल्लोल्लालत्तअवत्तिणिम्मिअपईवकंतीइ ॥
फिक्कस्स होइ णूणं मइमोहो सअललोअस्स ॥५९॥

जलसर्पतैलार्द्रीकृतालक्तकवर्त्तिनिर्मितप्रदीपकान्त्या ।
स्पृष्टस्य भवति नूनं मतिमोहः सकललोकस्य ॥

जलसर्पाद् गृहीतेन तैलेन सिक्ता यासौ लाक्षारसलिप्ता वस्त्रमयी वर्त्तिस्तया निर्मितः प्रज्वालितो यः प्रदीपस्तस्य दीप्त्या स्पृष्टस्य जन्तोश्चित्तमोहो जायत इति ॥

गहिअं णच्चणविहिणा पुच्छं मुरुलीइ धूवजुत्तीइ ॥
णच्चावेइ जणं सअ पंचंगुन्मत्तअसणाहं ॥६०॥

गृहीतं नर्तनविधिना पुच्छं [4]मुरुल्या धूपयुक्तया ।
नर्तयति जनं सदा पञ्चाङ्गोन्मत्तकसनाथम् ॥

मुरुली प्राणिविशेषो धर्मणीति क्वचित् प्रसिद्धा, तस्या लाङ्गूलं पञ्चाङ्गमातुलसहितं नृत्यता पुरुषेण गृहीतं धूपयुक्त्या प्रयुक्तं सत्, यं जनं प्रति प्रयुज्यते तं नर्त्तयतीति ॥

पुच्छं हालाहलस्स जा फन्दइ विच्छिण्णअं ।
ता मुक्कवसणेहि णच्चिज्जइ सविलासअं ॥

---

१ अथवेति पाठान्तरम् । २ पाठान्तरे 'वा' इत्येतत् पदं न प्रयोक्तव्यम् । ३ डुंडुह ! । ४ सरल्येति-पाठान्तरम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

घेत्तूण[1] तं भवणपईवस्स वत्तिमज्झणिहित्तं ।
खललोअं कन्तीए णच्चावेइ छिविज्जन्तं ॥६१॥

पुच्छं हालाहलस्य यावत् स्पन्दते विच्छिन्नकं
तावन्मुक्तवसनैर्नृत्यते[2] सविलासम् ।
गृहीत्वा[1] तद् भवनप्रदीपकस्य वर्त्तिमध्यनिहितं
खललोकं कान्त्या नर्त्तयति[3] स्पृश्यमानम् ॥

हालाहलस्य ब्राह्मणीत्युक्तस्य प्राणिविशेषस्य पुच्छं छिन्नं सद् यावच्चलत् तिष्ठति तावद् दिगम्बरैः प्रयोक्तृभिर्नर्त्तितव्यम् । ततो निवृत्तस्पन्दं तद् गृहीत्वा गृहदीपकवर्त्तिमध्ये निक्षेप्तव्यम् । तत् कान्त्या लोकं संस्पृशन्नर्तयतीति ॥

जावअपडपरिवेट्ठिअजलसप्पिणीचुण्णरइअवत्तीइ ॥
कअगब्भपदीवसिहा करेइ विअअवसणां महिलां ॥६२॥

यावकपटपरिवेष्टितजलसर्पिणीचूर्णरचितवर्त्त्या ।
कृतगर्भप्रदीपशिखा करोति[4] विगतवसनां महिलाम् ॥

लाक्षारञ्जितवस्त्रवलिता यासौ जलसर्पिस्या[5] जलौकसः शरीरचूर्णेन रचिता वर्त्तिस्तया कृतगर्भा ततो ज्वलिता दीपज्वाला स्त्रियं निजालोकस्पृष्टां दिगम्बरां करोतीति ॥

वत्तीधूअपओआ णिवातभवणोअरे पउज्जन्ति ॥
णिअरक्खा कीरइ गोघएण णासाइ अब्भंगा ॥६३॥

वर्तिधूपप्रयोगा निवातभवनोदरे प्रयुज्यन्ते ।
निजरक्षा क्रियते गोघृतेन नासिकाया अभ्यङ्गात् ॥

वर्तीनां धूपानां च प्रयोगा वातरहितगृहाभ्यन्तरे प्रयुज्यन्ते । आत्मरक्षा गव्यघृतेन घ्राणाभ्यन्तरे लेपात् क्रियते, येन प्रयोक्तुः प्रयोगफलमात्मनि नबाधत इति । अनेन वर्तिधूपप्रयोगाणां सर्वेषामितिकर्तव्यतोक्तेति ॥

णिहुडुङ्गिदुद्धभाविअलुञ्चिअतिलतेल्लमक्खिआ चिहुरा ॥
णवणिग्गअकासपसूअसरिच्छा होन्ति लोअस्स ॥६४॥

निहुडङ्गीदुग्धभावितलुञ्चिततिलतैल[6] म्रक्षिताश्चिकुराः ।
नवनिर्गतकाशप्रसूनसदृशा भवन्ति लोकस्य ॥

---

१ पदमेतदन्यत्र न दृश्यते । २ नर्त्तितव्यम्-ख. । ३ स्पृष्टम्-ख. । ४ विवसणां-ख. । ५ जलौकायाः ? । ६ म्रक्षिता-ग. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

निहुड्डङ्गी सुधावृक्षः, तत्क्षीरेण भावितानामार्द्रीकृतानां ततो लुञ्चितानां निस्तुषीकृतानां ततः शुष्काणां तिलानां सम्बन्धि यत् तैलं तेनाभ्यक्ताः केशाः शुक्लीभवन्तीत्युपमानार्थः ॥

अतुडिअकडुदुद्धिअमज्झविणिहिओ पक्खमात्तपरिवसिओ ॥
लेवेण कुणइ तअरो चिहुरचअं ससिअरसरिच्छं ॥६५॥

अत्रुटितकटुदुग्धिकामध्यविनिहितः पक्षमात्रपर्युषितः ।
लेपेन करोति तगरश्चिकुरचयं शशिकरसदृक्षम् ॥

अत्रुटितावस्थायामेव स्थिता यासौ कटुदुग्धिका तिकालाबुतुम्बिका तन्मध्ये तदभ्यन्तरे निक्षिप्तः सन् तत्रैव पक्षमात्रं पर्युषितस्तगरः कुटिलः पिष्टः सँल्लेपेन केशसमूहं शुक्लीकरोतीत्युपमानार्थः ॥

आआसिअधवलतुरङ्गमस्स सेओल्लिओ सिअं कुणइ ॥
अहरं अलत्तओ ता जा ण लहइ मिच्छिआतेल्लं ॥६६॥

[1]आयासितधवलतुरङ्गमस्य स्वेदार्द्रीकृतः सितं कुरुते ।
अधरमलक्तकस्तावद् यावन्न लभते [2]मिश्रातैलम् (?)॥

[3]आयासितस्य बहुधावितस्य श्वेताश्वस्य गात्रस्वेदेनार्द्रीकृतः संल्लाक्षारसो लेपेनाधरं शुक्लीकरोति, तमिन्द्रा(?)बीजतैलं पुनः प्रकृतिमापादयतीति ॥

हरदइअकुसुमरसोगुंढिआण कुसुमाण पडइ गन्धेण ॥
पअइं पावेइ णरो सोवीरअणावणे दिण्णे ॥६७॥

हरदयितकुसुम[4]रसावगुण्ठितानां कुसुमानां पतति गन्धेन ।
प्रकृतिं प्राप्नोति नरः सौवीरकनावने दत्ते ॥

हरदयितो मातुलः, तत्पुष्पमकरन्देन परिवलितानि कानिचित् पुष्पाणि, तेषामाघ्रायमाणेनामोदेन मोहाविष्टः पतति । [5]सौवीरकं शैलाञ्जनं, तेन नस्ये दत्ते स्वस्थो भवतीति ॥

कुलिशतरुदुद्धभाविअपिप्पलिचुण्णेण चिहुरपब्भारो ॥
णासइ मज्जणसमए आमलअमज्झम्मि दिण्णेण ॥६८॥

कुलिशतरुदुग्धभावितपिप्पलीचूर्णेन चिकुरप्राग्भारः ।
नश्यति मज्जनसमये आमलकमध्ये दत्तेन ॥

कुलिशतरुः सुधावृक्षः, तत्क्षीरभावितेन मागधिकातण्डुलचूर्णेन लिप्तः केशकलापो नश्यति, [6]उन्मूलत्वमायाति । स्नानसमय आमलकैः सह दत्तेनेति गोपनार्थः प्रकारनिर्देशइति ॥

१ प्रायासित-ख. । २ मन्द्रातैलम्, भ्रिस्त्रातैलम्-ख. । ३ प्रायासितस्य-ख. । ४ रजोगुण्ठितानां-ख. । ५ सौवीरजं-ख. । सौवीराञ्जनमित्यपि पाठान्तरम् । ६ उन्मूलयितुमायाति-ख. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

छीरल्लिदुद्धभाविअरोहिअतिमिपिसिअसाहिअं हरइ ।।
तेल्लमब्भंगविहिणा सहसव्विअ रोमसंघाअं ।।६९।।

चीरलतादुग्धभावितरोहिततिमिपिसितसाधितं हरति ।
तैलमभ्यङ्गविधिना सहसैव रोमसंघातम् ।।

चीरलतायाः सुधायाः चीरेण भावितं [1]यद् रोहितकाख्यस्य मत्स्यस्य मांसं तेन साधितं यत् तैलं तदभ्यङ्गो रोमाणि झगिति शातयति। शाधनप्रकारः- यत् साध्यते मांसं तच्चतुर्गुणं जलं काथयित्वा तैलमेत्र ग्राह्यमिति ।अनुक्तसाधनप्रकाराणां स्नेहानामयमेव साधनविधिः प्रायेणेति ।।

णासाणिउंजविणिहिए छुच्छुन्दरीचुण्णम्मि णिपडंति ।।
उट्ठंति मलअणावणपाणेण तुरंगमा तुरिअं ।।७०।।

नासानिकुञ्जविनिहिते[2] छुच्छुन्दरीचूर्णे निपतन्ति ।
उत्तिष्ठन्ति मलयनावनपानेन तुरङ्गमास्त्वरितम् ।।

नासिकाविवरनिक्षिप्ते सति सुगन्धमूषिकाशरीरचूर्णेऽश्वाः पतन्ति, चन्दनेन दत्तनस्यपानाः सन्त उत्तिष्ठन्तीति ।।

विगअतुसकसणजीरअचुण्णंचिअलोअणा ण पेक्खन्ति ।।
पेक्खन्ति तह पुणोवि हु तुरंगमा तक्कभरिअच्छा ।।७१।।

विगततुषकृष्णजीरकचूर्णाञ्चितलोचना न प्रेक्षन्ते ।
प्रेक्षन्ते ततः पुनरपि खलु तुरङ्गमास्तक्रभरिताक्षाः ।।

निस्तुषीकृतं यत् कृष्णजीरकं कालोपकुञ्चिका तच्चूर्णेन दत्ताञ्जनानि नेत्राणि येषां तादृशाः सन्तो वाजिनोऽन्धीभवन्ति । ते पुनरपि तक्रेण गोरसेन पूरितनेत्राः सन्तः प्रेक्षन्ते निवृत्तान्ध्या भवन्तीति ।।

णिअमअजलंजिअच्छो समरे सुरवारणं पि रभसेण ।।
णासेइ गलिअदप्पं पईहि पडहो पि माअंगो ।।७२।।

निजमदजलाञ्जिताक्षः समरे सुरवारणमपि रभसेन ।
नाशयति गलितदर्पं प्रतीहि सूक्ष्मोपि मातङ्गः ।।

[3]स्वदानाम्भसा दत्ताञ्जननेत्रः कुञ्जर ऐरावणमपि उद्योगेन प्रशान्तदर्पं करोति किमुतान्यम् । अत्र प्रतीहि प्रत्ययं भावय । सूक्ष्मोपीत्यतिशयोक्तिरिति ।।

---

१ यत्तद्-ख. । २ विनिहित-ख. । ३ स्वमदानामम्भसा-ख. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

करगहिअसुअन्धोन्दुरीचुण्णपहावा ण संमुहो होइ ॥
आलाणं पि हु परिहरइ वारणो तेण कअलेवं ॥७३॥

करगृहीतसुगन्धोन्दुरीचूर्णप्रभावान्न संमुखो भवति ।
आलानमपि खलु परिहरति वारणस्तेन कृतलेपम् ॥

सुगन्धोन्दुरी छुच्छुन्दरी, तत्कायचूर्णस्य हस्तगृहीतस्य प्रभावाद् गजो न संमुखो भवति, पलायत इत्यर्थः, तथा तेन चूर्णेन लिप्तमालानं बन्धनस्तम्भं परिहरति, ततोऽपि पलायत इत्यर्थः ॥

करणक्खत्तोप्पाडिअलांगलिआकन्दलेपिअसरीरो ॥
भीमस्स वि भीमपरक्कमस्स दप्पं णरो हरइ ॥७४॥

करनक्षत्रोत्पाटितलाङ्गलिकाकन्दलिप्तशरीरः ।
भीमस्यापि भीमपराक्रमस्य दर्पं नरो हरति ॥

करनक्षत्रेण हस्तनक्षत्रेणोत्पाटितं यल्लाङ्गलीकन्दं हलिनीमूलं तेन पिष्टेन समालब्धसकलगात्रः पुरुषो भीमसेनस्यापि महाबलस्य दर्पं हरति किमुतान्यस्येत्यतिशयोक्तिरिति ॥

चरणेण समं दिण्णा सुरवारुणिमूलविरइआ गुलिआ ॥
चिरआलपोसिअस्स वि हरइ बलं तंबचूडस्स ॥७५॥

चरणेन समं दत्ता सुरवारुणीमूलविरचिता गुलिका ।
चिरकालपोषितस्यापि हरति बलं ताम्रचूडस्य ॥

चरणमाहारद्रव्यं, तेन सह दत्ता यासौ सुरवारुण्या विशालाया मूलेन कृता गुलिका सा कुक्कुटस्य बहुकालपोषितशरीरस्यापि बलं शमयतीति ॥

मज्जारवसालित्तो चम्मेण वि तस्स धूविअसरीरो ॥
जुज्झम्मि तम्मचूडो णिहणइ बलिअं पि पडिपक्खं ॥७६॥

मार्जारवसालिप्तश्चर्मणाऽपि तस्य धूपितशरीरः ।
युद्धे ताम्रचूडो निहन्ति बलिनमपि प्रतिपक्षम् ॥

मार्जारो वृषदंशः, तद्वसया लिप्तस्तथा तस्याजिनेन दत्तधूपः कुक्कुटो युद्धे बलाधिकमपि प्रतिपक्षं कुकुटं निसूदयतीति ॥

कल्लपालावणविणिहित्ते वउलतरुकामरुक्खफलअम्मि ॥
सुरसा वि होइ मइरा सहसत्ति कंजिअसरिच्छा ॥७७॥

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कल्यपालापणविनिहिते वकुलतरुकामवृक्षफलके ।
सुरसापि भवति मदिरा सहसैव काञ्जिकसदृक्षा ॥

कल्यपालस्य [1]शौण्डिकस्यापणे विक्रयस्थाने निक्षिप्ते वकुलतरौ केसरवृक्षे जातस्य कामवृक्षस्य वृक्षान्तरस्य वन्दाक इति प्रसिद्धस्य फलके सति तत्रापणे स्थिता सुरसापि सुरा काञ्जिकतुल्या भवति। तस्मिन्नुद्धृते प्रकृतिमापद्यत इति ॥

काऊण कइकपाले दुप्फस्सकरंजवीअसंजुत्तं ॥
जाइ मइराइ थोअं ताविज्जइ सूरकिरणेहि ॥
सा विअलिअणिअरसा ता ण मुंचइ अम्मिलत्तणमसेसं ॥
जा तम्मि कइकवाले णकअं जलमीसिअं दुद्धं ॥७८–७९॥

कृत्वा कपिकपाले दुःस्पर्शकरञ्जवीजसंयुक्तम् ।
यस्या मदिरायाः स्तोकं ताप्यते सूर्यकिरणैः ॥
सा विगलितनिजरसा तावन्न मुञ्चत्यम्लत्वमशेषम् ॥
यावत् तस्मिन् कपिकपाले न कृतं जलमिश्रितं दुग्धम् ॥

युगलकस्यायमर्थः—यस्याः सुरायाः कचिद् भाण्डकादौ स्थितायाः स्तोकमुद्धृत्य मर्कटशिरः-कर्परे निक्षिप्तं सद् दुःस्पर्शकरञ्जस्य कटुकरञ्जस्य बीजैर्मिश्रितं च सूर्यकिरणैस्तापितं क्रियते सा सुरा भाण्डस्थिता नष्टस्वरसा तावदम्लत्वं समग्रं न त्यजति यावत् तस्मिन् कपिकपाले सजलं क्षीरं न निक्षिप्यते। तस्मिंस्तु निक्षिप्ते सा सुरा प्रकृतिस्था भवतीति ॥ युगलकम् ॥

वालेअरुहिररंजिअरूविअसिचएण दारणिहिएण ॥
कल्लालावणमज्झट्ठिआ वि विरसा सुरा होइ ॥८०॥

वालेयरुधिररञ्जित[2]रूपिकसिचयेन द्वारनिहितेन ।
कल्यपालापणमध्यस्थितापि विरसा सुरा भवति ॥

खररुधिरेण लिप्तं यद् रूपिकस्यार्कवृक्षस्य सम्बन्धि कार्पासप्रायं फलान्तर्गतं द्रव्यं तेन निर्मितं यद् वस्त्रं तेन शौण्डिकगृहद्वारस्थितेन सता विक्रयस्थानान्तर्गतापि सुरा विरसा भवतीति। वस्त्रापासनेन पुनः प्रकृतिमापद्यत इति ॥

रअसंगअकामकिसोरवालकडअम्मि भुजलआवद्धे ॥
होइ दिअंवरलिंगमुद्धं समारोविए सिढिलं ॥८१॥

---

१ शोण्डिकस्यापाने–ख. ।२ रूपिकांशुकेन–ख. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

रतसङ्गतकामकिसोरबालकटके भुजलतावद्धे ।
भवति दिगम्बरलिङ्गमूर्ध्वं समारोपिते श्लथम् ॥

रतलग्नस्य [1]संभोगसंस्थितस्य कामकिशोरस्य खरस्य पुच्छाद् बालान् रोमाणि गृहीत्वा यः कटको निर्मितस्तस्मिन् बाहुशिखरमार्गमारोप्यमाणे दिगम्बरस्य नग्नक्षपणकस्य ध्वज उत्थितो भवति । प्रयोक्त्रा तस्मिन् कटके बाहोराकृष्टे सति पुनः पततीति ॥

सुरअट्ठिअखरपुच्छरुहपोअजम्बुअपुरीसवदरेहि ॥
करकडअमुद्धणीअं कडिल्लसवणेइ महिलाण ॥८२॥

सुरतस्थितखरपुच्छरुहप्रोतजम्बुकपुरीषवदरैः ।
करकटकमूर्ध्वनीतमधोवस्त्रमपनयति महिलानाम् ॥

पूर्ववत् खरपुच्छलोमानि गृहीत्वा शृगालमलमध्यनिष्क्रान्तैर्वदराण्डैर्यत् कटकं निर्मितं तद् बाहुन्यस्तं सत् पूर्ववदूर्ध्वनीतं[2] स्त्रीणामधरपरिधानमुत्क्षिपतीति ॥

[3]करदिअसगहिअमहिरोविआइ हलिणीइ मुद्दिओ थअइ ॥
गब्भो गब्भवईए ता जा सा णुक्खआ थद्धो ॥८३॥

करदिवसगृहीतमहीरोपितया हलिन्या मुद्रितस्तिष्ठति ।
गर्भो गर्भवत्यास्तावद् यावत् सा नोत्खाता ततः ॥

गर्भवत्या अन्तर्वत्न्या गर्भोऽन्तर्गतो जन्तुस्तिष्ठति न प्रवर्तते । कीदृशं सत्- हलिन्या लाङ्गल्या मुद्रितः स्तम्भितः । कीदृश्या सत्या - हस्तनक्षत्रयुक्तदिनगृहीतया तदनु देवदत्ताया गर्भस्तम्भो भवत्विति तद्गृहभूमौ निक्षिप्तया । तावत् तिष्ठति यावदसौ हलिनी ततो भूमेः पुनर्नोद्धृता । उद्धृतायान्तु गर्भः प्रवर्तत इति ।

महिसमहासउणपिसिअसिद्धत्थअतेल्लसाहिअं रसअं ॥
जा भुंजइ गब्भवई ताइ सुओ होइ जच्चंधो ॥८४॥

महिषमहाशकुनपिशितसिद्धार्थकतैलसाधितं रसकम् ।
या भुङ्क्ते गर्भवती तस्याः सुतो भवति जात्यन्धः ॥

महिषस्य शूलाक्तस्य तथा महाशकुनस्य कौशिकस्य च मांसेन तथा सर्षपतैलेन साधितं यूषं या भुङ्क्तेऽन्तर्वत्नी सा जात्यन्धं सुतं सूत इति ॥

होइ महाणसणिहिए चिल्लअभवकामरुक्खफलअम्मि ॥
सिद्धं तित्तमसेसं पि भोअणमुक्खाए सुरसं ॥८५॥

---

१ सम्वासंस्थितस्य-ख. । २ नीतं सत्-ख. । ३ करदिएणगहिअ-ख. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

भवति महानसंनिहिते चिल्लकभवकामवृक्षफलके ।
सिद्धं तिक्तमशेषमपि भोजनमुत्खाते सुरसम् ॥

चिल्लकं वृक्षविशेषः, तदुद्भवस्य कामवृक्षस्य वृक्षान्तरस्य फलके पचनस्थानन्यस्ते तत्र सिद्धं सर्वमेव भोजनं तिक्तं सम्पद्यते । उत्खाते तु तस्मिन् [1]मिष्टं भवतीति ॥

सिसुमारट्ठिपरिट्ठिअवेतसतरुदारुमहणसंभूओ ॥
जलसिच्चन्तोपि सिही पज्जिज्जइ विज्जजलणोव्व ॥८६॥

शिशुमारास्थिपरिस्थितवेतसतरुदारुमथनसंभूतः ।
जलसिच्यमानोऽपि शिखी प्रदीप्यते विद्युज्ज्वलनइव ॥

शिशुमारो मत्स्यविशेषः, तत्सम्बन्धिकीकसे निवेशितं यद् वेतसतरुदारु, तन्मथनेन सम्भूतोऽग्निर्जलेनाभिवृष्टोपि प्रज्वलति न तु शाम्यति, वैद्युताग्निवत् । स हि जलमध्येपि ज्वलतीति ॥

सलिलपवंगविहंगट्ठिखंडकअमन्थणाहि उप्पण्णो ॥
वाडवजलणोव्व जलेवि जलइ जलणो णिरासंको ॥८७॥

[2]सलिलप्लवङ्गविहङ्गास्थिखण्डकृतमन्थनादुत्पन्नः ।
वाडवज्वलनइव जलेऽपि ज्वलति ज्वलनो निराशङ्कः ॥

जले प्लवङ्गाः प्लवनशीला ये विहङ्गाः, जलचराः पक्षिण इत्यर्थः, तेषां सम्बन्धिनाऽस्थिखण्डेन कृतं यन्मथनं परस्परनिघर्षस्तत उत्पन्नोऽग्निरौर्वानलवज्जलेऽपि ज्वलति निःशंसयमिति ॥

सिहितम्मचूलकलरवपुरीसहरिआलकणअतरुचुण्णं ॥
उम्मत्तं कुणइ जणं ता जास्स ण मुंडिअं सीसं ॥८८॥

शिखिताम्रचूडकलरवपुरीषहरितालकनकतरुचूर्णम् ।
उन्मत्तं करोति जनं तावद्यावदस्य न मुण्डितं शीर्षम् ॥

मयूरकुक्कुटपारावतानां पुरीषं तथा हरितालं तथा पञ्चाङ्गं धुत्तूरकचूर्णम्, एतत् पुरुषस्य शिरसि दत्तं सदुन्मादं जनयति, मुण्डिते शीर्षेऽसौ निवर्तत इति ॥

जाहअपुरीसगब्भा[3] सिहंडिरुहिरेण भाविआ वत्ती ॥
अवहरइ विलगआण वि जलिआ जीअं भुअंगाण ॥८९॥

जाहकपुरीषगर्भा[4] शिखण्डिरुधिरेण भाविता वर्त्तिः ।
अपहरति विलगतानामपि ज्वलिता जीवं भुजङ्गानाम् ॥

---

१ मृष्टं—ख. । २ सलिलप्लवङ्गा जलचराः पक्षिणस्तथा विहङ्गा नभश्चराः सामान्यपक्षिणस्तेषां सम्बन्धिनाऽस्थिखण्डेनेत्यपि कैश्चिद् व्याख्यायते । ३ सगब्भा ? ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

जाहकः प्राणिविशेषः, तत्पुरीषेण सगर्भा पूरिता तथा मयूररक्तेन सिक्ता या वर्त्तिः सा ज्वलिता सती विलस्थानामपि सर्पाणां जीवमपहरतीति [1]किमुत बहिःस्थितानामिति ॥

घरपडलंतरविणिहिअचक्कंकजडापहावविहलंगा ॥
मुंचंति खणेण महाविसा वि फणिणो तमावासं ॥६०॥

गृहपटलान्तरविनिर्हितचक्राङ्कजटाप्रभावविह्वलाङ्गाः ।
मुञ्चन्ति क्षणेन महाविषा अपि फणिनस्तमावासम् ॥

गृहस्य पटलमाच्छादनं तदन्तरे निक्षिप्तायाश्चक्राङ्कजटायाः सुदर्शनामूलस्य प्रभावान्निसंस्थुलगात्राः सन्तः सर्पास्तद् गृहं तत्कालमेव परिहरन्तीति ॥

तेल्लाल्लपललमीसिअधोहरदुद्धं समासकुम्मासं ॥
रूविअदलेसु दिज्जइ वसाण कअगरुअदोसाण ॥
ते तं खाऊण चिरं सुवन्ति मअपसिहिलेहि अंगेहि ॥
कह कहवि लद्धसण्णा पुणो ण ढोअन्ति तत्थ घरे ॥६१–६२॥

तैलार्द्रपललमिश्रितसुधाक्षीरं समाषकुल्मापम् ।
रूपिकदलेषु दीयते वृषाणां कृतगुरुकदोषाणाम् ॥
ते तं खादित्वा चिरं स्वपन्ति मदप्रशिथिलैरङ्गैः ।
कथं कथमपि लब्धसंज्ञाः पुनर्न ढौकन्ते तत्र गृहे ॥

तैले सिक्तं यत् तिलचूर्णं तेन मिश्रं धोहरदुग्धं सुधाक्षीरं, तत् माषकृतैः कुल्माषैरपूपकैः सहितं, वृषाणां मूषिकाणामर्कवृक्षपत्रे प्रदीयते । कीदृशानाम् – कृतगुरुकदोषाणाम् । ततश्च किं भवतीत्याह– ते वृषास्तत् सुधाक्षीरं भुक्त्वा चिरं स्वपन्ति मोहमनुभवन्ति । कीदृशाः–मूर्च्छानिःसहगात्राः । अनन्तरं कथमपि प्राप्तप्रबोधास्तद् गृहमत्यन्तं परिहरन्तीति युगलकम् ॥

पशुपइजलाल्लहरिआलपललमज्जारपुरीषकअलेवो ॥
उन्दुरुणिउरुम्बं हरइ मूसिओ गेहवित्थारे ॥६३॥

पशुपतिजलार्द्रहरितालपललमार्जारपुरीषकृतलेपः ।
उन्दुरुनिकुरुम्बं हरति मूषिको गृहविस्तारे ॥

छागमूत्रपङ्कीकृतैर्हरितालतिलचूर्णवृषदंशमलैः कृतलेपो मूषको मूषिकसमूहमेव गृहाभोगगतं नाशयतीति ॥

१ किन्नु–ख. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

णासन्ति तुरिअतुरिअं जीअं घेत्तूण मक्कुणा झत्ति ॥
आलोअऊण सअणे वद्धं थलकुंभिआमूलं ॥६४॥

नश्यन्ति त्वरितत्वरितं जीवं गृहीत्वा मत्कुणा झटिति ।
आलोक्य शयने वद्धं स्थलकुम्भिकामूलम् ॥

स्थलकुम्भिका ओषधिविशेषः, तस्या मूलं शयने बद्धं दृष्ट्वा न केवलं [1]तत्र न ढौकन्ते यावज्जीवितरक्षार्थं सुतरां पलायन्ते। त्वरितत्वरितमिति नाशक्रियाविशेषणम्, झगितीत्यालोकनक्रियाया विशेषणमिति ॥

कक्कडवसापूरिअकुलीरकप्परअविरइओ गेहे ॥
आकरिसेइ पईवो पज्जलिओ मक्कुणसमूहं ॥६५॥

कर्कटवसापूरितकुलीरकर्परकविरचितो गेहे ।
आकर्षति प्रदीपः प्रज्वलितो मत्कुणसमूहम् ॥

कर्कटकुलीरौ मत्स्यविशेषस्य पर्यायौ, तत्र कर्कटस्य सम्बन्धिन्या वसया पूरितो योऽसौ कुलीरस्यास्थिखण्डस्तत्रविरचितः सन् प्रज्वलितो दीपो मत्कुणसमूह[2]मवकर्षति स्वसन्निकर्षमानयतीति॥

रवितूलरइअजावअसरिसवतेल्लालवत्तिआगब्भो ॥
हरइ पईवो गेहम्मि मक्कुणा जामिणीजलिओ ॥६६॥

रवितूलरचितयावकसर्षपतैलार्द्रवर्तिकागर्भः ।
हरति प्रदीपो गेहे मत्कुणान् यामिनीज्वलितः ॥

रवितूलोऽर्कवृक्षफलान्तर्वर्ति कर्पासरूपं द्रव्यं तेन रचिता तथा लाक्षारससर्षपतैलार्द्रा वर्तिर्गर्भेऽन्तरे यस्य तादृशः प्रदीपो गृहे रात्रौ प्रज्वलितः सन् मत्कुणान् हरति निर्वासयतीति ॥

धवलावराइआमूलककुहफलकुसुमपुरविलंगेहि ॥
सिरिवासअभल्लाअअलक्खासज्जरससंजुत्ते हि ॥
धूओ भवणब्भन्तरपसरंतोद्दामसंसलामोओ ॥
णासेइ भुअंगोन्दुरुघुणमक्कुणमसअजूआओ ॥६७-६८॥

धवलापराजितामूलककुभफलकुसुमपुरविडङ्गैः ।
श्रीवासकभल्लातकलाक्षासर्जरससंयुक्तैः ॥

१ तत्राढौकन्ते-ख. । २ मपकर्षति-ख. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

धूपो भवनाभ्यन्तरप्रसरदुद्दाममांसलामोदः ।
नाशयति भुजङ्गोन्दुरुघुणमत्कुणमशकयूकाः ॥

धवलापराजिता श्वेतगिरिकर्णिका, तस्या मूलम्, ककुभस्यार्जुनवृक्षस्य पुष्पफलानि, तथा पुरो गुग्गुलुः, विडिङ्ग कृमिघ्नम्, एतैस्तथा श्रीवासेन तथा भल्लातकेन तथा लाक्षया सर्जरसेन च कृतो धूपो गृहान्तः प्रसर्पदुत्कटघनगन्धः सर्पमूषिककाष्ठकृमिमत्कुणमशकयूका नाशयतीति ॥ युगलकम् ॥

तिफलाभल्लाअअककुहकुसुमसालजउविडंगेहि ॥
रणमीसिएहि धूओ मक्कुणमसआण विद्दवणो ॥९९॥

त्रिफलाभल्लातककुभकुसुमसालजतुविडङ्गैः ।
रणमिश्रितैर्धूपो मत्कुणमशकानां विद्रावणः ॥

सालः सर्जरसः, जतु लाक्षा, रणमुशीरम् । शिष्टं गतार्थम् ॥

इअ गलिअदप्पपसरा रिउणो एएहि विविहजोएहि ।
कीरंति णिअजणो वि हु रक्खिज्जइ परपउत्ताण ॥१००॥

इति गलितदर्पप्रसरा रिपव एतैर्विविधयोगैः ।
क्रियन्ते, निजजनोऽपि खलु रक्ष्यते परप्रयुक्तेभ्यः ॥

स्पष्टार्था गाथा ॥

एसो इत्थ समप्पइ कअन्तदूतो व्व दारुणसरूवो ॥
हरमेहलाइ विइओ रिउजणदमणो परिच्छेओ ॥१०१॥

एष इह समाप्यते कृतान्तदूत इव दारुणस्वरूपः ।
हरमेखलाया द्वितीयो रिपुजनदमनः परिच्छेदः ॥

स्पष्टा गाथा ॥

इअ हरमेहलाए दिइओ परिच्छेओ
समत्तो

इति हरमेखलाया द्वितीयः परिच्छेदः
समाप्तः

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

श्रीः

ॐ नमः शिवाय

अथ तृतीयः परिच्छेदः

वेसाण कए धुत्ता खवेन्ति कुट्टिणी विविहभङ्गीहि ॥
जइ ता विअ ण वसे ता किं कुट्टिणीहि खविआहि ॥१॥

वेश्यानां कृते धूर्त्ताः क्षपयन्ति कुट्टनीं विविधभङ्गीभिः ।
यदि ता एव न वशे तत् किं कुट्टनीभिः क्षपिताभिः ॥

पूर्वपरिच्छेदोक्तस्य कुट्टनीक्षपणकस्य यद्यपि वेश्यावशीकरणोपायतयोपन्यासः कृतः । तथापि वेश्यानामेव वशीकरणं मुख्यमिति तत्प्रयोजनं तृतीयपरिच्छेदोपन्यासस्य प्रतिपादयितुमेषा गाथा ॥ स्पष्टार्था ॥

अह दुव्विअद्धवेसासोहग्गगव्वविहडणसमत्थं ॥
अविहेअवसीअरणं भणिमो तइअं परिच्छेअं ॥२॥

अथ दुर्विदग्धवेश्यासौभाग्यगर्वविघटनसमर्थम् ।
अविधेयवशीकरणं भणामस्तृतीयं परिच्छेदम् ॥

प्रस्तुतपरिच्छेदप्रशंसाप्रयोजनप्रतिपादनार्था स्पष्टेयं गाथा ॥

उम्मत्तसुणअदाहिणदिअट्ठिफलअम्मि लिखिज्जइ जाए ॥
णामं अक्कंगारेण एइ सा कामिणी तुरिअं ॥३॥

उन्मत्तश्वदक्षिणादिगस्थिफलके लिख्यते यस्याः ।
नामार्काङ्गारेणैति सा कामिनी त्वरितम् ॥

उन्मत्तश्वाऽलर्क इति प्रसिद्धः, तस्य कायदक्षिणभागास्थिपट्टकेऽर्काङ्गारेण येन केन कज्जलेन वा 'अमुका वशमायात्वि' ति नाम लिख्यते सा वशीकर्तुमिष्टा स्त्री क्षिप्रमागच्छतीति ॥

अह कहवि ण एइ वसं पुव्वभणिए विहिम्मि णीसेसे ॥
ता ताविअम्मि मन्दाणलेण णामे धुवं एइ ॥४॥

अथ कथमपि नैति वशं पूर्वभणिते विधौ[1] निःशेषे ।
तत् तापिते मन्दानलेन नाम्नि ध्रुवमेति ॥

मन्दानले कुकूलाग्नौ । पूर्वगाथार्थविशेषणार्थैषा गाथा स्पष्टार्थेति ॥

---

१ निःशेषा-ख. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अद्दसणसिसुलालारोअणाहि तीसम्मि विरइओ विहिणा ॥
भंगरअमूलसहिओ कुणइ वसे तिहुअणं तिलओ ॥५॥

अदशनशिशुलालारोचनाभ्यां तिष्ये विरचितो विधिना ।
भृङ्गरजोमूलसहितः करोति वशे त्रिभुवनं तिलकः ॥

अजातदन्तबाल[१]जिह्वागतरसगोरोचनाभ्यां मार्कवमूलेन सह पुष्यर्क्षपिष्टाभ्यां कृतो विशेषक उक्तमर्थं करोतीति । विधिरत्र कुमारी द्रव्यं पिनष्टीति ॥

गोरोअणसिलारुणदलेहि रइअविसेसओ विलित्तो वा ॥
णरणारिणरिन्दपिओ होइ असज्झो विसाणं च ॥६॥

गोरोचनाशिलारुणदलै रचितविशेषको विलिप्तो वा ।
नरनारीनरेन्द्रप्रियो भवत्यसाध्यो विषाणां च ॥

गोरोचना प्रसिद्धा, शिला मनःशिला, अरुणं कुङ्कुमं, दलं तमालपत्रं, सुगन्धपत्रमिति प्रसिद्धम्, तैः कृततिलकः समालब्धाङ्गो वा पुंसां स्त्रीणां राज्ञां [२]च बल्लभो भवति विषाणां च स्थावरादीनामनाक्रमणीय इति ॥

भंगरअदेविधवलापराइआसिअवआहि णिम्मविओ ॥
गोरोअणासणाहो तिलओ भुअणं वसे कुणइ ॥७॥

भृङ्गरजोदेवीधवलापराजितासितवचाभिर्निर्मितः ।
गोरोचनासनाथस्तिलको भुवनं वशे [३]कुरुते ॥

मार्कवसहदेव(ी)श्वेतगिरिकर्णिकाश्वेतवचागोरोचनाभिः कृतस्तिलक उक्तमर्थं करोतीति ॥

कुणइ वसे वत्ती मीणपित्तगोरोअणाविणिम्मविआ ॥
सव्वकरकणिट्ठाविरइएण तिलएण तेलोक्कं ॥८॥

करोति वशे वर्त्तिर्मीनपित्तगोरोचनाविनिर्मिता ।
सव्यकरकनिष्ठाविरचितेन तिलकेन त्रैलोक्यम् ॥

मत्स्यपित्तगोरोचनाकृता या वर्त्तिः सा निघृष्टा वामहस्तकनिष्ठाङ्गुल्या विरचिततिलकोक्तकार्य-करोतीति ॥

गोरंभापित्तुब्भवसिहिचूडामोहणीसिलारइओ ॥
तेल्लोक्कवसीकरणो मुहम्मि णिव्वट्टिओ तिलओ ॥९॥

१ जिह्वागतनिस्यन्द ? । २ स-ख. । ३ करोति-ख. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

गोरम्भापित्तोद्भवशिखिचूडामोहनी[1]शिलारचितः ।
त्रैलोक्यवशीकरणो मुखे निर्वर्तितस्तिलकः ॥

गोरम्भा ओषधिविशेषः कचित् प्रसिद्धः, पित्तोद्भवा गोरोचना तथा मयूरशिखा, मोहनी–षट्पत्रिका, शिला मनःशिला, एताभिर्विरचितस्तिलको यथोक्तं कार्यं करोतीति ॥

विण्हुक्कंताभंगरअदेविधवलापराइआजडाहि ॥
पूसम्मि रोअणापाणीएण कुमारिपिट्ठाहि ॥
काऊण तिलअमिमिणा मअरद्धअणिद्धवान्धवसमेण ॥
कुणह वसे जीअलोअं दंसणपरिवड्ढिआणन्दं ॥१०–११

विष्णुक्रान्ताभृङ्गरजोदेवीधवलापराजिताजटाभिः ।
पुष्ये रोचनापानीयेन कुमार्या पिष्टाभिः ॥
कृत्वा तिलकममुना मकरध्वजस्निग्धवान्धवसमेन ॥
कुरुत वशे जीवलोकं दर्शनपरिवर्धितानन्दम् ॥

विष्णुक्रान्तया नीलपुष्प्या तथा मार्कवेण सहदेव्या श्वेतगिरिकर्णिकामूलेन चैत्यनेन द्रव्येण गोरोचनारञ्जितजलेन कन्यकया पिष्टेन तिलकं कृत्वोक्तं कार्यं सम्पादयतेति ॥ युगलकम् ॥

बहुसो उतुसोणिअभाविआइ गोरोअणाइ कअतिलआ ॥
जं जं पेक्खइ पुरुसं तं तं महिला वसे कुणइ ॥१२॥

बहुश ऋतुशोणितभावितया गोरोचनया कृततिलका ।
यं यं प्रेक्षते पुरुषं तं तं महिला वशे कुरुते ॥

स्वर्तुरजसा बहुवारं मिश्रीकृतया गोरोचनया रचितविशेषका बधूर्यमिच्छति तं दृष्टमात्रं वशीकुरुत इति ॥

रत्तहअमारकुसुमं सिद्धत्थअकुट्ठगअमओम्मीसं ॥
हरवल्लहोट्ठवारुणिसिअमक्कवमूलसंजुत्तं ॥
भूअदिणे पूसे वा [२]सीअअसलिलेण वट्टिअं विहिणा ॥
सइ सव्वभआरंभेसु तिलअमेअं करज्जासु ॥१३–१४॥

रक्तहयमारकुसुमं सिद्धार्थककुष्ठगजमदोन्मिश्रम् ।
हरवल्लभोष्ट्रवारुणीसितमार्कवमूलसंयुक्तम् ॥

---

१ निशा-ख. । १ सीअल-ख. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

भूतदिने पुष्ये वा [1]शीतजसलिलेन वर्तितं विधिना ॥
सदा सर्वभयारम्भेषु[2] तिलकमेतं कुर्यात् ॥

लोहितकरवीरकुसुमं सर्षपवाप्यकरिदानमिश्रितं धुत्त रकर्करभवारुणीशुक्लमार्कत्रमूलसंयुक्तं शीताम्बुना पिष्टं तिष्ये चतुर्दश्यां वा नित्यं सर्वभयनिवृत्त्यै तिलमेकतं कुर्यादिति ॥ युगलकम् ॥

एअंत्रिअ पाणे भोअणेव्व पूसम्मि पंचमलमिसिअं ॥
दिण्णं भुअणं पि वसे कुणइ सआ दासपडिरूवं ॥१५॥

एतदेव पाने भोजने वा पुष्ये पञ्चमलमिश्रितम् ।
दत्तं भुवनमपि वशे करोति सदा दासप्रतिरूपम् ॥

एतदेव पूर्वोक्तं द्रव्यं, देहजैः पञ्चभिस्तत्र [3]श्रुतिनयननासामुखत्वारिजैश्चतुर्भि[4]स्तथा त्वङ्मलेन पञ्चमेन मिश्रितं पाने भोजने वा दत्तं सदुक्तकार्यं करोतीति ॥

सिअसरिसवमसिअभुअंगमत्थए गअमएण संजुत्तं ॥
पुडडड्ढंचुण्णीकअमंजणमिणमं वसीकरणं ॥१६॥

सितसर्षपमसितभुजङ्गमस्तके गजमदेन संयुक्तम् ।
पुटदग्धं चूर्णीकृतमञ्जनमिदं वशीकरणम् ॥

गौरसर्षपाख्यं द्रव्यं कृष्णसर्पमस्तकाभ्यन्तरे न्यस्तं करिदानमिश्रितं पुटपाकदग्धं [5]संपिष्टमित्येवं कृतमिदमञ्जनं वशीकरणमिति । आममृत्पात्रद्वयस्याभ्यन्तरे द्रव्यं न्यस्य सन्धिस्थानं च लेपेन निर्विवरं कृत्वा पात्रद्वयपाकपर्यन्तं पच्यते तत्[6]पुटपाकदग्धमित्युच्यते ॥

होइ सिलानाएसरपिअंगुगोरोअणंजिअच्छीण ॥
णीसेसतरुणिजणवल्लहत्तणं सामिसम्माणं ॥१७॥

भवति शिलानागकेसरप्रियङ्गुगोरोचनाञ्जिताक्षाणाम् ।
निश्शेषतरुणीजनवल्लभत्वं स्वामिसंमानः ॥

मनःशिलानागकेसरश्यामागोरोचनाभिः कृतेनाञ्जनेनाञ्जितनेत्राणां पुंसामुक्तफलं भवतीति ॥

समतुलिअंजणचंदणपंकअदलरोअणापिअंगूहि ॥
अंजिअणअणो [7]चज्जं जं पेक्खइ तं वसे कुणइ ॥१८॥

समतुलिताञ्जनचन्दनपङ्कजदलरोचनाप्रियङ्गुभिः ।
अञ्जितनयन आश्चर्यं यं प्रेक्षते तं वशे कुरुते ॥

---

१ शीतलजलेन-ख. । २ तिलकमेवं-ख. । ३ मुखद्वारजैश्चतुर्भिः-ख. । ४ स्त्वङ्मलेन तथा पञ्चमेन-ख. ।
५ सत् पिष्टमित्येवं ? । ६ पुटपाकदग्धमुच्यते-ख. । ७ चुज्जमित्यन्यत्र पाठः ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

समतुलिताभिस्तुल्यभागाभिः सौवीराञ्जनचन्दनपद्मनमालपत्रगोरोचनाश्यामाभिः कृतेनाञ्जनेन रञ्जितनेत्रो दर्शनमात्रेण परं वशीकुरुत इति ॥

वहुसो वराहसोणिअभाविअपरिहाणजावककआइ ॥
सोवीरंजणमहुअरचुण्णसगब्भाइ वत्तीइ ॥
कोलवसाभरिअपईवगहिअकज्जलकअंजणा होन्ति ॥
सअलजणहिअअदइआ विहडिअपडिपक्खमाहप्पा ॥१९-२०॥

वहुशोवराहशोणितभावितपरिधानयावककृतया ।
सौवीराञ्जनमधुकरचूर्णसगर्भया वर्त्या ॥
कोलवसाभरितप्रदीपगृहीतकज्जलकृताञ्जना भवन्ति ।
सकलजनहृदयदयिता विघटितप्रतिपक्षमाहात्म्याः ॥

गाथायुगलस्यायमर्थः-बहुशो बहून् वारान् सूकरासृजा भावितं सच्छुष्कं यत् (परिधान-) यावकं लाक्षारसरञ्जितं वास उपचारात् तेन निर्मितया वर्त्या तथा सौवीराञ्जनेन शुष्कभ्रमरचूर्णेन च सगर्भया पूरितान्तरया । सूकरस्नेहेन पूरितो यः प्रदीपस्ततो गृहीतेन कज्जलेन कृताञ्जना रञ्जितनेत्रा उक्तफलभागिनो भवन्तीति ॥

सज्जरसविसाणवआभुअंगतुडिकामिणीहि णिम्मविओ ॥
सिअसिद्धत्थसणाहो धूओ सव्वत्थसिद्धिकरो ॥२१॥

सर्जरसविषाणवचाभुजङ्गत्रुटिकामिनीभिर्निर्मितः ।
सितसिद्धार्थसनाथो धूपः सर्वार्थसिद्धिकरः ॥

रालाकुष्ठवचानागकेसरसूक्ष्मैलाप्रियङ्गुभिर्निर्मितस्तथा गौरसर्षपैर्युक्तो धूपः सर्वार्थान् साधयतीति ॥

जलवाहमलअमहीधरजोइअसमभाअमीसिओ पूसे ॥
णिअलालासंजुत्तो धूओ सोहग्गसंजणणो ॥२२॥

जलवाहमलयमहीधरयोजितसमभागमिश्रितो पुष्ये ।
निजलालासंयुक्तो धूपः सौभाग्यसंजननः ॥

पुष्यर्क्षे मुस्तचन्दनशैलेयानां योजितैः समैर्भागैर्मिश्रीकृतस्तथा स्वमुखनिस्यन्दसहितो धूपः सौभाग्यं जनयतीति ॥

कंगुतआणाएसरपउमअमालूरकुडिलमंसीहि ॥
सव्वत्थ कुणइ सिद्धिं धूओ समभाअणिम्मविओ ॥२३॥

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कङ्गुत्वङ्नागकेसरपद्मकमालूरकुटिलमांसीभिः ।
सर्वत्र करोति सिद्धिं [1]धूपः समभागनिर्मितः ॥

कङ्गुः प्रियङ्गुः, त्वग् भृङ्गः, नागकेसरपद्मके प्रसिद्धे, मालूरं विल्वं, कुटिलं तगरं, मांसी नलदः, एतैर्द्रव्यैस्तुल्यांशैः कृतो धूप उक्तकार्यं [2]करोतीति ॥

लहुमलअकुट्ठकुङ्कुमसुरकरिणवकुसुमसलिलकअधूओ ॥
वअअ णरिन्दभवणं जइ इच्छह तं वसे काउं ॥२४॥

लघुमलयकुष्ठकुङ्कुमसुरकरि[3]नवकुसुमसलिलकृतधूपः ।
व्रजत नरेन्द्रभवनं यदीच्छथ तं वशीकर्तुम् ॥

लघु कृष्णागुरु, मलयं चन्दनम्, कुष्ठं विषाणम्, कुङ्कुमं काश्मीरजम्, सुरो देवदारुः, करी नागकेसरम्, [4]नवं परिपेलवं कुसुमसलिलं माध्विकम्, एतैः कृतो धूपो यैस्ते तथाविधाः सन्तो राजगृहं गच्छत यदि राजानं वशीकर्तुकामाः स्थेति ॥

कण्णावरणे कामिणिसमाअमे पण्णविक्कए तुरिअं ॥
एसो विअ सिद्धिअरो धूओ चिन्तामणी णाम ॥२५॥

कन्यावरणे कामिनीसमागमे पण्यविक्रये त्वरितम् ।
एष एव सिद्धिकरो धूपश्चिन्तामणिर्नाम ॥

अस्यैव फलान्तरप्रतिपादनार्था गाथा स्पष्टार्थेति ॥

कररुहकललकुन्द[5]कालाउरुदललक्खासणाहओ ॥
चलमालाविसाणमलउब्भवविरइअसमभाअओ ॥
मअणमहाणरिन्दणवणिम्मिअसरासणप्पढमदूअओ ॥
कुणइ वसे सअलं भुअणं वि हु एसो सुअन्धधूअओ ॥२६॥

कररुहकललकुन्द[5]कालागुरुदललाक्षासनाथः ।
चलमालाविषाणमलयोद्भवविरचितसमभागः ॥
मदनमहानरेन्द्रनवनिर्मितशरासनप्रथमदूतः ।
करोति वशे सकलं भुवनमपि खल्वेष सुगन्धो धूपः ॥

---

१ धूपैः समभागनिर्मितैः-ख. । २ कारयतीति-ख. । ३ वन्य-ख. । ४ वन्यं-ख. । १ 'लहु' इति, २ लघु इति च व्याख्यानुसारी पाठः ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

करुहो नखः, कललं मांसी, कुन्दः कुन्दुरुः, लघुः कृष्णागुरुः, दलं गन्धपत्राणि, लाक्षा प्रसिद्धा, एतैः सहितः, चलं सिह्लकं, माला स्पृक्का, विषाणं कुष्ठं, मलयोद्भवं चन्दनम् एतैर्विरचितास्तुल्यभागा यस्य सः, समांशैरेतैः सर्वैरित्यर्थः । सुगन्धधूपोऽयमत्यन्तसौभाग्यप्रदत्वात् स्मरशराग्रदूतकल्प उक्तार्थक्रियाकर इति[1]॥

मलआरुणगिरिमअंककन्दलीसमकअभाअओ ॥
गअदाणसिलापिअंगुरससरिसवसंजुत्तओ ॥
धूओ मअरद्धओव्वविहड़िअ[2]जुवइजणमाणमाहम्मो ॥
भुअणं ससुरासुरं पि कुणइ वसे विलसन्तो ॥२७ ॥

मलयारुणगिरिमृगाङ्ककन्दलीसमकृतभागः ।
गजदानशिलाप्रियंगुरससर्षपसंयुक्तः ॥
धूपो मकरध्वज इव विघटित[2]युवतिजनमानमाहात्म्यः ।
भुवनं ससुरासुरमपि करोति वशे [3]विलसन् ॥

मलयं चन्दनम्, अरुणं कुङ्कुमं, गिरिः शिलापुष्पं, मृगाङ्कः कर्पूरः, कन्दली ओषधिविशेषो देशान्तरे प्रसिद्धः, गजदानो गजमदः, शिला मनःशिला, प्रियङ्गुः कामिनी, रसो बोलः, सर्षपः सुडतः, एतैः समभागैः कृतो धूप उक्तकार्यं करोतीति ॥[4]

[5]द्वौ दशाङ्गाविमौ धूपावत्यन्तं विबुधप्रियौ ।
वशकर्मणि विख्यातौ सम्यग् विधिनियोजितौ ॥

णिअवाहवीअसोणिअमलमीसुम्मत्तसुणअजीहाए ॥
खाणेण पाणेण वा कुणइ वसे तिहुअणं सअलं ॥२८॥

निजवाष्पबीजशोणितमलमिश्रोन्मत्तश्वजिह्वायाः ।
खादनेन पानेन वा करोति वशे त्रिभुवनं सकलम् ॥

बाष्पादीनि प्रसिद्धानि, तान्येव त्रीणि मलानि, एतैर्मिश्रिताया उन्मत्तशुनोऽलर्कस्य जिह्वायाः खादनात् पानाद् वोक्तकार्यं करोतीति, एतानि द्रव्याणि साधको यस्मै प्रयुङ्क्ते तं वशीकरोतीत्यर्थः ॥

रइसमए णिअवीअं घेत्तूण करेण कामिणीचलणं ॥
जो आलिंपइ वामं सो ताइ चिरं पिओ होइ ॥२९॥

---

१ इति युगलकम्–ख. । २ पदमेतदन्यत्र न दृश्यते । ३ सविशेषम्–ख. । ४ युगलकम्–ख. । ५ द्वादशाङ्गाविमौ–ख. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

रतिसमये निजवीजं गृहीत्वा करेण कामिनीचरणम् ।
य [1]आलिम्पति वामं स तस्याश्चिरं प्रियो भवति ॥

सम्प्रयोगे [2]तावम् प्राप्त्यवसरे स्वबीजं वामकरेण गृहीत्वा यः कामिन्या वामं चरणं [3]लिम्पति स तां वशीकरोतीति ॥

माअंगणिहअणरणअणणासिआहिअलिंगजीहाहि ॥
पिक्कं पिणाइभवणे तेल्लं पूसम्मि रअणीए ॥
मअणंकुसत्ति णामेण सिद्धमिणमं महावसीअरणं ॥
फस्सेण वि किं बहुणा कुणइ वसे वणगइन्दं पि ॥
एअं पुरा सुरासुरमणिमउडमऊहच्छुरिअचलणेण ॥
कहिअं पसुपइणा पाव्वतीइ तेल्लं पसण्णेण ॥
खाणे वा पाणे वा दिण्णं पूसम्मि कामिणिजणस्स ॥
पंचंगमलसणाहं कुदो अण्णं वसीअरणं ॥
एअं गुरुआराहणवसविकसिअलोअणारविन्देण ॥
कहिअं दणुइन्दपुरोहिएण सुरमन्तितणअस्स ॥३०-३४

मातङ्गनिहतनरनयननासिकाहृदयलिङ्गजिह्वाभिः ।
पक्वं पिनाकिभवने तैलं पुष्ये रजन्याम् ॥
मदनाङ्कुश इति नाम्ना सिद्धमिदं महावशीकरणम् ॥
स्पर्शेनापि किं बहुना करोति वशे वनगजेन्द्रानपि ॥
यत्[4] पुरा सुरासुरमणिमुकुटमयूखच्छुरितचरणेन ।
कथितं पशुपतिना पार्वत्यास्तैलं प्रसन्नेन ॥
खादने वा पाने वा दत्तं पुष्ये कामिनीजनस्य ।
पञ्चाङ्गमलसनाथं कुतोऽन्यद् वशीकरणम् ॥
एतद्गुर्वाराधनवशविकसितलोचनारविन्देन ।
कथितं दानवेन्द्रपुरोहितेन सुरमन्त्रितनयस्य ॥

---

१ लिप्यते-ख.; 'यो वा लिम्पति' इत्यपि पाठान्तरम् । २ भावप्राप्त्यवसरे-मु० पु० । ३ लिप्यति-ख. ।
४ प्राकृतपाठानुसारेण 'एतदि'ति स्यात् ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

गाथापञ्चकेन[1] कुलकम् । अस्येदं तात्पर्यम्- गजेन व्यापादितस्य पुंसो नेत्रघ्राणहृत्पद्मध्वज[2] रस-नाभिस्तैलं पुष्यर्क्षे रात्रौ रुद्रालये पक्वं शुद्धाम्बुस्थित्योक्तकार्यं करोति। एतदेव पञ्चभिर्मलैर्मिश्रितम्। पञ्चमलानि पूर्वोक्तानि । स्पष्टमन्यत् । सुरमन्त्रितनयः कचः । शिष्टं विशिष्टप्रभावप्रतिपादनार्थं स्पष्टमिति ॥[3]

णिअवीअसुभाविअकविवराङ्गचुण्णेण लेविअदलाइ ॥
दिण्णाइ कुणन्ति वसे अग्घाउं सुरहिकुसुमाइ ॥३५॥

निजबीजसुभावितकपिवराङ्गचूर्णेन लिप्तदलानि ।
दत्तानि कुर्वन्ति वशे आघ्रातुं सुरभिकुसुमानि ॥

स्वबीजयुक्तेन प्लवङ्गध्वजचूर्णेनावगुण्ठितपत्राणि [4]सुगन्धिकुसुमानि आमोदग्रहणाय यस्मै दीयन्ते तं वशीकुर्वन्तीति ॥

पुत्तंजारी व कअंजलीव मोहा व बहिंचूला व ॥
कुणइ वसे गोरंभा व पंचमलमीसिआ दिण्णा ॥३६॥

पुत्रञ्जारी वा कृताञ्जलिर्वा मोहा वा बर्हिचूडा वा ।
करोति वशे गोरम्भा वा पञ्चमलमिश्रिता दत्ता ॥

पुत्रञ्जारी स्थितिभीः, कृताञ्जलिर्नतिकृत्, मोहा मोहनी, बर्हिचूडा मयूरशिखा, गोरम्भा निष्पर्याया, एतासामोषधीनामेकतमाप्युक्तैः पञ्चभिर्मलैर्मिश्रिता भोजनपानादिना दत्ता वशीकरणमिति ॥

गअमअपितवणभंगरओणिअपंचंगमलसणाहेण ॥
पाणेण भोअणेण व मुणओवि मअणाउरा होन्ति ॥३७॥

गजमदपितृवनभृङ्गरजोनिजपञ्चाङ्गमलसनाथेन ।
पानेन भोजनेन वा मुनयोपि मदनातुरा भवन्ति ॥

निजमलपञ्चकं प्रागुक्तम् । पितृवनं श्मशानं तज्जं भृङ्गरजः । शिष्टं स्पष्टमिति ॥

गोरम्भासुमसिणचुण्णमीसणवणीअमइसअपसिद्धं ॥
अविहेअवसीअरणं चलणतलब्भंगजुत्तीइ ॥३८॥

गोरम्भा सुमसृणचूर्णमिश्रनवनीतमतिशयप्रसिद्धम् ।
अविधेयवशीकरणं चरणतलाभ्यङ्गयुक्त्या ॥

गोरम्भा ओषधिविशेषः, तदीयसूक्ष्मचूर्णभावितं नवनीतं वशीकार्यस्य पादतललेपात् वश

---

1 कुलकस्येदं तात्पर्यम्-ख. । 2 नाभि-ख. । 3 पञ्चभिः कुलकम्-ख. । 4 सुगन्धकुसुमानि-ख. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

णरकालसारहअमत्तकुंजरा होन्ति दासपडिरूवा ॥
चण्डालिआइ कमसो वड्ढन्तिक्किक्कपत्ताइ ॥३९॥

नरकालसारहयमत्तकुञ्जरा भवन्ति दासप्रतिरूपाः ।
चण्डालिकया क्रमशो वर्धमानैकैकपत्रया ॥

चण्डालिका रक्तकञ्चुकाख्या ओषधिः, तया नरस्य, कृष्णसारमृगस्य, अश्वस्य, मत्तवारणस्यै-
कैकपत्रवृद्ध्या दत्तया, ते नरादयो दासवद् वश्या भवन्तीति ॥

गन्धअसिलाविलेविअसोसिअचुण्णीकअं महुम्मीसं ॥
लेवेण वसे महिलं कुणइ रए कुलिसतरुखण्डं ॥४०॥

गन्धकशिलाविलेपितशोषितचूर्णीकृतं मधून्मिश्रम् ।
लेपेन वशे महिलां करोति रते कुलिशतरुखण्डम् ॥

कुलिशतरोः सुधावृक्षस्य खण्डो लतैकदेशो गन्धपाषाणमनःशिलाचूर्णाभ्यां लिप्तः सन् शोषि-
तस्ततश्चूर्णीकृतः पश्चात् क्षौद्रभावितो रतिसमये ध्वजलेपाद् योषितं वशीकरोतीति ॥

रिच्छिन्दिअमहुकप्पूरलित्तलिंगा रमन्ति जे सुरए ॥
हिअए महिलाण णरा वसन्ति ते दीहरं कालं ॥
एस किल जोअराओ दिण्णो रुद्देण मूलदेवस्स ॥
रुद्दस्स देवदत्ता वससम्मि से संठिआणेण ॥४१-४२॥

ऋक्षेन्द्रियमधुकर्पूरलिप्तलिंगा रमन्ते ये सुरते ।
हृदये महिलानां नरा वसन्ति ते दीर्घकालम् ॥
एष किल योगराजो दत्तो रुद्रेण मूलदेवस्य ।
रुद्रस्य देवदत्ता वश्येस्य संस्थितानेन ॥

ऋक्षः प्राणिविशेषो भल्लूक इति क्वचित्प्रसिद्धः । तदीयेनेन्द्रियेण पिष्टेन तथा माक्षिकघनसाराभ्यां
लिप्तसाधना ये निधुवने क्रीडन्ति ते कामिनीनां चिरकालं हृदये वसन्ति । सदा प्रिया
भवन्तीत्यर्थः । अस्यैवानुशंसार्था स्पष्टा द्वितीया गाथा । रुद्रदेवोत्र मूलदेवविशेषणमिति ॥युगलकम्॥

मुणिकुसुमसलिलघअमहुजालिणिफलरेणुपारअहिमेहि ॥
कीरउ विअड्ढदइओ कअअफलुम्मीसिओ लेवो ॥४३॥

मुनिकुसुमसलिलघृतमधुजालिनीफलरेणुपारदहिमैः ।
क्रियतां विदग्धदयितः कतकफलोन्मिश्रितो लेपः ॥

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मुनिरगस्त्यतरुस्तत्कुसुमजलेन, तद्रसेनेत्यर्थः, तथा घृतमाक्षिकाभ्यां तथा जालिन्या देवदाल्याः संवन्धिना फलचूर्णेन तथा सूतेन तथा चन्दनेन चैतैः, कतकफचूर्णमिश्रैर्नागरजनप्रियो ध्वजलेपः कामिनीवशीकारहेतुः क्रियतामिति ॥

जस्स मणे कज्जं सामलाइ दासत्तणं पवण्णाइ ॥
सो कुणउ लिंगलेवं कलरवपुरीससेन्धअमहुहि ॥४४॥

यस्य मनसि कार्यं श्यामलया दासत्वं[1]प्रपन्नया ।
स करोतु लिङ्गलेपं ❀ कलरवपुरीससैन्धवमधुभिः ॥

कलरवमलं पारावतशकृत्, सैन्धवमधुनी प्रसिद्धे । शिष्टं गतार्थमिति ॥

ससिसूआरुणकविलिंगकणअमहुलित्तलिंगरमिआओ ॥
कुणह वसे लडहविलासिणी विरहे णजीअन्ती ॥४५॥

शशिसूतारुणकपिलिङ्गकनकमधुलिप्तलिङ्गरमिताः[2] ।
कुरुत[3] वशे लटहविलासिनीर्विरहे [4]न जीवन्तीः ॥

कर्पूरपारदकुङ्कुमवानरध्वजमातुलक्षौद्रैरभ्यक्तेन लिङ्गेन कामिताः सुभगकामिनीः पुरुषो वशीकरोति, एवं नाम ता वश्या भवन्ति यत् तद्विप्रयोगे नजीवन्तीति ॥

ससिरसलवलीमअगअणपिप्पलिसिन्धुअतुंबुरुमहुहि ॥
लेविअधआण महिला होन्ति रए णिज्झरसरिच्छा ॥४६॥

शशिरसलवलीमदगगनपिप्पलीसिन्धुजतुम्बुरुमधुभिः ।
लेपितध्वजानां महिला भवन्ति रते निर्झरसदृक्षाः ॥

कर्पूरपारदाभ्यां तथा लवलीमदेन लताकस्तूरिकया तथा गगनेनाभ्रकेण तथा मागधिकया तथा सैन्धवेन तथा तुम्बुरुफलैः प्रसिद्धैस्तथा माक्षिकेणैतैरभ्यक्तचिह्नानां निधुवनसमये वनिता वहुमदस्यन्दिन्यो[5] भवन्ति, तस्य[6]वश्यत्वमापद्यन्त इत्यर्थादवसितमेवेति ॥

हरिआलंजणपारअमाअहिआकुट्ठसेन्धवमहुहि ॥
कलरवपुरीसमीसेहिलिंगलेओ कओ विहिणा ॥
सोहग्गमअपरवसतरुणिअणहिअअमत्तमाअंगो ॥
सुरए रहसेण वसे करेइ मअणंकुसो णाम ॥४७–४८॥

---

१ प्रतिपन्नया–ख. । २ रचितः–ख. । ३ करोति–ख. । ४ नजीवन्ति–ख. । ५ स्यन्दिनी भवति–ख. । ६ वश्यत्वमापद्यत इत्यर्थाबस्थितमेवेति–ख. । ❀ कलरवमल–ख. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

हरितालाञ्जनपारदमागधिकाकुष्ठसैन्धवमधुभिः ।
कलरवपुरीषमिश्रैर्लिङ्गलेपः कृतो विधिना ॥
सौभाग्यमदपरवशतरुणीजनहृयमत्तमातङ्गः ।
सुरते रभसेन वशे करोति मदनाङ्कुशो नाम ॥

हरितालसौवीराञ्जनहरवीर्यपिप्पलीविषाणलवणमाक्षिकैः पारावतमलयुक्तैर्विधिना सर्वसमांशरूपेण विधानेन कृतो ध्वजाभ्यङ्गः सुरते रभसेन साभिलाषत्वेनोक्तविशेषणविशिष्टास्तरुणीर्वशीकरोतीति॥ युगलकम् ॥

जाइ व काइ व घेत्तूण पंच कुसुमाइ रत्तवण्णाइ ॥
समतुलिअपिअंगुमीसिआइ अइमसिणपिट्ठाइ ॥
एएण लित्तलिङ्गो जां जां कामेइ कामिणीं कुसलो ॥
सोहग्गरूवगुणगव्विआं तां वसे कुणइ ॥४९–५०॥

यानिकानि वा गृहीत्वा पञ्च कुसुमानि रक्तवर्णानि ।
समतुलितप्रियङ्गुमिश्रितान्यतिमसृणपिष्टानि ॥
एतेन लिप्तलिङ्गो यां यां कामयते कामिनीं कुशलः ।
सौभाग्यरूपगुणगर्विताां तां वशीकुरुते ॥

यानिकानिचित् प्रतिजातिपुष्पमिति पञ्च लोहितानि पुष्पाणि गृहीत्वा तत्तुल्यपरिमाणगन्धप्रियङ्गुमिश्रितानि कृत्वैतेन द्रव्येण कृतध्वजाभ्यङ्गो विदग्धो यां यां योषितं रमयति सा सुभगत्ववपुःप्रकर्षगर्विताऽपि तस्य वश्यत्वमापद्यत इति ॥ युगलकम् ॥

घअघट्टरत्तकविलिंगलित्तलिंगाण लडहवणिदाओ ॥
होन्ति वसे मअरद्धअसरहोरणसल्लविहुराओ ॥५१ ॥

घृतघृष्टरक्तकपिलिङ्गलिप्तलिङ्गानां लटहवनिताः ।
भवन्ति वशे मकरध्वजशरधोरणशल्यविधुराः ॥

घृतपिष्टेन रक्तस्य कपेर्मर्कटस्य मेढ्रेण लिप्तसाधनानां सुन्दरस्त्रियः स्मरशरनिकरशल्यन्यञ्चिताः सत्यो वशी भवन्तीति ॥

एअस्स मूलसिरिणा मअरद्धअसरसहोअरसमस्स ॥
लेवस्स पट्टबन्धो कओ महाआलभवणम्मि ॥५२॥

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

एतस्य [1]श्रीमूलेन मकरध्वजशरसहोदरसमस्य ।
लेपस्य पट्टबन्धः कृतो [2]महाकालभवने ॥

मकरध्वजसहोदरतुल्यस्य समानार्थकारित्वाद् भ्रातृकल्पस्यास्य योगस्य पट्टबन्धः कृत इति अस्यैवानुशंसार्था [3]स्पष्टा गाथेति । युगलकम् ॥

जालिणिफलरेणुरसिन्दकणाअ[4]लोणंलवेअसहिएहि ॥
सुरअम्मि उट्टवारुणिदुद्धेण करंबिओ लेओ ॥
एसोवि गरुअजोव्वणसोहग्गोत्ताणकामिणिजणस्स ॥
हरइ गव्वं मअरद्धओविअ भुवणे विअंभन्तो ५३–५४॥

जालिनीफलरेणुरसेन्द्रकनक[5]लवणाम्लवेतसहिमैः ❀ ।
सुरत उष्ट्रावारुणीदुग्धेन मिश्रीकृतो लेपः ॥
एषोपि गुरुयौवनसौभाग्यो[6]त्तालकामिनीजनस्य ।
हरति गर्वं मकरध्वज इव भुवने विजृम्भमाणः ॥

देवताळीफलचूर्णेन पारदेन हरदयितेन सैन्धवेनाम्लवेतसरसेन[7] चन्दनेन चैतैः करभवारुण्याः क्षीरेण चालोडितो लेप एषोऽपि सुरतसमये प्रयोगतः[8] प्रकृष्टतारुण्यसौन्दर्यानतस्य विलासिनीलोकस्य साक्षात् कन्दर्प इव दर्पं जगति [9]विजृम्भमाणो हरतीति युगलकम् ॥

हअलालासिअसरिसवमञ्जिट्ठाजाइकुसुमदलमीसं ॥
जो कुणइ लिंगलेवं सोविअ कुसुमाउहो होइ ॥५५॥

हयलालासितसर्षपमञ्जिष्ठाजातिकुसुमदलमिश्रम् ।
यः करोति लिङ्गलेपं [10]स एव कुसुमायुधो भवति ॥

तुरगमुखनिस्यन्दो गौरसर्षपा मञ्जिष्ठा सुमनःपुष्पाणि तमालपल्लवानि, एतानि मिश्रयित्वा कृतो ध्वजलेपः प्रयोक्तुः साक्षात् कामदेवत्वमापादयतीति ॥

हरवीअघुसिणघणसाररोअणामलअहेमरअरइओ ॥
सुरअम्मि हरइ हिअअं लेवो सुरसुन्दरीणं पि ॥५६॥

---

१ श्रीमूलदेवेन–ख. । २ महाकालभुवने–ख. । ३ स्पष्टार्था–ख. । ४ लोणखण्डसहिएःह इवि पुस्तकान्तरे । ५ लवणखण्डसहितैः–ख. । ६ त्तान–ख. । ७ अम्लवेतसेनेत्यन्यत्र पाठः । ८ प्रभोगः–ख. । ९ विजृम्भमानो–ख. । १० स च–ख. । ❀ लवणाम्लवेतससहितैरित्येव पाठः सर्वत्र ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

हरबीजकुङ्कुमघनसाररोचनामलयहेमरजोरचितः ।
सुरते हरति हृदयं लेपः सुरसुन्दरीणामपि ॥

पारदकाश्मीरककर्पूरगोरोचनाचन्दनमातुलचूर्णैर्निर्मितः साधनलेपोऽप्सरसामपि चित्तं हरतीति ॥

तअतअरकललकेसरकुसुम्भसेलेअविरइअं कुणइ ॥
सोहग्गमणण्णसमं वामाण विलेवणं सुहअं ॥५७॥

त्वक्तगरकललकेसरकुसुम्भशैलेयविरचितं करोति ।
सौभाग्यमनन्यसमं वामानां विलेपनं सुखदम् ॥

वल्कलकुटिलमांसीनागकेसर[1]महारजनी[2]पर्णपुष्पैर्विरचितो बधूनां वराङ्गलेपः परमं सौभाग्यं करोति सुखदत्वादिति ॥

सिन्धुवआसोवच्चलसोवीरअमच्छपित्तधरणीहि ॥
घअमहुकणासणाहो भअलेवो कुणइ सोहग्गं ॥५८॥

[3] सिन्धुवचासौवर्चलसौवीरकमत्स्यपित्तधरणीभिः ।
घृतमधुकणासनाथो भगलेपः करोति सौभाग्यम् ॥

लवणोग्रगन्धारुचकशैलाञ्जनमत्स्यपित्तैस्तथा धरण्या सौराष्ट्रमृत्तिकया चेत्येतैः कृतः सर्पिर्माक्षिकपिप्पलीचूर्णयुतः स्त्रीणां वराङ्गाभ्यङ्गः सौभाग्यमावहतीति ॥

सिअसिद्धत्थअतेल्लं दालिमपंचंगसाहिअं विहिणा ॥
गुज्झब्भंगेण रए कुणइ वसे णिअपइं महिला॥५९॥

सितसिद्धार्थकतैलं दाडिमपञ्चाङ्गसाधितं विधिना ।
गुह्याभ्यङ्गेन रते करोति वशे निजपतिं महिला ॥

गौरसर्षपतैलं दाडिमस्य पञ्चभिरङ्गैर्मूलादिभिर्विधानेन साधितं पक्कं वराङ्गलेपेन [4]प्रयुज्य स्त्री कामुकं वशे करोतीति । विधिरत्र द्रव्यचतुर्गुणं तैलं तच्चतुर्गुणे जले पक्त्वा तैलमात्रग्रहणमिति ॥

मालइपसूअसाहिअतेल्लब्भत्ते वरंगकुहरम्मि ॥
महिलाण सुरअसमए होइ पई दासपडिरूवो ॥६०॥

[5] मालतीप्रसूनसाधिततैलाभ्यक्ते वराङ्गकुहरे ।
महिलानां सुरतसमए भवति पतिर्दासप्रतिरूपः ॥

१ महारजतम्-ख. । २ वर्त्तपुष्पैर्-ख. । ३ सैन्धव-ख. । ४ प्रयुक्त-ख. । ५ मालतीप्रसूत-ख. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सुमनःपुष्पैरुक्तेन विधिना साधितं यत् तिलतैलं तेन सुरतसमये लिप्ते [1]स्मरमार्गविवरे कामिनी कामुकमत्यन्तवश्यं करोतीति ॥

पसुवइजलवट्टिअणिंवदारुगुग्गुलुरसञ्जणकएण ॥
महिला वरंगधूएण णिअदइअं वसे कुणइ ॥६१॥

पशुपतिजलवर्तितनिम्बदारुगुग्गुलुरसाञ्जनकृतेन ।
महिला वराङ्गधूपेन निजदयितं वशे करोति ॥

छागमूत्रपिष्टैः पिचुमर्ददेवदारुपुर[2]तार्क्ष्यैः कृतो निर्मितो यो धूपस्तेन वशीकरणबीजस्तम्भनदृढीकरणार्थेन महिला वराङ्गं धूपयन्ती कामुकं वशीकरोतीति ॥

दप्पिअपशुवइजलपिट्ठवाणरीमूललेविउम्मलिअं ॥
ण पडइ लिंगं खरखोरीखररआआससुढिअं पि ॥६२॥

दर्पितपशुपतिजलपिष्टवानरीमूललेपितोन्मलितम्[3] ।
न पतति लिङ्गं खरखोरीखररतायासक्षुदितमपि ॥

[4]मत्तवस्तप्रस्रावेण निघृष्टं यद् वानर्याः कपिकच्छ्वा मूलं तेन लिप्तं सदुद्वर्तितं [5]चिह्नं कर्कशाधमदासीनिधुवनक्लेशकदर्थितमपि [6]पुंश्चिह्नं [7]स्तब्धत्वं [8]न जहातीति ॥

सत्ताहं पसुवइसलिलभाविअं करहवारुणीमूलं ॥
गाहोव्वट्टणविहिणा कुणइ रए साहणत्थम्भं ॥६३॥

सप्ताहं पशुपतिसलिलभावितं करभवारुणीमूलम् ।
गाढोद्वर्तनविधिना करोति रते साधनस्तम्भम् ॥

सप्तदिनानि छागमूत्रेण भावितमुष्ट्रवारुणीमूलं पिष्टं सद् बहलेनोद्वर्तनकर्मणा सुरते ध्वजस्तम्भमावहतीति ॥

कमपरिवड्ढिअटंकणपिप्पलितण्डुलविसेहि पिट्ठेहि ॥
लेविअधोएण णरो लिङ्गेण चिरं रए रमइ ॥६४॥

क्रमपरिवर्धितटङ्कणपिप्पलीतण्डुलविषैः पिष्टैः ।
लिप्तधौतेन नरो लिङ्गेन चिरं रते रमते ॥

---

१ मत्सरमार्गविवरे-ख. । २ तार्कैः-ख. । ३ लेपितोद्वर्तितम्-ख. । ४ मत्तपशुप्रस्रावेण-ख. । ५ पुंश्चिह्नमिति स्यात् । ६ पुंसो लिङ्गं-ख. । पदमेतत्प्रमादाद् द्विरुक्तम् । ७ श्लथत्वं-ख. । अस्मिन् पद्ये ८ नैव यातीति पाठो योज्यः ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

टङ्कणं सुवर्णपाचिका, पिप्पलीतण्डुलं मागधिकाबीजानि, त्रिषं मुस्तादि, एतैरुत्तरोत्तरवृद्ध्या गृहीत्वा पिष्टैः प्रथमं लिप्तेन पश्चाद् धौतेन ध्वजेन बहुकालं निधुवने क्रीडतीति ॥

'मंडूअवसाकुरुविल्लखंडखंडेहि काढिअं दुद्धं ॥
धअधूमधअत्थंभं करेइ चलणअललेवेण ॥६५॥

मण्डूकवसाकुरुविल्लखण्डखण्डैः क्वथितं दुग्धम् ।
ध्वजधूमध्वजस्तम्भं करोति चरणतललेपेन ॥

दर्दुरस्नेहेन तथा कुरुविल्लस्य कुलीराख्यस्य(जलचरविशेषस्य) खण्डखण्डैः पिशितशकलैः सह क्वथितं क्षीरं पादतललेपाद् ध्वजस्य लिङ्गस्य धूमध्वजस्य चाग्नेः स्तम्भं करोति, तेन लिप्तपादश्चिरं स्तब्धध्वजो भवत्यग्निना च न दह्यत इत्यर्थ इति ॥

सिद्धं कुसुम्भतेल्लं भूमिलआचुण्णमीसिअं विहिणा ॥
चरणब्भंगेण रए कुणइ णरं वरखरुच्छाहं ॥६६॥

सिद्धं कुसुम्भतैलं भूमिलताचूर्णमिश्रितं विधिना ।
चरणाभ्यङ्गेन रते करोति नरं वरखरोत्साहम् ॥

कुसुम्भस्य पद्मकस्य बीजोद्भवं तैलं गण्डूपदचूर्णेनोक्तरूपविधि(ना) साधितं सत् पादतले लेपेन रतिविषये पुरुषं तरुणरासभसमानरसं करोतीति ॥

णीलुप्पलसिअपंकअकेसरमहुसक्कराविलित्ते ण ॥
सुरअम्मि चिरं कीडइ दढलिंगो णाहिविवरेण ॥६७॥

नीलोत्पलसितपङ्कजकेसरमधुशर्कराविलिप्तेन ।
सुरते चिरं क्रीडति दृढलिङ्गो नाभिविवरेण ॥

कुवलयेन तथा श्वेतपद्मकिञ्जल्केन तथा मधुशर्कराभ्यां लिप्तेन नाभिकुहरेण पुरुषः स्तब्धलिङ्गः सन् सुरते चिरं रमत इति ॥

सिअवाअसजंघामूलुम्मीसिअकमलकेसरमहुहि ॥
णाहीम्मि कओ लेवो वीअत्थम्भं रए कुणइ ॥६८॥

सितवायसजङ्घामूलोन्मिश्रकमलकेसरमधुभिः ।
नाभौ कृतो लेपो बीजस्तम्भं रते करोति ॥

श्वेतायाः काकजङ्घाया मूलेन तथा पद्मकिञ्जल्केन तथा मधुनैतैर्मिश्रैः सम्पादितो नाभिविवराभ्यङ्गो रतौ वीर्यनिरोधं करोति, चिरं रमयतीत्यर्थः ॥

---

१ मंडोअ-ख. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

[1]छीरल्लिमुलुप्पादुद्धवट्टिअं चरणजुअललेवेण ॥
कुणइ समंगामूलं वीअत्थम्भं रए सुइरं ॥६९॥

चीरल्लीछगलिकादुग्धवर्तितं चरणयुगललेपेन ।
करोति समङ्गामूलं बीजस्तम्भं रते सुचिरम् ॥

सुधायास्तथा छगल्याः क्षीरेण पिष्टं लज्जालुकाया मूलं पादद्वयलेपेन रतौ पूर्वोक्तं कार्यं करोतीति ॥

सिअसरिसवमिरिअवआविसाणसुरसाविअंगवीएहि ॥
दुस्सीलगोवसीअरणमंजणं पसुवइजलेण ॥७०॥

सितसर्षपमरिचवचाविषाणसुरसाविडंगबीजैः ।
[2]दुश्शीलगवोवशीकरणमञ्जनं पशुपतिजलेन ॥

गौरसिद्धार्थककृष्णोग्रगन्धाकुष्ठमञ्जुकाकृमिघ्नबीजैश्छागमूत्रपिष्टैः कृतमञ्जनं दुष्टानां [3]धेनूनां दमनमिति ॥

इअ एस परिसमत्तो विविहवसीअरणजोअसंपण्णो ॥
हरमेहलाइ* तइओ विअद्धदइओ परिच्छेओ ॥७१॥

इत्येष [4]परिसमाप्तो विविधवशीकरणयोगसंपन्नः ।
हरमेखलायास्तृतीयो विदग्धदयितः परिच्छेदः ॥

—स्पष्टम् ॥

॥ हरमेहलाए तइओ परिच्छेओ ॥
॥ हरमेखलायास्तृतीयः परिच्छेदः ॥
समाप्तः

१ छीरली-ख. । २ दुश्शीलगर्वी-ख. । ३ वधूनां-ख. । ४ परिसमाप्यते-ख. । * हरमेहलाए-ख. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

श्रीः

अथ चतुर्थः परिच्छेदः

एआण विअद्धाण अ सरीरपरिअम्म जणिअपरिओसं ॥
साहेमि चउत्थमहं संपइ विउलं परिच्छेअं ॥१॥

वेश्यानां विदग्धानां च शरीरपरिकर्म जनितपरितोषम् ।
साधयामि चतुर्थमहं संप्रति विपुलं परिच्छेदम् ॥

वेश्याविदग्धग्रहणं पूर्वपरिच्छेदक्रमानुसरणमात्रम् । वक्ष्यमाणं तु सर्वसाधारणम् । शिष्टं सुबोधम् ॥

करिदसणामलअमसी भंगरअविपक्कतेल्लकल्लविआ ॥
लेवेण [1]करेइ फुडं खल्लीउ वि कुंचिए चिहुरे ॥२॥

करिदशनामलकमसी भृङ्गरजोविपक्वतैलार्द्रीकृता[2] ।
लेपेन करोति स्फुटं खल्वाटस्यापि कुञ्चिताँश्चिकुरान् ॥

[3]हस्तिदन्तं धात्रीफलञ्च पुटपाकेन मसीकृत्य, मार्कवरसेन विपक्वं यत् तैलं तेन मिश्रितया तया मस्या लेपः खल्वाटस्यापि कुटिलान् केशान् जनयति किं पुनरन्यस्य । तैलपाकविधिः- समूलस्य मार्कवस्य पले[4] तत्स्वरसस्य द्वात्रिंशत् पलानि तिलतैलपलान्यष्टौ, तान्येव ग्राह्याणीति ॥ स्वरसपाके सर्वत्रैषैव स्थितिः ॥

छाअच्छीररसंजणपुटदड्ढगइन्ददन्तमसिलित्ता ॥
जाअन्ति सत्तरत्ता खल्लीउ वि कुंचिआ केसा ॥३॥

छागक्षीररसाञ्जनपुटदग्धगजेन्द्रदन्तमसीलिप्ताः ।
जायन्ते सप्तरात्रात् खल्वाटस्यापि कुञ्चिताः केशाः ॥

अजादुग्धरसाञ्जनाभ्यां मिश्रितया पुटपाकदग्धकरिदशनमस्या विलिप्ताः केशाः पूर्ववत् श्रेष्ठा भवन्तीति ॥

भंगरअरसोम्मीसिअगुंजाफलचुण्णसाहिअं तेल्लं ॥
कुणइ सिरोरुहरिद्धिं कुट्ठमुरातुडिजडासहिअं ॥४॥

भृङ्गरजोरसोन्मिश्रितगुञ्जाफलचूर्णसाधितं तैलम् ।
करोति [5]शिरोरुहर्द्धिं कुष्ठमुरात्रुटिजटासहितम् ॥

---

१ कुणइ-इति पाठान्तरम् । २ तैलार्द्रा-इति पाठान्तरम् । ३ हस्तिदन्तौ-ख. । ४ पलं-ख. । ५ शिरोरुहक्वृद्धिं-ख. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मार्कवरसेन [1]गर्भीकृतरक्तिकाचूर्णेन पूर्वोक्तपरिमाणस्थित्या पक्वं तिलतैलम् विषाणेन सुरया सुगन्धमुरया त्रुट्या सूक्ष्मैलाभिर्जटया मांस्या चैतैर्मिश्रीकृतैश्चूर्णितैः सहितं केशसम्पत्तिं करोतीति ॥

भल्लाअअविहईफलगुंजामूलफलाण एक्केण ॥
महुसहिएण विलित्तं सुरपइलुत्तं समं जाइ ॥५॥

भल्लातकबृहतीफलगुञ्जामूलफलानामेकेन ।
मधुसहितेन विलिप्तं सुरपतिलुप्तं शमं याति ॥

भल्लातकमरुष्करं, बृहतीफलं कण्टकारीफलं, गुञ्जाया रक्तिकाया मूलं फलं वा, एतेषां मध्यादन्यतमेन चूर्णीकृतेन माक्षिकसहितेनालिप्तं सुरपतिलुप्तं शमं याति, उक्तमिन्द्रलुप्तसंज्ञया प्रसिद्धं शिरसि श्मश्रुणि वा लुप्तलोमतारूपं व्याधिजातं शमं याति विनश्यतीति ॥

पिट्ठेहि कसणरोहिणिमुत्तुम्मीसेहि जवअकुसुमेहि ॥
कअलेवमिन्दलुत्तं घणचिहुरमणोहरं होइ ॥६॥

पिष्टैः कृष्णरोहिणीमूत्रोन्मिश्रैर्जवाकुसुमैः ।
कृतलेपमिन्द्रलुप्तं घनचिकुरमनोहरं भवति ॥

जवापुष्पाण्युड्रपुष्पाणीति प्रसिद्धानि तैः पिष्टैः, कृष्णवर्णाया रोहिण्या धेनोः प्रस्रावेण मिश्रितैर्लिप्तं पूर्वोक्तमिन्द्रलुप्ताख्यं व्याधिजातं पुनर्जातमनोज्ञकेशं भवतीति ॥

बिहईफलरसघट्टं गुंजामूलं फलं व लेवेण ॥
कंचणनिहट्टवच्छिअममराहिवमुंडिअं हरइ ॥७॥

बृहतीफलरसघृष्टं गुञ्जामूलं फलं वा लेपेन ।
काञ्चननिघृष्टव्रश्चितममराधिपमुण्डितं हरति ॥

कण्टकारीफलरसेन पिष्टं रक्तिकानां मूलं फलं वा लेपेन पूर्वोक्तमिन्द्रलुप्तं हरति । कीदृशमिन्द्रलुप्तम्- पूर्वं सुवर्णेन निघृष्टं पश्चात् सूक्ष्मशस्त्रेण कृतक्षतमिति ॥ सर्वेषामिन्द्रलुप्तलेपानामित्थं निघर्षणव्रश्चनविधिः साधारणः ॥

पसुगंधाणीलुप्पलतिलकलिफलमज्जमहुअछल्लीहि ॥
गुंढिअसिराण चिहुरा ण पडन्ति पिअंगुसहिएहि ॥८॥

पशुगन्धानीलोत्पलतिलकलिफलमज्जमधुकत्वग्भिः ।
[2]गुण्ठितशिरसां केशा न पतन्ति प्रियङ्गुसहितैः ॥

---

१ गर्भीकृतं यद्रक्तिकाचूर्णं तेनेति पाठः साधीयान् । २ आगुण्ठित-ख. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पशुगन्धाऽविगन्धा, पूतिवर्वरक इति क्वचित्प्रसिद्धः, नीलोत्पलं कुवलयं, तिलाः प्रसिद्धाः, कलिफलं बिभीतकफलं तस्य मज्जा [1]अस्थ्नः सारः, मधुकस्य मधुयष्ट्यास्त्वग् एतैः श्यामया सहितैर्लिप्तमूर्ध्नो कचा न पतन्ति स्थिरीभवन्ति । अवलेपत्वापादनाय द्रवद्रव्यं जलमेव ग्राह्यम् । विशेषानुक्तौ सर्वत्रैषैव स्थितिरिति ॥

आमलअकुट्ठकुवलअमंसिवलालेविअम्मि सीसम्मि ।
अइरा विरला वि घणा जाअन्ति मणोहरा चिहुरा ॥९॥

आमलककुष्ठकुवलयमांसीवलालिप्ते शिरसि ।
अचिराद् विरला अपि घना जायन्ते मनोहराश्चिकुराः ॥

धात्रीफलविषाणोत्पलनलदैस्तथा वलया, अनयैव संज्ञया प्रसिद्धया, कृतेन लेपेन[2]लिप्ते मस्तके लुप्तत्वाद् विरला अपि केशाः [3]संहता रम्याश्च पुनर्जायन्त इति ॥

माअन्दवीअमीसिअह्वाणामलएहि गुंडिआ चिहुरा ॥
ण पडन्ति होन्ति दढवद्धमूलघणदीहरसिणिद्धा ॥१०॥

[4]माकन्दवीजमिश्रितस्नानामलकैर्गुण्ठिताश्चिकुराः ।
न पतन्ति भवन्ति दृढवद्धमूलघनदीर्घस्निग्धाः ॥

आम्रफलस्यमज्जाऽभ्यन्तरवर्ति यत् सारं तेन मिश्रितैः स्नानार्थमुपसाधितैः सुगन्धामलकै[5]र्लिप्ते शिरसि [6]ततः केशा न केवलं न पतन्ति, यावत् सर्वैश्च गुणैः संयुक्ता भवन्तीति ॥ स्नानामलकविधिं पञ्चमे वक्ष्यति ॥

समणोलुप्पलकेसरलट्ठिमहुतिलेहि सरिसमामलअं ॥
सीसम्मि चिरपरूढं पि उप्पिआसं समुप्पसइ ॥११॥

समनीलोत्पलकेशरयष्टिमधुतिलैः सदृशमामलकम् ।
शीर्षे चिरप्ररूढमपि [7]दारुणं समुद्ध्वंसयति ॥

समैस्तुल्यभागैः कुवलयेन नागकेशरेण मधुयष्ट्या तिलेन चेत्येतैः सवैः समानं धात्रीफलं शीर्षे दत्तं सत् त्वक्कूटन(अगूढाऽवगुण)रूपं व्याधिजात[8]मुप्पिआसमिति देशीपदेन व्याख्यातं [9]निवारयतीति ॥

रविदुद्धोल्लन्तरधूमडड्ढसुहमासचुरणमसिसीसं ॥
लेवेण सअलसिररोअविहडणं कुणइ कडुतेल्लं ॥१२॥

---

१ अण्ढसारः-ख. , अन्तःसार इत्यन्यत्र । २ लिप्तेन-ख. । ३ सहिता-ख. । ४ आम्रबीज-ख. । ५ लिप्तशिरसि-ख. । ६ सति-ख. । ७ दारुणमुप्पियासं-ख. । ८ रूपिआसमिति-ख. । ९ बिघा(दा)रयति-ख. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

रविदुग्धाद्रान्तर्धूमदग्धशुभमाषचूर्णमसीमिश्रम् ।
लेपेन सकलशिरोरोगविघटनं करोति कटुतैलम् ॥

अर्कक्षीरेणार्द्रीकृताः सन्तोऽन्तर्धूमेन पुटपाकेन निदग्धा विशोधिता ये माषा[1]स्तच्चूर्णजा याऽसौ मसी तया मिश्रं कटुतैलं सर्षपतैलं तदलाभे गुग्गुलबीजतैलं लेपेन शिरोभ्यङ्गेन सर्वेषां शिरोरोगाणां विनाशं करोतीति ॥

आमलअफल[2]कअमालकिसलअपपुन्नाडवीअलक्खाहि ॥
लेवो सीसम्मि कओ दारुणांवि हरइ दारुणअं ॥१३॥

आमलकफलकृतमालकिसलयप्रपुन्नाडबीजलाक्षाभिः ।
लेपः शीर्षे कृतो दारुणमपि हरति दारुणकम् ॥

धात्रीफलमारग्वधप्रवालमेडगजबीजं दीप्तिश्चेत्येतैः शिरसि कृतो लेपो घोरमपि दारुणकं[3]शीर्षत्वग्विकारम् 'उप्पियासमिति' प्रागुक्तं निवारयतीति ॥

लेओ घणचण्डासुरविसाणतणुदलणिसाहलिद्दाहि ॥
दारुणपमुहचिरपरूहचिहुररिउणो विणासेइ ॥१४॥

लेपो घनचण्डासुरविषाणतनुदलनिशाहरिद्राभिः ।
दारुणप्रमुख[4]चिरप्ररूढचिकुररिपून् विनाशयति ॥

घनो मुस्तकं, चण्डा चोरकभेदः काष्ठगुग्गुलुरिति प्रसिद्धः, असुरो सुरा, विषाणं कुष्ठं, तनु त्वक्, दलं तमालपत्रं, निशा दारुहरिद्रा दार्वी, हरिद्रा पिण्डहरिद्रा, इत्येतैः कृतो मूर्धलेपः प्रागुक्तदारुणकप्रमुखान् सर्वांश्चिरप्ररूढानपि केशव्याधीन् निवारयतीति ॥

णिग्गुंडिहलिणिरूविअसिद्धं सिद्धं व मोरअफलेहि ॥
तेल्लं सिररोअसमूहहरणमब्भंगजुत्तीइ ॥१५॥

निर्गुण्डीहलिनीरूपिकसिद्धं सिद्धं वा मयूरकफलैः ।
तैलं शिरोरोगसमूहहरणमभ्यङ्गयुक्त्या ॥

निर्गुण्डी भूतकेशी, हलिनी लाङ्गली, रूपिकोऽर्कवृक्ष एतैः पूर्वोक्तशुद्धाम्बुविधिना सिद्धमथवाऽपामार्गफलैरेव सिद्धं तिलतैलमभ्यङ्गयुक्त्या लेपयुक्त्या [5]मूर्धरोगाणां [6]समूहं बहूंस्तान् हरतीति ॥

खप्परभज्जिएण चुण्णिएण कुट्ठेण तेल्लसहिएण ॥
चिररूहारूसिआदाहकंडुवेअणा णस्सइ[7] ॥१६॥

१ स्ततश्चूर्णया सौ–ख. । २ किचमाल–ख. । ३ शीर्षत्वग्विकाररूपम् इति पाठान्तरम् । ४ चिररूढ–ख. । ५ मूर्धरोगसमूहनाव (श) न–ख. । ६ समूहा व्यूहास्तान् इत्यन्यत्र । ७ णसइ इत्यपि पाठः ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कर्परभर्जितेन [1]चूर्णितेन कुष्ठेन तैलसहितेन ।
चिररूढारूंषिकादाहकण्डुवेदना [2]नश्यति ॥

कर्परे मृत्पात्रकपाले भृष्टं यद् वाप्यं तेन श्लक्ष्णपिष्टेन तैलसहितेन शिरोभ्यङ्गाच्चिरजातारूंषिकाख्यानां सूक्ष्मपिटकानां संबन्धी यो दाहः कण्डूश्च तत्कृतवेदना नश्यतीति ॥

अतरुणविल्लगिरेण व धोओ गुडपाणीएण व जहिच्छं ॥
मूढो[3] वि होइ सहसा विसंखलो चिहुरपब्भारो ॥१७॥

अतरुणविल्वगिरेण वा धौतो गुडपानीयेन वा यथेच्छम् ।
मूढोपि भवति सहसा विशृङ्खलश्चिकुरप्राग्भारः ॥

अंतरुणस्य पक्वस्य विल्वफलस्य मज्जा शोधितस्य गुडस्य जलेन वाऽभ्यक्तः केशसमूहो [4]जडीभूतोपि [5]विविक्तीभवतीति ॥

फणिवल्लीदलरसमलिअमसिणपारअविलेविआ चेली ॥
आअरिसेइ णिबद्धा सिरम्मि णीसेसजूआओ ॥१८॥

फणिवल्लीदलरसमलितमसृणपारदविलिप्ता [6]चीरिका ।
आकर्षति निबद्धा शिरसि निःशेषयूकाः ॥

फणिवल्ल्या अप(व)न्तिकाया रसेन मर्दितमसृणं समरसीकृतं यत् [7]पारदं तेन लिप्तः कर्पटखण्डः शिरसि बद्धः [8]सन् तद्गतयूकाख्यान जन्तूनाकर्षति ततो विश्लेषयतीति ॥

सविडिङ्गगन्धअसिलासिद्धं सुरहीजलेण कडुतेल्लं ॥
आजम्म णेइ खअं लिक्खासहिअजूअसंघाअं ॥१९॥

सविडिङ्गगन्धकशिलासिद्धं सुरभीजलेन कटुतैलम् ।
आजन्मनो नयति क्षयं [9]लिक्षासहितयूकसंघातम् ॥

क्रिमिघ्नेन सह गन्धपाषाणमनःशिलाभ्यां गर्भक्षिप्ताभ्यां गोमूत्रेण पूर्वोक्तयुक्त्या सिद्धं संपन्नं कटुतैलं केशाभ्यङ्गाद् यावज्जीवं सलिक्षिका यूकाः क्षपयति, पुनस्ता नभवन्तीत्यर्थः ॥

णवदड्ढसंखचुण्णअणिहट्टसीसअविलेविआ चिहुरा ॥
ससिकिरणकन्तिधवला वि होन्ति भमरउलसच्छाआ ॥२०॥

---

१ भर्जितेन वा-ख. । २ नश्यति-ख. । ३ गूढोऽपि-ख. । ४ जटीभूतोपि-ख. । ५ विविक्तो भवतीति-ख. । ६ सितकर्पटिकेति प्राचीनतरपुस्तकान्तरे पाठः । ७ पारदमलिनेन लिप्त-ख. । ८ सुसङ्गत-यूकाख्यान्-ख. । ९ लिक्षासहिता यूकाः-ख. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

नवदग्धशंखचूर्णकनिघृष्टसीसकविलिप्ताश्चिकुराः ।
[1]शशिकिरणकान्तिधवला अपि भवन्ति [2]भ्रमरकुलसच्छायाः ॥

तत्कालं पुटपाकदग्धस्य शङ्खस्य कम्बोर्यच्चूर्णं तेन निघृष्टं समरसीकृतं यत् सीसकं नागं तेन विलिप्ताः केशाः पलितशुक्ला अपि भ्रमरवत् कृष्णीभवन्तीति ॥

भंगरअलोहतिफलावीअअकणवीरणीलिसमभाअं ॥
बहुसो गुडकअधूअं करेइ पलिआइ कसणाइ ॥२१॥

भृंगरजोलोहत्रिफलाबीजककरवीरनीलीसमभागम् ।
बहुशो गुडकृतधूपं करोति [3]पलितानि कृष्णानि ॥

मार्कवशस्त्रचूर्णत्रिफलाऽसनहयमारनीलिनीनां [4]समाभागा यस्मिन् तत् तथाविधं द्रव्यं बहुवारं गुडधूपकृताधिवासं लेपेन जरादग्धान् शुक्लकेशान् कृष्णयतीति ॥

माअन्दवीअतिफलाणीलीभंगरअपंकलोहेहि ॥
पलिआइ कुणइ लेवो सकंजिओ अलिकुलणिहाइ ॥२२॥

आम्रवीजत्रिफलानीलीभृङ्गरजःपङ्कलोहैः ।
पलितानि करोति लेपः सकाञ्जिकोऽलिकुलनिभानि ॥

आम्रास्थिसारं त्रिफला तथा नीलिनी तथा केशरञ्जनरस(ज)स्तथा पङ्कः पद्मिनीतलकर्दमः (तथा) शस्त्रचूर्णमित्येतैः काञ्जिकसंयुक्तैर्लेपो जरां नाशयतीति ॥

कच्चूरतअरसामासेलेहि समं सुवट्टिआ रअणी ॥
रंजेइ धवलचिहुरे जणस्स गुडधूविए बहुसो ॥२३॥

कर्चूरतगरश्यामाशैलैः [5]समं सुवर्तिता रजनी ।
रञ्जयति धवलचिकुरान् जनस्य [6]गुडधूपितान् बहुशः ॥

कर्चूरं कयलमिति प्रसिद्धं तेन, तथा कुटिलं तथा प्रियङ्गुस्तथा शिलापुष्पमेतैः सह सुपिष्टा हरिद्रा । किमुक्तं भवति— कर्चूरादीनां चतुर्णां समांशानां यावत् परिमाणं तावत्परिमाणा हरिद्रा । सा बहुशो [7]गुडधूपकृताधिवासं पलितं लेपान्नाशयतीति ॥

सेलुसिवाखंभारीकाअणिकलिरुक्खणिम्बतेल्लाण ॥
णासेण पलिअविहडणमेक्के कं दुद्धणिरअस्स ॥२४॥

---

१ शशिकर–प्रा.पु. । २ भ्रमरकुलसदृशाः–प्रा. पु. । ३ कृष्णानि पलितानीति क्रमः ख.पुस्तके । ४ समभागा–ख. । ५ समेत्यन्यत्र पाठः । ६ गुडधूपिता–ख. । ७ गुडधूपकृताधिवासा–ख. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

शेलुशिवाखम्भारीकाकनीकलिवृत्तनिम्बतैलानाम् ।
नस्येन पलितविघटनमेकैकं दुग्धनिरतस्य ॥

क्षीराहारस्य सतः पुरुषस्य शेल्वादिफलानां सम्बन्धितैलं नस्येनोपयुक्तं जरां विनाशयतीति । तत्र शेलुः श्लेष्मान्तकः, शिवा हरीतकी, खम्भारी श्रीपर्णी, काकनी गुञ्जा, कलिवृक्षो विभीतकः, निम्बः पिचुमन्दः। एतेषामेकतमस्यापि फलसारनिर्गतेन तैलेन नस्यप्रयोगादुक्तफलसम्पत्तिरिति ॥

समतिलकाअणिआवीअचुण्णतेल्लेण णावणं दिण्णं ॥
कुणइ घणकसणकुडिलं सुसिणिद्धं कुन्तलकलावं ॥२५॥

समतिलकाकनिकाबीजचूर्णतैलेन नावनं दत्तम् ।
करोति घनकृष्णकुटिलं सुस्निग्धं कुन्तलकलापम् ॥

समास्तुल्यभागास्तिला यस्य तादृशं यद् गुञ्जाफलान्तर्वर्तिसारचूर्णं तदुद्भवेन तैलेन प्रयुक्तं नस्यं चिकुरचयं सर्वैर्निजगुणैः संयुक्तं करोतीति ॥

कंजिअवट्टिअपरिपक्कसेलुफलमज्जलित्ततविआओ ॥
खररविअरेहि तेल्लं परिच्चुअं लोहभण्डाओ ॥
अब्भंगणासविहिणा सिहिगलणीलाइ कुणइ पलिआइ ॥
गलदसणसवणणासामुहणअणविआरसमणं अ ॥२६-२७॥

काञ्जिकवर्तितपरिपक्वशेलुफलमज्जलिप्ततप्तात् ।
खररविकरैस्तैलं परिच्युतं लोहभाण्डात् ॥
अभ्यङ्गनस्यविधिना शिखिगलनीलानि करोति पलितानि ॥
गलदशनश्रवणनासामुखनयनविकारशमनं च ॥

काञ्जिकेनारनालेन पिष्टो योऽसौ श्लेष्मान्तकफलस्य मज्जा सारस्तेनाभ्यक्तात्, शस्त्रमयाद् भाजनात् तीक्ष्णार्करश्मिभिस्तापिताद् यत् तैलं प्रस्रवति तेन नस्याभ्यङ्गप्रयुक्तेन मयूरकण्ठकृष्णानि पलितानि संपद्यन्ते, तथा तत् तैलं कण्ठादिविकाराञ्छमयतीति ॥ युगलकम् ॥

विहिणा सिहिसिहाभंगरअसरससिद्धेण सुरहिसारेण ॥
कअणावणाण णासन्ति सत्तरत्तेण पलिआइ ॥२८॥

विधिना शिखिशिखाभृङ्गरजःस्वरससिद्धेन सुरभिसारेण ।
कृतनावनानां नश्यन्ति सप्तरात्रेण पलितानि ॥

शिखिशिखा मयूरशिखा। मार्कवस्वरसे [1]कल्कीकृतया तया सिद्धो यः सुरभिसारो घृतं तद् नस्यप्रयोगेण सप्तरात्रमुपयुक्तं जरां नाशयति। विधिरत्र स्वरससिद्धस्य तैलस्य पूर्वमुक्तो यः स एवेति॥

---

१ कल्कीकृता–ख. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अइअम्बिलकंजिअवट्टिएहिं एरंडमूलकुट्ठेहिं ॥
पउण्णाडलेविआ वा सिरविअणा दूरमोसरइ ॥२९॥

अत्यम्लकाञ्जिकवर्तिताभ्यामेरण्डमूलकुष्ठाभ्याम् ।
[1]प्रपुन्नाडलिप्ता वा शिरोवेदना दूरमपसरति ॥

शुद्धारनालपिष्टाभ्यां गन्धर्वविषाणयोर्मूलाभ्यां शिर(स)आर्तिर्नश्यति, पीडा शाम्यतीति ॥ अथवा एडगजबीजेन पूर्वोक्तद्रव्यपिष्टेन लेपान्नश्यतीति ॥

*णाअरकक्कविमीसं छीरं णासेण जोइअं सहसा ॥
णाणादोषोब्भूअं सिरोरुअं हणइ तीव्वतरं ॥३०॥

*नागरकल्कविमिश्रं क्षीरं नस्येन योजितं सहसा ।
नानादोषोद्भूतं शिरोरुजं हन्ति तीव्रतरम् ॥

शुण्ठीचूर्णसंयुतं गोदुग्धं नस्येनोपयुक्तं नानादोषसमुद्भूतां शिरोवेदनां तीव्रामपि झटिति-शमयतीति ॥

तेल्लाल्लवत्थवे[2]ड्ढिअसुरविल्लकिलिञ्चआण एक्कस्स ॥
जलणादीविअगलिआ सिमिसिमिआ हरइ सुइसूलं ॥३१॥

तैलार्द्रवस्त्रवेष्टितसुरविल्वक्षुद्रमदारुणोरेकस्य ।
ज्वलनादीपितगलिता सिमिसिमिका हरति श्रुतिशूलम् ॥

तिलतैलेनार्द्रीकृतं यद् वस्त्रं तेन वेष्टितयं र्देवदारुमालूरकसुक्ष्मकाष्ठयोर्मध्यादेकतरस्य[3] संबन्धिनी अग्निप्रज्वलिता[4] सती गलिता प्रस्नुता यासौ सिमिसिमिकाशव्दोपलक्षिता स्नेहकणिका सा कर्णान्तःप्रविष्टा कर्णरुजं हरतीति ॥

हिंगुवआमिसिसेन्धवणाअरसुरदारुकुट्ठपरिपक्कं ॥
गोमअरसेण तेल्लं समत्थसुइरोअणिद्दलणं ॥३२॥

हिङ्गुवचामिसिसैन्धवनागरसुरदारुकुष्ठपरिपक्वम् ।
गोमयरसेन तैलं समस्तश्रुतिरोगनिर्दलनम् ॥

रामठोग्रगन्धाभ्यां तथा मिस्या शतपुष्पया, लवणेन, शुण्ठ्या, देवदारुणा, वाप्येन च गोशकृद्रसकल्कीकृतेन सिद्धं तैलं सर्वश्रवणगदविनाशनम् । पचनविधिरत्र स्वरसस ध्यतैलवदिति ॥

---

१ 'प्रपुन्नाडलेपनाद्वा' इति चेत् साधीयान् पाठः । २ वोढिश्र-ख. । ३ देकतमस्य-ख. । ४ प्रज्वालिता-ख.
*गाथेयं ख.पुस्तकादावत्र नोपलभ्यते ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

रूविअदलवेढ्ढिअजलणसिण्णलसुणंबु सवणसूलहरं ॥
सवणाण भरणविहिणा गोसे णिहुडुंगितोअं वा ॥३३॥

रूपिकदलवेष्टितज्वलनस्विन्नलशुनाम्बु श्रवणशूलहरम् ।
श्रवणानां भरणविधिना प्रभाते निहुडुङ्गितोयं वा ॥

अर्कपल्लवेन वेष्टितं यद् रसोनमूलं [१]ज्वलने मन्दाग्नौ कुक्कूले स्विन्नं तद्रसो निष्पीडन-निष्क्रान्त[२]स्तेन [३]कर्णपूरणं श्रवणशूलहरम् । अथवा सुधावृत्तजलं श्रवणपूरणविधिना शूलमपहरति । सुधावृत्तस्य यावदर्कोदयो नजातस्तावद् यज्जलं स्रवति तस्यायं प्रयोग इति ॥

ओसरइ [४]ससेन्धअमेसमुत्तपरिपूरिआण सवणाण ॥
विअलन्तपूअवेअणाउराण दुक्खं मुहुत्तेण ॥३४॥

अपसरति ससैन्धवमेषमूत्रपरिपूरितयोः श्रवणयोः ।
विगलत्पूयवेदनातुरयोर्दुःखं मुहूर्त्तेन ॥

मेषशब्देनात्र छागो विवक्षित इत्याचार्याः । तेन सैन्धवलवणयुकेन छागमूत्रेण कृतपूरणयोः कर्णयोः [५]स्यन्दमानपूतिपाकजनितव्यथयोरपि घटिकाद्वयमात्रपूरणात् शूलं निर्वतत इति ॥

मालइदलकुसुमरसेहि पूरिअं गोजलेण भरिअं व ॥
दूरेण परिहरिज्जइ सवणजुअं पूइरोएण ॥३५॥

मालतीदलकुसुमरसाभ्यां पूरितं गोजलेन भरितं वा ।
दूरेण परिह्रियते श्रवणयुगं [६]पूतिरोगेण ॥

सुमनःपल्लवानां रसेन माक्षिकेण च, अथवा गोमूत्रेणैव पूरितं कर्णयुग्मं कर्णस्रावव्याधिना वर्ज्यते, स तस्य पुनर्नभवतीति ॥

माहिसणवणीअजुअं सत्ताहं धण्णरासिपरिवसिअं ॥
णवमुसलिकन्दचुण्णं विद्धिअरं कण्णपालीण ॥३६॥

माहिषनवनीतयुतं सप्ताहं धान्यराशिपर्युषितम् ।
नवमुसलीकन्दचूर्णं वृद्धिकरं कर्णपालीनाम् ॥

नवायाः प्रत्यग्राया मुसल्या क्षुरिकाया मूलस्य चूर्णं महिषीनवनीतेन संयुक्तं सप्ताहोरात्रं व्रीहिकूटमध्ये स्थापितं सदभ्यङ्गाभ्यासात् कर्णपालीवृद्धिं करोतीति ॥

---

१ ज्वलनेन-ख. । २ निष्क्रान्तो निःसृतः-ख. । ३ कर्णपूरः श्रवणशूलहरः-ख. । ४ ससिन्धव-ख. । ५ स्पन्दमानपूति (पूय?) जनित-ख. । ६ पूयरोगेण ? ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

गुञ्जाफलचुण्णमीसिअजाअमहिसपयसमुब्भवं कुणइ ।।
घअमणुदिणमब्भंगेण कण्णविद्धिं जहिच्छाइ ।।३७।।

गुञ्जाफलचूर्णमिश्रितजातमाहिषपयःसमुद्भवं करोति ।
घृतमनुदिनमभ्यङ्गेन कर्णवृद्धिं यथेच्छया ।।

रक्तिकाफलसारचूर्णेन सहितं यन्माहिषं पयः क्वथितं ततो दधिभूतादुत्पन्नं यन्नवनीतं तत्सिद्धं घृतमभ्यङ्गाभ्यासाद् यथारुचि श्रोत्रपालीवृद्धिं करोतीति ।।

[1]विसगब्भिअतित्तालाउतेल्लमट्ठउणखरजलबिपक्कं ।।
एक्कब्भङ्गेण वि कुणइ कण्णपालीउ विपुलाउ ।।३८।।

विषगर्भतिक्तालाबुतैलमष्टगुणखरजलविपक्वम् ।
एकाभ्यङ्गेनापि करोति कर्णपालीर्विपुलाः ।।

कटुतुम्ब्या बीजोद्भवं [2]तैलमष्ट(म)भागमात्रविषसंयुक्तं तैलादष्टगुणेन रासभमूत्रेण पक्वं सकृदभ्यङ्गात् कर्णपालीवृद्धिं करोतीति ।।

सिअसरिसवविहईफलरोहिअभ्भसपित्तसुरहिपिसिएहि ।।
होइ थणसवणविद्धो माहिसणवणीअसहिएहि ।।३९।।

सितसर्षपबृहतीफलरोहितझषपित्तसुरभिपिसितैः ।
भवति स्तनश्रवणवृद्धिर्माहिषनवनीतसहितैः ।।

गौरसिद्धार्थककण्टकारीफलाभ्यां सह रोहिताख्यस्य मत्स्यस्य पित्तं रोहिणीकव्यं चैताभ्यां[3] तथा महिषीनवनीतेन युक्ताभ्यामभ्यङ्गात् कर्णकुचवृद्धिर्भवतीति ।।

कुसुमरसतअरमोरअसिअसरिसवविहइपिप्पलितिलेहि ।।
हअगन्धासेन्धवमरिअकुट्ठजवमासमीसेहि ।।
उम्मलअमिणमो सवणपालिथणलिंगबाहुसिहराण ।।
कुणइ सआ किरमाणं विद्धिं णिपुणो गुणाण व्व ।।४०-४१

कुसुमरसतगरमयूरकसितसर्षपबृहतीपिप्पलीतिलैः ।
हयगन्धासैन्धवमरिचकुष्ठयवमासमिश्रैः ।।
उन्मलनमिदं [4]श्रवणपालिस्तनलिङ्गबाहुशिखराणाम् ।
करोति सदा क्रियमाणं वृद्धिं निपुणो गुणानामिव ।।

१ विसगब्भ-ख. । २ तैलमष्टभागमात्रं-ख. । ३ शुष्कचूर्णीकृताभ्याम्-मु० पु० । ४ श्रवणपाणि-ख. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

माक्षिकं तथा कुटिलं तथाऽपामार्गस्तथा गौरसिद्धार्थास्तथा कण्टकारी तथा कणास्तथातिलास्तथाऽश्वगन्धा तथा लवणं तथोषणं तथा व्याधिस्तथा यवास्तथामाषाश्चेत्येतैः समभागैः कृतं समुद्वर्तनं [1]कर्णपालीकुचध्वजस्कन्धानां [2]सदाऽभ्यस्यमानं वृद्धिं करोति, गुणानां श्रु तादीनामभियुक्तो यथेति युगलकम् ॥

भल्लाअअविहईफलदालिमछल्लीहि साहिअं कुणइ ॥
सरिसवतेल्लं लिङ्गं जणस्स हअलिङ्गपडिरूवं ॥४२॥

भल्लातकबृहतीफलदाडिमत्वक्साधितं करोति ।
सर्षपतैलं लिङ्गं जनस्य हयलिङ्गप्रतिरूपम् ॥

अरुष्करकण्टकारीफलदाडिमफलत्वक्साधितं यत् पूर्वोक्तशुद्धाम्बुयुक्त्या सम्पादितं सिद्धार्थकतैलं बल्लोकस्याभ्यासान्महासाधनतां करोतीति ॥

पुडदड्ढपउइणीदलभल्लाअअसलिलकसणलोणाण ॥
भूईइ कालपरिणअविहईफलवारिपिट्ठाइ ॥
महिसपुरीसुम्मलिअं णरसाहणमणुविलेविअं होइ ॥
मुसलंव मम्महाउरजुअईजणदप्पविद्दवणं ॥४३–४४॥

पुटदग्धपद्मिनीदलभल्लातकसलिलकृष्णलवणानाम् ।
भूत्या [3]कालपरिणतबृहतीफलवारिपिष्टया ॥
महिषपुरीषोन्मलितं नरसाधनमनुविलिप्तं भवति ।
मुशलमिव मन्मथातुरयुवतिजनदर्पविद्रावणम् ॥

पुटपाकदग्धस्य पद्मिनीपत्रस्य तथाऽरुष्करस्य तथा सलिलस्य बालकस्य तथा [4]सौवर्चलाख्यस्य-लवणस्य चेत्येषां भस्मना सुपक्वकण्टकारीफलरसमिश्रितेन प्रागेव शूलाक्तशकृतोद्वर्तितमभ्यङ्गान्नृवराङ्ग[5] महत्त्वादुक्तकार्यक्षमं भवतीति ॥ युगलकम् ॥

जलसूअरोहिणीपिसिअचुण्णमाहिसघउम्मलिज्जन्तं ॥
लिङ्गं तरुणतुरंगमलिंगपमाणं समुव्वहइ ॥४५॥

[6]जलशूकरोहिणीपिसितचूर्णमाहिषघृतोन्मल्यमानम् ।
लिङ्गं तरुणतुरङ्गमलिङ्गप्रमाणं समुद्वहति ॥

१ कर्णाकर-ख. । २ सदा घृष्यमाणं-ख. । ३ कालपर्युषित-ख. । ४ सौकृष्णलवणात्स्य-ख. । ५ नरवराङ्गं-ख. । ६ जलसूत-ख. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

शैवालेन तथा [1]ताम्रामांसस्य शुष्कस्य चूर्णेन (तथा) महिषीघृतेनो (महिषीघृतसहितेनो ?) द्धर्त्यमानं [2]लिङ्गमुक्तप्रमाणं भवतीति ॥

विहईफलभल्लाअअणलिणीदलसेन्धवसलिलसूएहि ॥
माहिषणवणीअकरंविएहि हअपरिमलाकन्दे ॥
सत्ताहमत्तवसिएहि सेरिहिपुरीसकअदढुम्मलणं ॥
लित्तमेएहि जाअइ लहुकअखरसाहणं लिङ्गं ॥४६–४७॥

बृहतीफलभल्लातकनलिनीदलसैन्धवसलिलशूकैः[3] ।
माहिषनवनीतमिश्रितै[4]र्हयपरिमलाकन्दे ॥
सप्ताहमात्रोषितै[5]र्महिषीपुरीषकृतदृढोन्मलनम् ॥
लिप्तमेतैर्जायते लघूकृतखरसाधनं लिङ्गम् ॥

पूर्वं महिषीशकृता गाढमुद्धर्तितं पश्चादेतैर्द्रव्यैर्लिप्तं नृसाधनमुक्तरूपं भवति । कैर्द्रव्यैः–निदिग्धिकाफलेन तथा भल्लातकफलेन तथा पद्मिनीपत्रेण तथा लवणेन तथा शैवालेन चेत्येतैः समभागचूर्णीकृतैर्महिषीनवनीतेन मिश्रीकृतैः सद्भिरश्वगन्धाया मूले उत्कीर्णेऽन्तर्निहितैः पश्चात् सप्ताहमात्रं पर्युषितैरिति युगलकम् ॥

कणअरसमसिणवट्टिअहअगन्धाकन्दमीसपरिवसिअं ॥
माहिसणवणीअं विअवीअधोहरफलम्मि ॥
गोमअगाढुव्वट्टिअमेएण विलेविअं तिरत्तेण ॥
होइ हअलिंगसरिसं लिंगं कढिणंगणादइअं ॥४८–४९॥

कनकरसमसृणवर्तितहयगन्धाकन्दमिश्रितपर्युषितम् ।
माहिषनवनीतं विगतबीजधत्तूरकफले ॥
गोमयगाढोद्वर्तितमेतेन विलिप्तं त्रिरात्रेण ॥
भवति हयलिङ्गसदृशं लिङ्गं कठिनाङ्गनादयितम् ॥

[6]पूर्वं गोशकृता दृढोन्मलितं साधनं पश्चादेतेन द्रव्येण त्रिरात्रं लिप्तमुक्तरूपं भवति । केन द्रव्येण–मातुलरसेन सुश्लक्ष्णपिष्टेनाश्वगन्धामूलेन मिश्रितं महिषीनवनीतमुत्कीर्णस्य[7] [8]हरदयित-फलस्यान्तर्निहितमहोरात्रमेकं पर्युषितं कृत्वा तेनेति ॥ युगलकम् ॥

---

१ ताम्रमत्स्यस्य–ख. । २ लिङ्गं सुप्रमाणं–ख. । ३ सलिलसूत्रैः–ख. । ४ करम्बिते ? । ५ सैरिभीपुरीष ? ६ पूर्वोक्तं–ख. । ७ निष्काषितबीजस्येति । ८. हरदयितस्यान्त–ख. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

धवलकरवीरकिसलअछेउब्भववहलसलिलसंपुण्णं ॥
णअणजुअं णीरुज्जइ सहसव्विअ तक्खणुक्कुविअं ॥५०॥

धवलकरवीरकिसलयच्छेदोद्भववहलसलिलसंपूर्णम् ।
नयनयुगं नीरुजीभवति सहसैव [1]तत्क्षणोत्कुपितम् ॥

श्वेतहयमारबालपल्लवस्य त्रोटनादुद्भवो यस्य तादृशेन बहुना जलेन, तद्रसेनेत्यर्थः, सम्पूर्णं भरितं तत्कालविकृतं नेत्रयुग्मं तत्क्षणमेव विगतव्यथं भवतीति ॥

मोरअमूलं तम्ममअभाअणे थोअसेन्धवुम्मीसं ॥
मत्थुणिहित्तं भरणेण हरइ णवलोअणुक्कोवं ॥५१॥

मयूरकमूलं ताम्रमयभाजने स्तोकसैन्धवोन्मिश्रम् ।
मस्तुनिघृष्टं भरणेन हरति नवलोचनोत्कोपम् ॥

अपामार्गमूलं ताम्रभाण्ड ईषत्सैन्धवयुक्तं दधिमण्डेन निघृष्टं कृत्वा तेन पूरितयोर्नेत्रयोस्तरुणो विकारस्तत्कालमेव शाम्यतीति ॥

कण्णणिवद्धा सहएविमूलिआ हरइ लोअणुक्कोवं ॥
भरणेण सिग्गुपल्लवरसो व महुणा समुम्मीसो ॥५२॥

कर्णनिबद्धा[2] सहदेवीमूलिका हरति लोचनोत्कोपम् ।
भरणेन शिग्रुपल्लवरसो वा मधुना समुन्मिश्रः ॥

सहदेव्या दण्डोत्पलाया मूलं श्रोत्रपालीधृतं तत्क्षणात्कुपितयोर्नेत्रयोर्विकारं शमयति । अथवा शोभाञ्जनकिसलयस्य (नि)स्यन्दो माक्षिकसहितो नेत्रपूरणेन पूर्वोक्तं कार्यं करोतीति ॥

अणुदिअसं गोसे लोअणाइ जो धोइ तीणि वाराइ ॥
विमलजलभरिअवअणो सो मुच्चइ णअणरोएहि ॥५३॥

अनुदिवसं प्रभाते लोचने यो धावति त्रीन् वारान् ।
विमलजलभरितवदनः स मुच्यते [3]नयनरोगैः ॥

सुप्रभाते शिशिरनिर्मलस्वादुजलपूरितास्योऽञ्जलित्रयेण प्रतिदिवसं लोचने प्रक्षालयन् सर्वैर्नेत्ररोगैर्न कदाचिद् बाध्यते । स्वस्थवृत्तस्य च नित्याभ्यासार्थमयं प्रयोगो न तु विकृतस्येति ॥

हरइ तुरङ्गमजलघट्टमसिणकरवल्लिआजडा णीलीं ॥
अंजणजुत्तीइ णराण णीअमेत्तिव्व माहम्मं ॥५४॥

---

१ तत्क्षणात्कुपितम्-ख. । २ कर्णविनिष्ठा(निविष्ठा)-ख. । ३ नयनरोगेभ्य इति प्राचीनतरपुस्तकान्तरे ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

हरति तुरङ्गमजलघृष्टमसृणकारवल्लीजटा नीलिकाम् ।
अञ्जनयुक्त्या नराणां नीचमैत्रीव माहात्म्यम् ॥

अश्वप्रस्रावेण सूक्ष्मपिष्टं कारवल्ल्याख्याया ओषधेर्निष्पर्याया मूलमञ्जनयोगेनोपयुक्तं नीलिकां पटलाख्यं नेत्ररोगं हरति । आन्ध्यनीलिकाशब्दौ हि पटलपर्यायौ । यथा निकृष्टेन सह सौहार्दं गुणगरिमाणमिति ॥

पसुसलिलगाढभाविअसुमसिणसुरदारुरअभरिज्जन्तं ॥
पिल्लुम्मूलिअपह्मं पि पह्मलं होइ णेत्तजुअं ॥५५॥

पशुसलिलगाढभावितसुमसृणसुरदारुर[1]जोभ्रियमाणम् ।
पिल्लोन्मूलितपक्ष्माऽपि पक्ष्मलं भवति नेत्रयुगम् ॥

छागमूत्रेण पुनःपुनर्दत्तभावनं सुसूक्ष्मं यद् देवदारुकाष्ठचूर्णं तेन पूर्यमाणं लोचनयुगं चिरकालहरत्वात् (?) पतितपत्रमपि पुनर्जातैः पत्रैः शोभितं भवतीति ॥

गअणजलपिट्ठपिप्पलिकअअवआमलअरअणिणिम्मविआ ॥
बत्ती खवेइ णीसेसणअणरोए पउज्जन्ती ॥५६॥

गगनजलपिष्टपिप्पलीकतकवचा[2]मलयरजनीनिर्मिता ।
वर्त्तिः क्षपयति निःशेषनयनरोगान् प्रयुज्यमाना ॥

अवश्यायपानीयेन चूर्णीकृतया मागधिकया (तथा) कतकस्य काष्ठस्य? फलेन तथोग्रगन्धया तथा रक्तचन्दनेन तथा पिण्डहरिद्रयेत्येतैः समभागैः सम्पादिता वर्त्तिः सर्वनेत्रामयानुपयुक्ता हरतीति ॥

तरुसंठिअणहणिब्भिण्णपरिणआमलअसलिलभरिआण ॥
णअणाण [3]सममुक्कमन्ति झत्ति णीसेसदुक्खाइ ॥५७॥

तरुसंस्थितनखनिर्भिन्नपरिणतामलकसलिलभरितयोः ।
नयनयोः सममुत्क्रामन्ते झगिति निःशेषदुःखानि ॥

वृक्षस्थितस्यैव करजविदारितस्य सुपक्वस्य धात्रीफलस्य रसेन पूरितयोर्नेत्रयोः सर्वरुजोऽपसर्पन्तीति ॥

सिअतरुणमूलपल्लवसाहिअपसुदुद्धसेअजुत्तीइ ॥
ओसरइ पवणसूलं णअणाण मुहुत्तमत्तेण ॥५८॥

---

१ गर्भ–ख. । २ वचामलक–ख. ३ समसंक्रमन्ते–ख. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सिततरुणमूलपल्लवसाधितपशुदुग्धसेकयुक्त्या ।
अपसरति पवनशूलं नयनयोर्मुहूर्त्तमात्रेण ॥

सितपुष्पोपलक्षितं यत् तरुणमेरण्डं तस्य मूलं पत्राणि चैतैः कथितं यदजाक्षीरं तत्सेकयुक्त्याऽभ्युक्षणप्रयोगेण नेत्रयोर्वायुजं शूलमल्पेन कालेन शाम्यति । क्षीरस्य साधनयुक्तिः– एरण्डपत्रमूलयोः पलं पानीयपलैः षोडशभिः क्वाथयित्वा चतुर्भागशेषं पानीयं कृत्वा तत्र छागक्षीरपलानि चत्वारि मिश्रीकृत्य पुनः क्वाथयित्वा क्षीरपलान्येव चत्वारि ग्राह्याणीति ॥

कमपरिवड्ढिअचन्दणसेन्धवपत्थापलासखइरेहि ॥
अंजणमिणमो पडलंधकुसुमणीलीहरं भणिअं ॥५९॥

क्रमपरिवर्धितचन्दनसैन्धवपथ्यापलाशनिर्यासैः ।
अञ्जनमिदं पटलान्ध्यकुसुमनीलीहरं भणितम् ॥

उत्तरोत्तरभागवृद्ध्या चन्दनादिभिः साधितमञ्जनं पटलान्ध्यादीन् नेत्ररोगान् नाशयतीति सम्बन्धः । तत्र चन्दनं श्वेतमेव, लवणं, हरीतकी, किंशुकनिर्यास इत्येतैरेकैकांशवृद्ध्या श्लक्ष्णचूर्णितैरुक्तफलसिद्धिः । पटलादयो नेत्ररोगाः प्रसिद्धाः ॥

वासाहूसेअगिरिअण्णिआण मूलाइ जवसणाहाइ ॥
जलवट्टिआइ णोअन्ति फुल्लअं लोअणगआइ ॥६०॥

वर्षाभूश्वेतगिरिकर्णिकयोर्मूलानि यवसनाथानि ।
जलवर्तितानि नुदन्ति पुष्पकं लोचनगतानि ॥

वर्षाभूः पुनर्नवा, श्वेतगिरिकर्णिका [1]शुक्लकटभी तयोर्मूले सूक्ष्मयवचूर्णयुक्ते सलिलपिष्टे नेत्रन्यस्ते पुष्पाख्यं तद्रोगं निवारयतः । एकैकमनयोः कार्यकरमिति ॥

किंसुअरसपरिभाविअकरंजतरुवीअविरइआ वत्ती ॥
चिरजाअं वि पउत्ता फुल्लअमइरा समुच्छसइ ॥६१॥

किंशुकरसपरिभावितकरञ्जतरुवीजविरचिता वर्त्तिः ।
चिरजातमपि प्रयुक्ता पुष्पकमचिरात् समुद्ध्वंसयति ॥

पलाशनिर्यासेन मिश्रितं यत् करञ्जस्य नक्तमालस्य बीजानां चूर्णं तन्निर्मिता वर्तिर्बहुकालोत्पन्नमपि पुष्पाख्यं नेत्ररोगं शीघ्रमञ्जनेनापसारयतीति ॥

थण्णोण मसिणपत्थरघट्टाइ विभीअअस्स मज्जाइ ॥
णासइ फुल्लअमइरा णिसामुहे अञ्जिअच्छस्स ॥६२॥

---

१ शुक्लकधात्री–ख ।

स्तन्येन मसृणप्रस्तरघृष्टेन विभीतकस्य मज्जा ।
नश्यति पुष्पकमचिरान्निशामुखेष्वञ्जिताक्षस्य ॥

स्त्रीक्षीरेण सुश्लक्ष्णदृढपाषाणपिष्टो यः कलितरुफलस्य मज्जा सारस्तेन ([1]प्रदोषसमये) दत्ताञ्जननेत्रस्य पुष्पाख्यो रोगो नश्यतीति ॥

महुमीसिअकण्णमलंजिएहि णासइ जणस्स णअणेहि ॥
णत्तन्धं कडुआलअमसिणमसिअंजणेण व जहिच्छं ॥६३॥

मधुमिश्रितकर्णमलाञ्जिताभ्यां नश्यति जनस्य नयनाभ्याम् ।
नक्तान्ध्यं लघुमत्स्यमसृणमस्यञ्जनेन वा यथेच्छम् ॥

माक्षिकभावितेन स्वश्रवणगूथेन दत्ताञ्जनाभ्यां नेत्राभ्यां रात्र्यन्धता निवर्तते । अथवा सूक्ष्म-मत्स्यान् पुटपाकदग्धान् कृत्वा तत्कायजेन मसीचूर्णेन माक्षिकेनैव युक्तेनाऽञ्जने कृते पूर्वोक्तफलं संपद्यते । यथेच्छमिति पूर्वप्रयोगापेक्षया बोद्धव्यमिति ॥

पसुसलिलघट्टगुंजामूलंजिअलोअणस्स तिमिराइ ॥
जलघट्टजलहरंजिअणअणस्स व झत्ति णासन्ति ॥६४॥

पशुसलिलघृष्टगुञ्जामूलाञ्जितलोचनस्य[2] तिमिराणि ।
जलघृष्टजलधराञ्जितनयनस्य वा झगिति नश्यन्ति ॥

तिमिराख्या [3]नानाविधा नेत्ररोगाः छागमूत्रपिष्टेन रक्तिकामूलेन दत्ताञ्जनस्य निवर्तन्ते । अथवा पानीयनिघृष्टेन मुस्तेन कृताञ्जनस्याचिरेणैव विनश्यन्तीति ॥

तण्डुलधुअण[4]सुवट्टिअपडगालिअदोणफुल्लिमूलेण ॥
विहणिज्जइ पडलं लोअणाण णासेण दिण्णेण ॥६५॥

तण्डुलधावनमुवर्तितपटगालित[5]द्रोणपुष्पिकामूलेन ।
विहन्यते पटलं लोचनयोर्नस्येन दत्तेन ॥

द्रोणपुष्पिका [6]कुम्भयोनिस्तस्या मूलेन तण्डुलक्षालनजल[7]सुश्लक्ष्णपिष्टेन पटगालितेन वस्त्रपूतेन[8] नस्यप्रयुक्तेन पटलाख्यो नेत्रव्याधिर्नश्यतीति ॥

सुप्पाडणीइ घट्टा अहवा कणएण व रूप्पएण वा ॥
णासइ अञ्जणगुलिआ गिरिणो काणिच्छएण व्व ॥६६॥

---

१ सायंकाले । २ नयनस्येति पाठान्तरम् । ३ नानाविधानाम्-ख. । ४ धू(धो)अण-ख. । ५ द्रोण-फुल्लिका-ख. । ६ कुम्भयोनिर्नाम-ख. । ७ सुसूक्ष्मेण-ख. । ८ वस्त्रपूतेन वा-ख. ।

Digitized by Sarayu Trust Foundation Delhi and eGangotri.
CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सूर्पाटन्या घृष्टा[1]ऽथवा कनकेन रूप्यकेण वा ।
नश्यत्यञ्जनगुलिका [2]गिरेः कटाक्षेक्षणेन वा ॥

अञ्जनगुलिकाऽञ्जनपिटकाख्यो नेत्रव्याधिः सूर्पस्याटन्या प्रान्तेन, [3]सुवर्णेन, रूप्यकेण वा निघृष्टा सती [4]विनश्यति । अथवा पर्वतस्य कटाक्षैर्निरीक्षणेनेति ॥

अंकोलक्कजडाणं एक्कं ओहरइ कामलावाहिं ॥
तण्डुलजलेण णावणमग्घाअं जालिणिफलं वा ॥६७॥

अङ्कोलार्कजटयोरेक[5]मपहरति कामलाव्याधिम् ।
तण्डुलजलेन नावनमाघ्रातं जालिनीफलं वा ॥

अङ्कोल्लस्येरिकिल्लाख्यस्य वृक्षस्य तथार्कवृक्षस्य रूपिकस्य ये जटे मूले तयोर्मध्यादेकं तण्डुलधावननिघृष्टं नस्येनोपयुक्तं कामलां शमयति । अथवा जालिन्या जीमूतकाख्यस्यौषधिविशेषस्य सम्बन्धि फलं मर्दयित्वा[6]ऽऽघ्रातं पूर्वोक्तं कार्यं करोतीति ॥

जालिणिफलपरिवसिअंवुणावणं हरइ कामलावाहिं ॥
सिसिरजलमसिणवट्टिअकुमारिकन्देण व विईण्णं ॥६८॥

जालिनीफलपर्युषिताम्बुनावनं हरति कामलाव्याधिम् ।
शिशिरजलमसृणवर्तितकुमारीकन्देन वा वितीर्णम् ॥

देवताल्याः फलस्यान्तःपर्युषितं यज्जलं तेन [7]दत्तं नावनं कामलारोगं शमयति । अथवा शीतलजलसुसूक्ष्मपिष्टेन [8]कुमार्या अफलायाः कर्कट्या मूलेन दत्तं नस्यमुक्तं फलं करोतीति ॥

ओसरइ दोणफुल्लीरसरंजिअलोअणारविन्दस्स ॥
हिङ्गु विहिअंजणस्स व दारुणं वि कामलादुक्खं ॥६९॥

अपसरति द्रोणपुष्पिकारसरञ्जितलोचनारविन्दस्य ।
हिङ्गुविहिताञ्जनस्य वा दारुणमपि कामलादुःखम् ॥

द्रोणपुष्पिकारसेन दत्ताञ्जननेत्रस्याथवा रामठेनाञ्जिताक्षस्य तीव्रापि कामलावेदनाऽपसरतीति ॥

पत्थालत्तअदाडिमपसूअदुव्वारसो णिवारेइ ॥
णावणविहिणा खुंखुणअसोणिअं सआ पअट्टं पि ॥७०॥

---

१ अथ-ख. । २ गैरिकामा (काणा ?कोणा ?) क्षेण वा-ख. । ३ सुवर्णेन वा-ख. । ४ विनश्यतीति-ख. । ५ रेकैक-ख. । ६ सिंघितं-ख. । ७ दत्तनावना-ख. । ८ कुमार्याः कर्कट्याः-ख. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पथ्यालक्तकदाडिमप्रसूनदूर्वारसो निवारयति ।
नावनविधिना [1]नासिकासिराशोणितं सदा प्रवृत्तमपि ॥

हरीतकीलाक्षारसदाडिमपुष्पशाद्वलानां रसो नस्येन प्रयुक्तो नासिकासिरातो बहुकालप्रवृत्तमपि रक्तं निवारयति । तत्रायं विशेषः— दाडिमपुष्प[2]दूर्वारसयोरेकैकं नस्येन प्रयुक्तमुक्तकार्यं करोति । हरीतकीलाक्षारसौ तु प्रत्येकमेताभ्यां द्वाभ्यां रसाभ्यां सहितौ कार्यकरौ । चत्वार्यपि द्रव्याणि सह वा प्रयुक्तान्युक्तकार्यकराणीति ॥

परिवसिअसलिलवट्टिअपरिणअकुडुहुंचिकन्दणासेण ॥
णासारिसाइ णासं वअन्ति कअं वाउलीणम्मि ॥७१॥

पर्युषितसलिलवर्तितपरिणतकुडुहुञ्चीकन्दनस्येन ।
नासिकार्शांसि नाशं व्रजन्ति कृतमिवाकुलीने[3] ॥

अहोरात्रस्थापितेन जलेन पिष्टं यत् परिपक्वायाः कुडुहुञ्च्या निष्पर्यायाः मूलं तेन नस्योपयुक्तेन घ्राणविवरोत्पन्ना [4]दुर्नामिका नश्यन्ति, उपकारो दुर्जन इव । फलाविसंवादार्थमुपमानमिति ॥

मंजिट्ठातुत्थअकलमसालिजीवन्तीदारुरअणीहि ॥
सिद्धं सदुद्धमहरोपसग्गविणिवारणं मअणं ॥७२॥

मञ्जिष्ठातुत्थककलमशालिजीवन्तीदारुरजनीभिः ।
सिद्धं सदुग्धमधरोपसर्गविनिवारणं मदनम् ॥

मदनं सिक्थकं दुग्धेन सह मञ्जिष्ठया चित्रवल्ल्या तथा तुत्थकेन मयूरग्रीवेण [5]किटिभाख्येन [6]कार्परिकेणामृतासङ्गेन वा तथा कलमशालिना तथा जीवन्त्या जीवनीयया तथा दारुहरिद्रया, एतैश्चूर्णीकृतैः समांशैः सम्पन्नमोष्ठस्फुटनादिदोषविनाशनम् । साधनं त्वस्य- क्षीरं क्वाथयित्वा तन्मध्ये सिक्थकं गालयित्वा तन्मध्ये मञ्जिष्ठादिचूर्णं क्षिप्त्वा (घनीभूतेन?) [7]तेनाधरोष्ठावुपलिम्पेदिति ॥

सज्जरसकणअगेरिअफाणिअघअतेल्लसिन्धुसंजुत्तं ॥
सिद्धं सित्थअमहरप्फुडिओच्चडिआइवणाहरणं ॥७२॥

सर्जरसकनकगैरिकफाणितघृततैलसिन्धुसंयुक्तम् ।
सिद्धं सिक्थकमधरस्फुटितोच्चटितादिव्रणहरणम् ॥

---

१ नासिकाशिरःसंनिहितं-ख. । २ दूर्वारसावेवैकं-ख. । ३ ऽकुलीनैः-ख., ऽकुलीनेनेति पुस्तकान्तरे । ४ अनामिका-ख. । ५ किटिताख्येन-ख. । ६ कर्पूरिकेणा-ख. । ७ तेनाधरावुप-ख. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पचनसिद्धं सिक्थकं गालितं सदुक्तकार्यकरम्[1]। कथं गालितम्- रालया, सुवर्णगैरिकेन तथा गुडक्काथाग्रकल्केन फाणिताख्येन तथा [2]गव्यघृततैलाभ्यां लवणेन च संयुक्तम्। अयं तु विशेषः- प्रथमं घृततैले क्वाथयित्वा तन्मध्ये सिक्थकं द्रावयित्वा रालादिचूर्णं क्षिपेत्। तेन लिप्तयोरधरोष्ठयोः पित्तादिवशात् स्फुटितयोस्तथोच्चटितयोरुद्गतत्वचोर्यानि क्षतानि तानि नश्यन्तीति ॥

तण्डुलजलेण पिट्ठं काउंवरिआइ मूलमइमसिणं ॥
पीअं वअणपअट्टं खणेण रुहिरं विणासेइ ॥७४॥

तण्डुलजलेन पिष्टं काकोदुम्बरिकाया मूलमतिमसृणम्।
पीतं वदनप्रवृत्तं क्षणेन रुधिरं [3]विनाशयति ॥

काकोदुम्बरिका फल्गुस्तन्मूलं तण्डुलधावनजलेन निघृष्टं पीतं सद् मुखप्रवृत्तं दन्तस्रावादिरक्तं शमयतीति ॥

चव्विअधरिएहि मुहे णासइ जाईदलेहि मुहरोओ ॥
केसरवीएहि पुणो चलिआ दन्ता त्थिरा होन्ति ॥७५॥

चर्वितधृतैर्मुखे नश्यति जातीदलैर्मुखरोगः।
केसरवीजैः पुनश्चलिता दन्ताः स्थिरा भवन्ति ॥

सुमनःपल्लवैः पूर्वं चर्वितैस्तत आस्याभ्यन्तरे धृतैरास्यरोगो विनिवर्तते। वकुलवृक्षफलस्य बीजैः पूर्ववत्कृतैः [4]शिथिलाश्चापि दन्ता दशना बद्धमूला भवन्तीति ॥

घणकुट्ठेलाधणिअअलट्ठिमहुएलवालुआकवलो ॥
वअणाइ पूइगंधं हरइ सुरालसुणगंधं अ ॥७६॥

घनकुष्ठैलाधान्यकयष्टिमधुवेलवालुकाकवलः।
वदनात् पूतिगन्धं हरति सुरालशुनगन्धं च ॥

मुस्तवाप्यत्रुटिधान्यकफलैर्मधुयष्टिभिस्तथैलवालुकेन हरिवालुकेन चैतैः [5]कृतः कवल आस्यात् सहजदुर्गन्धित्वं तथा पीतस्य सुरादेरासवस्य तथा भुक्तस्य लशुनादेरुत्कटगन्धस्य द्रव्यस्य सम्बन्धिनं दुरामोदमपसारयतीति ॥

तम्बाजलगाढुक्काढिआओ मिसिचिहुरकुट्ठमिलिआओ ॥
णासेन्ति वअणदोसं सेविज्जन्ताउ पत्थाउ ॥७७॥

ताम्राजलगाढोत्क्वथिता मिसिचिकुरकुष्ठमिलिताः।
नाशयन्ति वदनदोषं[6] सेव्यमानाः पथ्याः ॥

---

१ कार्यकरणम्-ख. । २ गव्यघृततिलतैलाभ्यां ? । ३ प्रणाशयति-ख. । ४ स्खलिता दन्ताः-ख. । ५ कृतेन कवलेन वदनस्य दुर्गन्धं विनश्यतीति-ख. । कृतः कवल आस्याभ्यन्तरसञ्चार्यमाणद्रव्यापीड इति पुस्तकान्तरे पाठः । ६ सदेत्यधिकः पाठः पुस्तकान्तरे ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

हरीतक्योऽभ्यासेनोपयुज्यमाना दौर्गन्ध्याद्यास्यदोषं निवारयन्ति । कीदृश्यः- प्रथमं गोमूत्रेण गाढं घनत्वापत्तिपर्यन्तं कृतक्वाथाः पश्चात् शतपुष्पावालत्वाग्यचूर्णेन मिश्रिताः सत्य उपयुक्ता इति ॥

जाइफलकोसकुवलअवरंगमरुवअविणिम्मिआ हरइ ॥
घोरं वि पूइगंधं मुहविवरपरिट्ठिआ गुलिआ ॥७८॥

जातीफलकोशकुवलयवराङ्गमरुवकविनिर्मिता हरति ।
घोरमपि पूतिगन्धं मुखविवरपरिस्थिता गुलिका ॥

एतैर्द्रव्यैः सम्पादिता गुलिकाऽऽस्यकुहरस्था दुर्निवारमपि तद्दुर्गन्धमपोहति । कैर्द्रव्यैर्विनिर्मिता- जातीफलं प्रसिद्धं तस्य मज्जा, तथा कोशो जातीपत्रिका, कुवलयं कुष्ठं, वराङ्गं त्वक्, मरुवकं फणिज्जकमित्येतैः समांशैर्जलवर्तितैरिति । यत्र यत्र गुलिकावलेहत्वाद्यापादनाय विशिष्टं द्रवद्रव्यं नोक्तं तत्र तत्र सामान्यं पानीयमेव ग्राह्यमिति सर्वत्र स्थितिः ॥

विहडेइ पूइगंधं मुहरोअं हरइ खाइअमणुदिअहं ॥
दन्तहणं तेल्लजुअं कडुअं तित्तं कसाअं व ॥७९॥

विघटयति पूतिगन्धं मुखरोगं हरति खादितमनुदिवसम् ।
दन्तधावनं तैलयुतं कटुकं तिक्तं कषायं वा ॥

दन्तकाष्ठं कटुतिक्तकषायाणां रसानामन्यतमरससंयुक्तं तैलसिक्ताग्रं नित्यमभ्यस्यमानमास्यदौर्गन्ध्यं तद्व्याध्यन्तराणि च शमयतीति ॥

तम्बोलतिव्वचुण्णआन्तोडड्ढम्मि गंडूसो ॥
तेल्लेण कंजिएण व धरिओ विअणं विणासेइ ॥८०॥

ताम्बूलतीव्रचूर्णकान्तर्दग्धे मुखे गण्डूषः ।
तैलेन काञ्जिकेन वा धृतो वेदनां विनाशयति ॥

अतिखरेण ताम्बूलरङ्गेण दग्धस्यास्यस्य या व्यथा भवति तैलेनारनालेन वा कृतो गण्डूषस्तां शमयतीति ॥

जाइदलेलापिप्पलिलाआमहुमाउलुंगदललेहो ॥
किण्णरसममहुरसरं कुणइ णरं सइ पउज्जन्तो ॥८१॥

जातिदलैलापिप्पलीलाजमधुमातुलुङ्गदललेहः ।
किंनरसममधुरस्वरं करोति नरं सदा प्रयुज्यमानः ॥

एतैर्द्रव्यैः कृतो लेहोऽवलेह्यं द्रव्यं नित्यं [1]प्रयुज्यमानोऽशनेनाभ्यस्यमानः किंपुरुषतुल्यमानं[2] श्रव्यध्वनिं पुरुषं करोति । कैर्द्रव्यैः- जातिदलैर्जातिपत्रिकापल्लवै[3]रेलयैलया त्रुट्या तथा मागधिकया

१ प्रागुक्तमसताम्यस्यमानं-ख । २ तुल्यगान-ख. । ३ पल्लवैः सूक्ष्मैलया-ख. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तथा लाजैस्तथा माक्षिकेण तथा मातुलुङ्गवृक्षस्य पत्रैः । अत्र माक्षिकमवलेहत्वाय द्रव्यमिति ॥

सेहालिआजडाचव्वणेण गलसुंडिआ समोसरइ ॥
उवजीहिआवि णासाविवरसिरासोणिए गलिए ॥८२॥

शेफालिकाजटाचर्वणेन गलशुण्डिका समपसरति ।
उपजिह्विकापि नासाविवरसिराशोणिते गलिते ॥

शेफालिकाया[1]स्ताम्रवृन्ताख्याया लताया मूलस्य पुनः पुनरास्वादनेन [2]गलशुण्डिकाख्यस्तालुमूलजो रोगो निवर्तते । तथा जिह्वाया उपरि मूलस्थाने जिह्वासन्निभो यः स उपजिह्विकाख्यो व्याधिरपि निवर्तते । कदा- सिरावेधादियुक्त्या नासिकावाहिसिरामार्गेण रक्ते विगलिते सतीति ॥

सुरतरुवीअसगब्भं हअलद्दिरसेण साहिअं तेल्लं ॥
गलरोअसीसविअणा णावणविहिणा विणासेइ ॥८३॥

सुरतरुबीजसगर्भं हयशकृद्रसेन साधितं तैलम् ।
गलरोगशीर्षवेदना नावनविधिना विनाशयति ॥

तैलमेतन्नस्येनोपयुक्तमुक्तकार्यं कुरुते । कीदृशम्- अश्वशकृद्रसेन स्वरसयुक्त्या गर्भीकृतदेवदारुफलान्तर्वर्तिसारेण सिद्धं पक्वमिति ॥

[3]गुञ्जावराहकण्णीण मूलमेक्केक्कं समुद्धंसेइ ॥
चव्विअदसणक्कन्तं घुणदन्तअवेअणादुक्खं ॥८४॥

गुञ्जावराहकर्ण्योर्मूलमेकैकं समुद्ध्वंसयति ।
चर्वितदशनाक्रान्तं घुणदन्तकवेदनादुःखम् ॥

रक्तिकायास्तथा वराहकर्ण्या एकतरस्या मूलं चर्वितं सत् सरुजा दशनेनाक्रान्तं, तत्रैव धृतमित्यर्थः । तादृशं सद् घुणदन्तस्य व्याधिविशेषस्य सम्बन्धिनीं व्यथामपसारयति । अन्तर्द(र्ज)ग्धक्रमिदन्तो यत्र स घुणदन्तकाख्यो व्याधिरिति ॥

णिहुडुंगिणीलिजंघादुद्धलिआमूलिआण एक्काइ ॥
दसणक्कंताइ किमी णिपडइ दसणुब्भओ णिउणं ॥८५॥

निहुडुङ्गीनीलीजङ्घादुग्धलिकामूलिकानामेकया ।
दशनाक्रान्तया क्रिमिर्निपतति दशनोद्भवो निपुणम् ॥

---

१ स्ताम्रवृत्ताख्याया-ख. । २ गलमुण्डिकाख्य-ख. । ३ गुञ्जाबराहकण्णीमूलाण ? ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सुधावृक्षस्य तथा नील्या नीलिन्यास्तथा जङ्घाया: काकजङ्घायास्तथा दुग्धलिकाया अर्कपुष्पिकाया आसां या मूलिका मूलानि तासामन्यतमया सरुजादशनेनाक्रान्तयाऽवष्टब्धया [1]दन्तजो घुणो निःशेषं निपततीति ॥

अंगुट्ठअणहलेओ कीरइ हलिणीइ जम्मि पासम्मि ॥
तदुओ अवरदिगुब्भवघुणदन्तआ कीडओ पडइ ॥८६॥

अङ्गुष्ठकनखलेपः क्रियते हलिन्या यस्मिन् पार्श्वे ।
ततोऽपरदिगुद्भवघुणदन्तकात्[2] कीटकः पतति ॥

हलिन्या लाङ्गलिकया जलपिष्टया चरणाङ्गुष्ठे यस्मिन् दक्षिणे वामे वा लेपः क्रियते तत्कल्पनया तदन्यदिग्भागगतघुणदन्तकाख्यव्याधिजः कृमिर्निपततीति ॥

दुद्धोम्मीसिअकक्कडअचरणपरिपक्कघअकअब्भंगा ॥
ण हु कडाअन्ति दन्ता केवलं ताचरणलित्ता व ॥८७॥

दुग्धोन्मिश्रितकर्कटकचरणपरिपक्वघृतकृताभ्यङ्गा ।
न खलु कटकटायन्ते दन्ता केवलतच्चरणलिप्ता वा ॥

कर्कटकस्य कुरुविल्लाख्यस्य मत्स्यविशेषस्य पादास्तैर्गोक्षीरेण पानीयस्थाने प्रयुक्तेन पक्वैः सिद्धं यद् घृतं तेन कृताभ्यङ्गा बालादेर्दशनाः कटकटाशब्दं न कुर्वन्ति ॥ अथवा कर्कटकस्य[3]पादैर्वारिपिष्टैर्लिप्ताः सन्तस्तथा कुर्वन्तीति ॥

णासन्ति तक्खणाहअससससोणिअलेविआइ वंगाइ ॥
सजलाइ व जाईफलबाहिअछल्लीइ लित्ताइ ॥८८॥

नश्यन्ति तत्क्षणाहतशशशोणितलिप्तानि[4] व्यङ्गानि ।
सजलया वा जातीफलबाह्यत्वचा[5] लिप्तानि ॥

व्यङ्गानि मुखवैवर्ण्यकारीणि प्रसृतरूपाणि श्यामानि मण्डलानि त्वग्विकारस्तानि तत्क्षणव्यापादितशशरुधिराभ्यक्तानि निवर्तन्ते । यदि वा पानीयपिष्टया जातीफलस्याण्डपरिहारेण बाह्यत्वचा केवलया लिप्तानि सन्ति निवर्तन्त इति ॥

इङ्गुइफलमज्जा सिसिरसलिलपिट्ठा तिरत्तिमत्तेण ॥
लेवेण हरइ वंगं गंगासंगोव्व दुरिआइ ॥८९॥

इङ्गुदीफलमज्जा शिशिरसलिलपिष्टस्त्रिरात्रमात्रेण ।
लेपेन हरति व्यङ्गं गङ्गासङ्ग इव दुरितानि ॥

---

१ दन्तजोशेषं-ख. । २ घुणदन्तकः-ख. । ३ पादैः क्षीरपिष्टैरित्यन्यत्र पाठः । ४ लेपितानीत्यपिपाठान्तरम् । ५ वहिस्त्वचा-ख. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

इङ्गुदी [1]तिल्वकस्तत्फलस्य सारः [2]शीतलजलेन पिष्टः सन् लेपेन व्यङ्गं निदारयति । कार्याविसंवादार्थमुपमानं स्पष्टमिति ॥

कसणतिलकसणजीरअसिद्धत्थअजीरएहि मुहससिणो ॥
दुद्धेण कओ लेवो वंगकलंकं समुप्पसइ ॥६०॥

कृष्णतिलकृष्णजीरकसिद्धार्थकजीरकैर्मुखशशिनः ।
दुग्धेन कृतो लेपो व्यङ्गकलङ्कं समुद्ध्वंसयति ॥

कृष्णतिलाः प्रसिद्धाः, कृष्णजीरकं कालोपकुञ्चिका, तथा गौरसर्षपास्तथा जीरकं सिताजाजी, एतैः समभागैः पिष्टैर्गोक्षीरभावितैर्लेपो मुखचन्द्रस्य व्यङ्गमलमपसारयति । चन्द्रस्य यथा कलङ्को दुर्हरस्तथैव यो मुखस्य व्यङ्गकलङ्कस्तमप्ययं प्रयोगो हरतीत्युपमानप्रयोजनमिति ॥

अवहरइ [3]वअरमज्जा गुडमहुणवणीअसंजुआ वंगं ॥
पसुदुद्धमसिणपिट्ठा वारुणिछल्लीव्व लेवेण ॥६१॥

अपहरति वदरमज्जा गुडमधुनवनीतसंयुतो व्यङ्गम् ।
पशुदुग्धमसृणपिष्टा [4]वारुणीत्वगिव लेपेन ॥

वदरस्य वर्कन्धोरस्थिसारं, गुडं तथा क्षौद्रं तथा नवनीतं मिश्रितं (सद्) व्यङ्गमपहरति । यथा छागक्षीरेण सूक्ष्मपिष्टा विशालात्वग् लेपेन पूर्वप्रयोगकार्यं करोतीति ॥

तुषरहिअमसिणजवरअसरिसवमहुलट्ठिलोद्धलेवेण ॥
होन्ति मुहाइं विणिज्जिअचामीअरचारुसोभाइं ॥६२॥

तुषरहितमसृणयवरजःसर्षपमधुयष्टिलोध्रलेपेन ।
भवन्ति मुखानि विनिर्जितचामीकरचारुशोभानि ॥

निस्तुषीकृत्य पिष्टानामक्षतानां सूक्ष्मचूर्णेन तथा गौरसिद्धार्थकैस्तथा मधुयष्ट्या तथा लोध्रेण शवरेणैतैरपि सूक्ष्मपिष्टैः पानीयभावितैः कृतलेपान्याननान्यतिगौराणि सर्वकलङ्कदोषरहितत्वाद् भवन्ति । चामीकरं सुवर्णमिति ॥

परिणअवडपण्णसुवण्णछल्लिपंकअपिअंगुमहुएहि ॥
मंजिट्ठाकालेअअलक्खारुणलोद्धभाएहि ॥
जलवट्टिएहि लेवो वअणाइ विलासिणीण सुहआइं ॥
कुणइ विणिज्जिअसंपुण्णसरअससिबिंवसोहाइं ॥६३–६४॥

१ भिल्वकः–ख. । २ शीतलसलिलेन–ख. । ३ बोरमज्जा–ख. । ४ वारुणीत्वगवा–ख. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

परिणत[1]वटपर्णसुवर्णत्वक्पंकजप्रियंगुमधुकैः ।
मञ्जिष्ठाकालेयकलाक्षारुणलोध्रभागैः ॥
जलवर्तितैर्लेपो वदनानि विलासिनीनां सुभगानि ।
करोति विनिर्जितसंपूर्णशरच्छशिबिम्बशोभानि ॥

परिपक्वानां वटस्य न्यग्रोधवृक्षस्य पत्राणां तथा सुवर्णत्वगाख्याया ओषध्यास्तथा पङ्कजस्य पद्मस्य तथा श्यामायास्तथा मधुयष्ट्यास्तथा चित्रवल्ल्यास्तथा कालेयकस्य पीतसारस्य तथा द्रुमव्याधेस्तथा कुङ्कुमस्य तथा शबरस्येत्येषां समैर्भागैः पानीयपिष्टैः कृतेन लेपेन मुखान्यतिवर्णाढ्यानि भवन्तीत्युपमानार्थ इति । कालेयकस्यालाभे दारुहरिद्रा देयेति सर्वत्रैव बोद्धव्यम् । शिष्टं सुबोधम् ॥ युगलकम् ॥

जलफलिणिकोलमज्जाचन्दणकालेअएहि सरिसेहि ॥
वअणाइं कुणइ लेवो कमलोअरकंतिचोराइं ॥९५॥

जलफलिनीकोलमज्जचन्दनकालेयकैः सदृशैः ।
वदनानि करोति लेपः कमलोदरकान्तिचौराणि ॥

बालकप्रियङ्गुबदरफलसारमलयजपीतसारैः समांशैः पानीयपिष्टैः कृतो लेपो मुखान्यपहृतपद्मकर्णिकाकाराणि करोतीति ॥

कुंकुमकालेअअकणअछल्लिपउमअमिणालमलएहि ॥
पत्तङ्गरोअणाकोलसारसामाहिकुट्ठेहि ॥
वितुसमसूरअणिसाजुअमहुअलोद्धे हि सलिलपिट्ठेहि ॥
लेओ करेइ वअणं लहुइअमिअलंछणच्छाअं ॥९६-९७॥

कुङ्कुमकालेयककनकत्वक्पद्मकमृणालमलयैः ।
[2]पट्टरङ्गरोचनाकोलसारश्यामाहिकुष्ठैः ॥
वितुषमसूरकनिशायुगमधुकलोध्रैः सलिलपिष्टैः ।
लेपः करोति वदनं लघूकृतमृगलाञ्छनच्छायम् ॥

एतैर्द्रव्यैर्लेपो मुखमतिशयितपूर्णशशिशोभं करोति । कैर्द्रव्यैः- काश्मीरकतृतीयचन्दन[3]सुवर्णच्छविकलशोशीरचन्दनैस्तथा पट्टरङ्गगोरोचनांबदरास्थिसारप्रियङ्गुनागकेसरवाप्यैस्तथा निस्तुषमसूरसूक्ष्मचूर्णहरिद्राद्वयमधुयष्टिशबरैरित्येतैः समांशैर्जलपिष्टैरिति ॥ युगलकम् ॥

---

१ वटपत्र-ख. । २ पतङ्ग-ख. । ३ सुवर्णच्छेति पाठान्तरम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

महुसारकंगुसरिसवपउमअकालेअअलोद्धरअणीहि ॥
पइऊण घअं विहिणा सिचअंचलगालिअं पच्छा ॥
णिम्मलमअणुम्मीसं [1]पलअद्धिअपवरकुंकुमसणाहं ॥
सिसिरजलम्मि णिहित्तं मउअणले ताविअं णिभिअं ॥
वण्णअघएण इमिणा सिसिरेवि विहुरन्तकन्तिसुहआइ ॥
वअणाइ विलासवईण होन्ति तामरससोहाइं ॥९८–१००॥

मधुसारकङ्गुसर्षपपद्मककालेयकलोध्ररजनीभिः ।
पक्त्वा घृतं विधिना वसनाञ्चलगालितं पश्चात् ॥
निर्मलमदनोन्मिश्रं [2]पलार्धित[3]प्रवरकुङ्कुमसनाथम् ।
शिशिरजले निक्षिप्तं मृद्वनलतापितं निभृतम् ॥
वर्णकघृतेनामुना शिशिरेपि विस्फुरत्कान्तिसुभगानि ।
वदनानि विलासवतीनां भवन्ति तामरसशोभानि ॥

त्वग्रहिता मधुयष्टिः, कङ्गुः प्रियङ्गुस्तथा गौरसिद्धार्थकाः, पद्मकं कलशं तथा कालेयकं पीतचन्दनं तथा शबरं तथा पिण्डहरिद्रा, इत्येतैः कल्कद्रव्यैः समांशैरुक्तपानीयमात्रापक्वैर्घृतमुक्तमात्रं साधयित्वा पटपूतं कृत्वा ततो निष्कलङ्कीकृतसिक्थके(न) घृतपले कर्षत इव भावितं सत् श्रेष्ठकाश्मीरकेण तदर्धपरिमाणेन सहितं कार्यम् । ततः शीतलपानीये निक्षिप्तं तत उद्धृतं सदभ्यङ्गकालेऽनुत्कटाग्निना शनैर्द्रवितं कार्यम् । इत्येवं साधितेनानेन वर्णप्रकारित्वाद् वर्णकघृताभिधानेन घृतेन सुन्दरीणां मुखान्यभ्यक्तानि वैवर्ण्यकारिणि शिशिरकालेपि विलसद्दीप्तिसुन्दराणि पद्मच्छायानि भवन्तीति ॥ तिलकम् ॥

कुङ्कुममहुअकुचन्दणमंजिट्ठातरुविआरकरिसेहि ॥
तेल्लकुडवं विपक्कं दिउणिअपसुदुद्धसंजुत्तं ॥
वलितिलअवंगरहिआइ मंसलापंडुगंडसुहआइ ॥
कुणइ समब्भंगेण सत्ताहा कामिणिमुहाइ ॥१०१–१०२॥

कुङ्कुममधुकक्कुचन्दनमञ्जिष्ठातरुविकारकर्षैः ।
तैलकुडवं विपक्वं द्विगुणितपशुदुग्धसंयुक्तम् ॥
वलितिलकव्यंगरहितानि मांसलापाण्डुगण्डसुभगानि ।
करोति समभ्यङ्गेन सप्ताहात् कामिनीमुखानि ॥

---

१ जलवट्टिअपवरकुङ्कुमसणाहम् इति मु० पुस्तके । २ जर्जरितेति पाठान्तरम् । इदमग्रेतन् ख-पुस्तके न दृश्यते । ३ प्रचुर-ख. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अरुणेन तथा मधुयष्ट्या तथा कुचन्दनेन रक्तचन्दनेन तथा मञ्जिष्ठयाऽरुणया तथा तरुविकारेण लाक्षयैतैः प्रत्येकं कर्षपरिमाणैस्तैलपलचतुष्टयं द्विगुणछागक्षीरेण सहितं विपक्वं साधितं सत् सप्ताहात् सम्यगभ्यङ्गप्रयोगेण विलासिनीनां वदनानि त्वक्संकोचेन तथा कृष्णैर्विन्दुभिस्तथा व्यङ्गैर्मुखत्वग्वैवर्ण्यरूपैर्मण्डलै रहितानि परिपूर्णगौरकपोलसुभगानि करोतीति ॥ युगलकम् ॥

जलधोअमसिणवट्टिअटंकणकोविअकमलकअगब्भं ॥
तम्मादुद्धेण चउग्गुणेण मन्दाणले सिद्धं ॥
जुत्तीइ विमलसित्थअसंजोइअथोअकुंकुमुम्मीसं ॥
अइकुणइ वअणसोहं तेल्लं सिसिरम्मि सविसेसं ॥१०३–१०४॥

जलधौतमसृणवर्तितटंकणकोपितकमलकृतगर्भम् ।
ताम्रादुग्धेन चतुर्गुणेन मन्दानले सिद्धम् ॥
युक्त्या विमलसिक्थकसंयोजितस्तोककुङ्कुमोन्मिश्रम् ।
अतिकरोति वदनशोभां तैलं शिशिरे सविशेषम् ॥

एतत् तैलमुक्तक्रमेण मृद्वग्नौ सिद्धं सच्छिशिरकाले वातप्रधानेपि मुखाभ्यङ्गेन प्रयुक्तं बधूनां वदनमेकविंशतिदिनाभ्यासादतिसुन्दराभं करोति । कीदृशं— कमलं ताम्रं, तच्चूर्णं गर्भे यस्य, कीदृक् चूर्णं— प्रथमं टङ्कणेन सुवर्णपाचिकयोपलिप्तं सत् ततः कोपितं शस्त्रेण परुषेणचूर्णीकृतं ततो जलेन पुनः पुनर्विमलीकृतं ततः सूक्ष्मपिष्टम्, एवंविधताम्रचूर्णगर्भं तत्तैलं चूर्णचतुर्गुणपरिमाणं तच्चतुर्गुणगोक्षीरसंयुक्तं, युगपत् पक्त्वा ततो युक्त्या वैदग्ध्येन विमलीकृतं यन्मधूच्छिष्टं तैलपले कर्षमात्रपरिमाणम् अष्ट(म)भागमात्रकुङ्कुमसंयुक्तम्, तेन तत् तैलं मिश्रं सदुपयोज्यमिति ॥ युगलकम् ॥

अवहरइ गंडमालं सुरहीसलिलेण संजुअं पीअं ॥
गिरिकण्णिआपुरंदरवारुणिमूलाण एक्केकं ॥१०५॥

अपहरति गण्डमालां सुरभीसलिलेन संयुतं पीतम् ।
गिरिकर्णिकापुरन्दरवारुणीमूलयोरेकैकम् ॥

[1]श्वेतस्पन्दायास्तथा पुरन्दरवारुण्या विशालायाश्च सम्बन्धिनोर्मूलयोरेकतरं[2] गोमूत्रेण पिष्टं[3] पीतं सत् ([4]गण्डान्ते कपोलमूले)मालारूपां गण्डापचीति प्रसिद्धां शमयतीति ॥

सरिसेहि जवाकुसुमक्कदुद्धतिलतेल्लजावअरसेहि ॥
णासेइ गण्डमालं लेओ कोवं पणामोव्व ॥१०६॥

---

१ श्वेतस्यन्दाया इत्यपि पाठान्तरम् । २ रेकतमं-ख. । ३ पिष्टा (पिष्ट्वा)-ख. । ४ गण्डे कपोलान्ते या माला मालारूपोव्याधिर्गण्डापचीति प्रसिद्धा तामिति ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सदृशैर्जवाकुसुमार्कदुग्धतिलतैलयावकरसैः ।
नाशयति गण्डमालां लेपः कोपं प्रणाम इव ॥

तुल्यमात्रैर्जवाकुसुमस्य सवनाख्याया लोके प्रसिद्धस्य पुष्पस्य रसेन तथाऽर्कवृक्षस्य क्षीरेण तथा तिलतैलेन तथा लाक्षारसेनेत्येतैर्मिश्रितैः कृतो लेपः पूर्वोक्तं व्याधिं निवर्तयति । उपमानं फलाविसंवादार्थमिति ॥

विहडेइ गंडमालं गहिअं पूसम्मि कंधरावद्धं ॥
पीअं व घउम्मीसं सिअपव्वअकण्णिआमूलं ॥१०७॥

विघटयति गण्डमालां गृहीतं पुष्ये कन्धराबद्धम् ।
पीतं वा घृतोन्मिश्रं सितपर्वतकर्णिकामूलम् ॥

श्वेतगिरिकर्णिकामूलं तिष्यर्क्षे गृहीतं व्याधितस्य ग्रीवाग्रथितं सत् पूर्वोक्तं व्याधिं नाशयति । अथवा तदेव गोघृतेन सहावलीढमुक्तकार्यं करोतीति ॥

छुच्छुन्दरिसाहिअतेल्लब्भत्ता दारुणावि वेएण ॥
परिहरइ गण्डमाला धणरहिअं धुत्तकुट्टीव्व ॥१०८॥

छुच्छुन्दरीसाधिततैलाभ्यक्ता दारुणापि वेगेन ।
परिहरति गण्डमाला धनरहितं धूर्तकुट्टनीव ॥

छुच्छुन्दरी सुगन्धमूषिका तया पक्वं यत् तैलं तेनाभ्यक्ता सती गण्डमाला रोगिणं शीघ्रमेव घोरापि परित्यजति, न तं बाधत इत्यर्थः । उपमानं गाथापूरणार्थमेवेति । अत्र साधनयुक्तिः [1]सिद्धाम्बुयुक्त्या ॥

जो खाइ वल्लतेल्लं पिअइ कसाअं व सेलुवक्खस्स ॥
फुडिआवि गंडमाला तस्स फुडं णिव्वणा होइ ॥१०९॥

यः खादति वल्लतैलं पिबति कषायं वा शेलुवृक्षस्य ।
स्फुटितापि गण्डमाला तस्य स्फुटं निर्व्रणा भवति ॥

वल्ल इति देशान्तरप्रसिद्धसंज्ञो निष्पावाख्यः शिम्बिधान्यविशेषः । [2]तत्तैलं योऽश्नाति तस्य भग्नापि गण्डमाला रोहति । निवृत्तव्याधिरसौ भवतीत्यर्थः । अथवा श्लेष्मान्तकतरोः कषायं क्वाथं यः पिबति तस्यापि पूर्वोक्तफलसंपत्तिरिति ॥

कविअच्छुमूलमीसिअजिंगिणितरुखइरसीतलजलेहि ॥
णावणमवबाहुअकंठकंधरारोअणिद्दलणं ॥११०॥

---

१ शुद्धाम्बुयुक्त्या इति पाठः साधीयान् । २ तत्तैलेन सह योऽश्नाति-ख. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कपिकच्छूमूलमिश्रितजिङ्गिणीतरु[1]निर्यासशीतलजलैः ।
नावनमपबाहुककण्ठकन्धरारोगनिर्दलनम्[2] ॥

कपिकच्छ्वा आत्मगुप्ताया मूलं तथा [3]जिङ्गिण्या मोदक्या वृक्षनिर्यासस्तथा शीतोदकमेतैः कृतं नस्यमपबाहुकस्य बाहुमूलस्तम्भादिलक्षणस्य बाहुव्याधेस्तथा गलग्रीवाव्याधीनां विनाशनमिति । नस्यविधिरयमायुर्वेदोक्तः ॥

जिंगिणिखइरुदुंवरदुद्धहिंगुकविअच्छुमूलणासेण ॥
अववाहुअरोओ [4]रोसिओव्व दूरं [5]समोसरइ ॥१११॥

जिङ्गिनीनिर्यासोदुम्बरदुग्धहिङ्गुकपिकच्छूमूलनस्येन ।
[6]अपबाहुकरोगो रोषित इव दूरं समपसरति ॥

जिङ्गिनीनिर्यासेन तथोदुम्बरवृक्षस्य कृमिफलाख्यस्य क्षीरेण तथा रामठेन तथा कपिकच्छ्वा आत्मगुप्ताया मूलेनैतैः कृतेनानेन नस्येन हेतुना पूर्वोक्तोऽवबाहुकरोगो निवर्तते । उपमानं गतार्थमिति ॥

सूलच्छकोलकुंजरमेएहि वसाहि विलणिवासीण ॥
अब्भंगो पीणुत्तुंगमणहरं कुणइ थणजुअलं ॥११२॥

शूलाच्छकोलकुञ्जरमेदोभिर्वसाभिर्विलनिवासिनाम् ।
अभ्यङ्गः पीनोत्तुङ्गमनोहरं करोति स्तनयुगलम् ॥

महिषसूकरकरिणां मेदोभिस्तथा सर्पादानां विलेशयानां पूर्वोक्तयुक्तिगृहीताभिर्वसाभिश्चोद्वर्तनं स्त्रीणां कुचयुगं पीवरोन्नतं सुन्दरं करोतीति । शरीरान्तर्गत आश्यानस्नेहो मेदः, [7]द्रवरूपः स्वेदादियुक्तिग्राह्यः शुद्धमांसस्नेहो वसा ॥

माहिषणवणीअवआगअपिप्पलिकुट्ठतुरअगंधाहि ॥
सवणपओहरलिङ्गाण कुणइ थूलत्तणं लेवो ॥११३॥

माहिषनवनीतवचागजपिप्पलीकुष्ठतुरङ्गगन्धाभिः ।
श्रवणपयोधरलिङ्गानां करोति स्थूलत्वं लेपः ॥

महिषीनवनीतेन सहोग्रगन्धाहस्तिपिप्पलीविषाणाश्वगन्धाभिः पिष्टाभिः कृतो लेपः कर्णपालीकुचनरलिङ्गानां स्थौल्यं जनयतीति ॥

---

१ खपुर-ख., स्वरसेति पुस्तकान्तरे । २ निर्मूलनम्-ख. । ३ सोवक्या तथा निर्यासः-ख. । ४ रुसिओव्व इति, ५ समवसरइ इति च पुस्तकान्तरे । ६ अवबाहुक-ख. । ७ द्रवरूपस्वेदादिषुग्राह्य-ख. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तण्डुलजलेण [1]विवरंजणेण महिलाण णावणं दिण्णं ॥
कुणइ पओहरजुअलं थिरथूलमणोहरुत्तुंगं ॥११४॥

तण्डुलजलेन [2]विवराञ्जनेन महिलानां नावनं दत्तम् ।
करोति पयोधरयुगलं स्थिरस्थूलमनोहरोत्तुङ्गम् ॥

तण्डुलधावनेन सह स्रोतोञ्जनेन स्त्रीणां [3]नस्यं प्रयुक्तं स्तनौ कठिनौ पीवरौ सुस्पर्शवर्णावुन्नतौ च करोतीति ॥

माहिषणवणीअजुअं कुट्ठवआगअवलुब्भअं चुण्णं ॥
लेवेण कुणइ जुवईण पीणघणमणंहरे थणए ॥११५॥

माहिषनवनीतयुतं कुष्ठवचागजवलोद्भवं चूर्णम् ।
लेपेन करोति युवतीनां पीनघनमनोहरौ स्तनौ ॥

महिषीनवनीतेन भावितं वाप्योग्रानवानागवलानां सम्बन्धि चूर्णं स्त्रीणां लेपप्रयुक्तं स्तनावुक्तरूपौ करोतीति ॥

दाडिमवक्कलसाहिअसिद्धत्थअतेल्लतुप्पिआ बहुसो ॥
होन्ति थणा थिरथूला सवणा वि मंसलप्पलंवा ॥११६॥

दाडिमवल्कलसाधितसिद्धार्थकतैलाभ्यक्ता बहुशः ।
भवन्ति स्तनाः स्थिरस्थूलाः श्रवणान्यपि मांसलप्रलंबानि ॥

दाडिमफलस्य रक्तबीजस्य वल्कलेन त्वचा शुद्धाम्बुस्थितया पक्वं यद् गौरसर्षपतैलं तेनाभ्यक्ताः स्तनाः श्रवणानि चोक्तरूपाणि भवन्तीति ॥

गोमहिषीघअसहिअं तेल्लं सामाकअंजलिवआहि ॥
कडुअणिसासंजुत्ताहि साहिअं णावणे दिण्णं ॥
कुणइ वअपरिणआण वि महिलाण तिसत्तरत्तमत्तेण ॥
थणजुअलं पीणुत्तुंगथिरथूलमणहरच्छाअं ॥११७-११८॥

गोमहिषीघृतसहितं तैलं श्यामाकृताञ्जलिवचाभिः ।
कटुकनिशासंयुक्ताभिः साधितं नावने दत्तम् ॥
करोति वयःपरिणतानामपि महिलानां त्रिसप्तरात्रमात्रेण ।
स्तनयुगलं पीनोत्तुङ्गस्थिरस्थूलमनोहरच्छायम् ॥

---

१ बरमंजणेण-ख. । २ परमाञ्जनेन-ख. । ३ नस्योपयुक्तं-ख. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

गव्येन माहिषेण च घृतेन तुल्यमात्रं तैलं प्रियङ्ग्वा तथा कृताञ्जल्यैतत्संज्ञया प्रसिद्धया तथोग्रगन्धया तथा कटुकया रोहिण्या तथा पिण्डहरिद्रया, एताभिस्तुल्यमात्राभिः शुद्धाम्बुस्थितया पकं [1]सन्नस्येनोपयुक्तं [2]स्त्रीणामुक्तरूपौ स्तनौ करोतीति । अत्र पाकयुक्तिः— द्रव्येभ्यः [3]षोडशगुणे जले द्रव्यचतुर्गुणं स्नेहत्रयं क्षिप्त्वा स्नेहशेषं ग्राह्यमिति ॥ युगलकम् ॥

मुंडिअकसाअचुण्णेहि साहिअं पाणणावणविइण्णं ॥
तेल्लं पडिअथणाणं वि कुणइ पीणुण्णए थणए ॥११९॥

मुण्डितकषायचूर्णाभ्यां साधितं पाननावनवितीर्णम् ।
तैलं पतितस्तनानामपि करोति पीनोन्नतौ स्तनौ ॥

[4]श्रमणशीर्षकाथेन [5]तत्सरसकल्केन च सम्पादितं तैलं पाननस्याभ्यां दत्तमुक्तकार्यं करोतीति । अत्र पाकयुक्तिः— [6]कषायद्रव्यपलं षोडशगुणेन जलेन पक्त्वा चतुर्भागशेषे तस्मिन् जले कषायद्रव्यमुद्धृत्य गर्भे स्नेहपलं [7]तत्षड्भागं चूर्णस्य च [8]दत्त्वा स्नेहशेषं ग्राह्यमिति ॥

णिअदसणखुण्णविसिण्णं विडववि सालाइ वाणपुंखाइ ॥
मूलं पिलिहअसमणं विलेविआभोअणरअस्स ॥१२०॥

निजदशनक्षुण्णविशीर्णं [9]विटपविशालाया बाणपुंखायाः ।
मूलं प्लीहकशमनं विलेपिकाभोजनरतस्य ॥

शरपुङ्खाया ओषधेः प्रतानविस्तीर्णाया मूलं स्वदन्तनिर्दलितं कृत्वा ग्रस्तं सद् वामपार्श्वाभ्यन्तरवर्तिकृष्णमांसविकारात्मकस्य प्लीहव्याधेर्निवर्तकम् । कीदृशस्यातुरस्य- घनप्राया पेया विलेपिकेत्युच्यते तदशनरतस्य, भोजनान्तरपरिहारिण इत्यर्थः ॥

घेत्तूण जस्स णामं णिक्खिप्पइ इन्दवारुणीमूलं ॥
पाडेऊण सुदूरे णासइ पिलिहोअरं तस्स ॥१२१॥

गृहीत्वा यस्य नाम निक्षिप्यत इन्द्रवारुणीमूलम् ।
पाटयित्वा सुदूरे नश्यति प्लीहोदरं तस्य ॥

यस्य पुरुषस्य 'देवदत्तस्य प्लीहोदरं विनष्ट' मिति संज्ञामुच्चार्य विशालाया मूलं द्विधा[10] कृत्वा दूरे निक्षिप्यते तस्य प्लीहप्रधान उदरव्याधिर्निवर्तत इति ॥

अन्तरधूमे डहिऊण लोणसहिआइ रूविअदलाइ ॥
खाइआइ मत्थुविमीसिआइ पिलिहोअरहराइ ॥१२२॥

---

१ सन्नस्यप्रयुक्तं-ख. । २ स्त्रीणामुक्तरूपान् स्तनान्-ख. । ३ षोडशगुणं जलं-ख. । ४ श्रवणशीर्ष-ख. । ५ तत्स्वरसकल्केन च-ख. । ६ कषायद्रव्यषोडशगुणेन पक्त्वा-ख. । ७ तत्षड्भागं-ख. । ८ दत्त शेषं ग्राह्यम्-ख. । ९ विशीर्ण-ख. । १० विधातुं-ख. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अन्तर्धूमे दग्ध्वा लवणसहितानि रूपिकदलानि ।
खादितानि मस्तुविमिश्रितानि प्लीहोदरहराणि ॥

अर्कवृक्षपत्राणि सैन्धवेन सह पुटपाकदग्धानि कृत्वा मस्तुना सह मिश्रयित्वा पीतानि पूर्वोक्तकार्यकराणि । अत्र मात्रा— [1]पेयद्रव्ययोः समांशयोः कर्षं मस्तुपलानि त्रीणीति ॥

पिप्पलिचुण्णं णिहुडुंगिदुद्धपरिभाविअं तिसत्ताहं ॥
दिण्णमपहरइ उअरं महुरासणपाणणिरअस्स ॥१२३॥

पिप्पलीचूर्णं [2]सुधादुग्धपरिभावितं त्रिसप्ताहम् ।
दत्तमपहरत्युदरं मधुराशनपाननिरतस्य ॥

मागधिकाचूर्णं सुधाक्षीरेणैकविंशतिरात्रं कृतभावनं सत् प्रयुक्तं क्षीरादिमधुरद्रव्यभोजनपानरतस्योदरव्याधिं विनाशयतीति ॥

इक्केण सिअपुणण्णवापाढाचक्कंकाण मूलाण ॥
उवसमइ झत्ति विद्दही पीएण सह तण्डुलजलेण ॥१२४॥

एकेन सितपुनर्नवापाठाचक्राङ्कामूलानाम् ।
उपशाम्यति झगिति विद्रधिः पीतेन सह तण्डुलजलेन ॥

श्वेतवर्षाभ्वास्तथा पाठायाः… हंग्या (?) स्तथा सुदर्शनायाः सम्बन्धिनां मूलानामेकतमेन मूलेन तण्डुलधावनेन सह पीतेन शीघ्रमेव विद्रधिर्निवर्तत इति ॥

कअलिदलभूइगालिअजलसिद्धविलेइआ विणासेइ ॥
खाइआ उअरजाअसअलरोअजालं तिरत्तेण ॥१२५॥

कदलीदलभूतिगालितजलसिद्धविलेपिका विनाशयति ।
खादितोदरजातसकलरोगजालं त्रिरात्रेण ॥

रम्भापत्राणां पुटपाकदग्धानां भस्मना मिश्रीकृतं सत् पटपूतं यत् पानीयं तेन पक्वाऽवलेह्यप्राया पेया भुक्ता सती दिनत्रयेण सर्वं [3]जठरामयसमूहं[4] क्षपयतीति ॥

कन्दलिआकन्दगुडघआइ सिहिसाहिआइ खाइआइ ।
पाडेन्ति तक्खणं विअ किमिजालअमुअरसंभूअं ॥१२६॥

कन्दलिकाकन्दगुडघृतानि शिखिसाधितानि खादितानि ।
पातयन्ति तत्क्षणमेव कृमिजालकमुदरसंभूतम् ॥

---

१ पेय्यद्रव्ययोः-ख. । २ सुधाक्षीर-ख. । ३ जठरामयं-ख. ४ समूलं-ख. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कन्दली निष्पर्याया, तस्या मूलानां पलं गुडपलानि चत्वारि घृतपलानि चत्वारि पानीयपलानि षोडश। एतत् सर्वमग्निना पक्वं लेहीकृत्य मात्रया खादितमुदरजान् सर्वक्रमीन् पातयतीति॥

जो लिहइ रअणिविरमे[1] णिंवदलामलअचुण्णमणुदिअहं ॥
सो गाढकुट्ठविअडिअदेहो वि पुणो णओ होइ ॥१२७॥

यो लेढि रजनीविरामे[2] निम्बदलामलकचूर्णमनुदिवसम् ।
स गाढकुष्ठविघटितदेहोऽपि पुनर्नवो भवति ॥

यः क्षपाक्षये पिचुमन्दपत्त्राण्यामलकानि च चूर्णीकृत्य मध्वादिना योजितानि प्रतिदिनमभ्यासेनावलेह्यत्वेनोपयुङ्क्ते स तीव्रत्वग्दोषविनाशितशरीरोऽपि निर्वृत्तनिर्मूलव्याधित्वाद्भूयो जात इव निर्विकारः सम्पद्यत इति ॥१२६॥

सेन्धअविडंगसिवासोमराइसरिसवकरंजरअणीहि ॥
सुरहिसलिलेण लेवो कुट्ठहरो दिअहणाहो व्व ॥१२८॥

सैन्धवविडंगशिवासोमराजीसर्षपकरञ्जरजनीभिः ।
सुरभिसलिलेन लेपः कुष्ठहरो दिवसनाथ इव ॥

सैन्धवलवणेन तथा कृमिघ्नेन तथा सोमराज्या चन्द्रलेखया तथा सिद्धार्थकैस्तथा करञ्जस्य नक्तमालस्य फलैस्तथा पिण्डहरिद्रया चैतैः समांशैश्चूर्णीकृतैर्गोमूत्रमिश्रितैः कृतो लेपः कुष्ठव्याधिं विनाशयति [3]यथा भगवान् भास्कर इति ॥

एक्को तिलाण भाओ दो भाओ सोमराइवीआण ॥
खज्जन्ता णेन्ति खअं चरणदद्दु सुदुव्वारं ॥१२९॥

एकस्तिलानां भागो द्वौ भागौ सोमराजिबीजानाम् ।
खाद्यमाना नयन्ति क्षयं चरणदद्रुं सुदुर्वारम् ॥

सोमराज्याश्चन्द्रलेखायाः सम्बन्धिनां बीजानां द्वौ भागौ तृतीयस्तिलानामिति मात्रया भुज्यमानं चूर्णं पादत्वग्रोगविशेषं दद्र्वाख्यं घोरमपि क्षपयतीति ॥११८॥

अइअंविलतक्कसमं सुरहिजलं लोणमीसिअं कढिअं ॥
वणगोमअखंडघट्ठाइ लेवेण हरइ खसराइ ॥१३०॥

अत्यम्लतक्रसमं सुरभिजलं लवणमिश्रितं क्वथितम् ।
वनगोमयखण्डघृष्टानि लेपेन हरति खसराणि ॥

---

१ विरमे इति, २ विगमे इति च पाठान्तरम् । ३ तथा–ख. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अतिचुक्रेण गोरसेन तुल्यमात्रं गोमूत्रं सैन्धवेन संयुक्तं सत् पक्वं खसराणि त्वग्विकारविशेषमरण्यशुष्कगोमयशकलघृष्टानि सन्ति लेपेन विनाशयतीति ॥१३०॥

[1]ववगअतुसगुञ्जाफलचुण्णमीसणवणीअविलेविअं [2]विहिणा ॥
णासइ सतक्कतम्बअकिट्टेन व लेविअं कुट्ठं ॥१३१॥

[1]व्यपगततुषगुञ्जाफलचूर्णमिश्रनवनीतविलेपितं [2]विधिना ।
नश्यति [3]सतक्रताम्रकिट्टेन वा लेपितं कुष्ठम् ॥

अपगतत्वचां रक्तिकाफलानां चूर्णेन योजितं यद् गव्यं नवनीतं तेन कृतलेपः कुष्ठव्याधिर्निवर्त्तते । अथवा गोरससंयुक्तेन ताम्रमलेन कृतलेपो विनश्यतीति ॥१३१॥

दुव्वासेन्धवहरिआलरअणि गोमुत्तमेलिअं सहसा ॥
दद्दुं खसरं अ तहा णासेइ चिरकालजाअं पि ॥१३२॥

दूर्वासैन्धवहरितालरजनि गोमूत्रमेलितं सहसा ।
दद्रुं खसरञ्च तथा नाशयति चिरकालजातमपि ॥

शाद्वलं सैन्धवलवणं हरितालं पिण्डहरिद्रा चैतत् समांशं चूर्णीकृतं गोमूत्रेण मिश्रितं सल्लेपेनोपयुक्तं बहुकालोत्पन्नावपि दद्रूखसराख्यौ त्वग्विकारौ झगिति शमयतीति ॥१३२॥

ससिरेहाचुण्णमीसजाविअदुद्धोब्भवं सुणवणीअं ॥
सिअकुट्ठहरं महुणा लीढं तक्काणुपाणेण ॥१३३॥

शशिरेखाचूर्णमिश्र[4]यापितदुग्धोद्भवं सुनवनीतम् ।
सितकुष्ठहरं मधुना लीढं तक्रानुपानेन ॥

शशिलेखायाः सोमराज्याश्चूर्णेन भाण्डमुपलिप्य तत्र दधिभावमापादितं यद् गव्यं क्षीरं तन्मथनोत्पादितं शोभनं यन्नवनीतं तद् माक्षिकेण सहावलीढं सत्[5] तद्गोरसानुपानेन सितकुष्ठं श्वित्रं नाशयतीति ॥१३३॥

जलवट्टिअसेअप्फन्दमूलपंकेण लित्तमणुदिअहं ॥
पक्खेण व मासेण व सिअकुट्ठं वज्जइ विणासम् ॥१३४॥

जलवर्तितश्वेतस्पन्दामूलपंकेन लिप्तमनुदिवसम् ।
पक्षेण वा मासेन वा सितकुष्ठं व्रजति विनाशम् ॥

---

१ वितुषगुञ्जाफलेत्यादि भाव्यम् छन्दोनुरोधात् । २ किं वा विधिनेत्येतत् पदं न देयम् तस्य व्याख्यायामनुल्लेखात् । ३ सतक्रताम्रशकृतेन-ख. । ४ जनित-ख. । ५ तद्गोरसानुपलेपनेन-ख. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

श्वेतगिरिवर्णिकाया मूलं पानीयेन पिष्ट्वा पङ्कीकृतं लेपेनोपयुज्यमानमभ्यासात् पञ्चान्मासाद् वा सितकुष्ठं नाशयतीति ॥१३४॥

माअंगकत्तिचित्तअचम्ममसीतेल्लपङ्कलेवेण ॥
सिअकुट्ठदूसिआइ वि होन्ति सवण्णाइ अंगाइ ॥१३५

मातङ्गकृत्तिचित्रकचर्ममसीतैलपङ्कलेपेन ।
सितकुष्ठदूषितान्यपि भवन्ति स्ववर्णान्यङ्गानि ॥

हस्तिद्वीपिनोश्चर्मणी पुटपाकदग्धे कृत्वा तिलतैलमिश्रितेन तत्कज्जलकर्दमेन यो लेपस्तेन श्वित्र-कलङ्कितान्यपि गात्राणि स्ववर्णमचिरेणासादयन्ति, निवृत्तश्वित्राणि भवन्तीत्यर्थः, एतयोरेकैकमपि कार्यकरमिति ॥१३५॥

सिन्दूरपुररसंजणतुत्थालसचुण्णमीसिअं कहिअं ॥
कडुतेल्लं चिरआलोब्भवं पि पामं विणासेइ ॥१३६॥

सिन्दूरपुररसाञ्जनतुत्थालसचूर्णमिश्रितं कथितम् ।
कटुतैलं चिरकालोद्भवामपि पामां विनाशयति ॥

[1]सिन्दूरं पीनपिष्टं(?) तथा गुग्गुलुस्तथा कृत्रिमाञ्जनं तथा तुत्थकं मयूरग्रीवकार्परयोरन्यतरं तथालसं सिक्थकमेतेषां समांशानां चूर्णेन शुद्धाम्बुस्थितया पक्वं सर्षपतैलं लेपात् प्ररूढामपि पामाख्यां त्वग्विकृतिं विनाशयति । अथवा कटुतैलं सुतप्तं कृत्वा तन्मध्ये द्रव्याणि मिश्रीकृतानि लेपेनोपयुज्यन्त इत्यर्थः ॥

पामालक्षणम्—

विस्फोटपिटका पामा कण्डूक्लेदरुजाधिका ।
सूक्ष्मा श्यावारुणा बह्व्यः [2]प्रायः स्फिक्पाणिकूर्परे ॥इति॥१३६॥

माहिसणवणीओम्मीसमिरिअसिन्दूरलेविआ बहुसो ॥
णासइ पामा खलकुट्टिणीव्व विडविअंविआ दूरं ॥१३७॥

माहिषनवनीतोन्मिश्रमरिच[3]सिन्दूरालेपिता बहुशः ।
नश्यति पामा खलकुट्टनीव विटविडम्बिता दूरम् ॥

सिन्दूरमरिचयोः समांशं चूर्णं माहिषेण नवनीतेन मिश्रितं यत् तेन बहुवारं कृतलेपा पामाऽत्यर्थं विनश्यति धूर्त्तवञ्चिता कुट्टनीवेति ॥१३७॥

१ सिन्दूरपीनपिष्टं–ख. । २ पामा–ख. । ३ सिन्दूरालेपितं–ख. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

खम्भारितरुफलाइ परिणअसुक्खाइ दुद्धसिण्णाइ ॥
खइआइ पीअपित्तं हरन्ति पच्छासिणो विहिणा ॥१३८॥

खम्भारीतरुफलानि परिणतशुष्काणि दुग्धस्विन्नानि ।
खादितानि पीतपित्तं हरन्ति पथ्याशिनो विधिना ॥१३८॥

खम्भार्याः श्रीपर्ण्याः काश्मर्याः फलानि परिपक्वानि ततः शोषितानि दुग्धेन सह स्विन्नानि सन्ति भुक्तानि पीतं पित्तं पीतवर्णं पित्तं यद् दृश्यते [1]तच्छमयन्ति क्षीरादिपथ्याशिनः। विधिरत्र काथ्यद्रव्यपलं पानीयपलैरष्टभिः क्षीरपलान्यष्टौ सह क्वाथयित्वा चतुर्भागशेषं ग्राह्यम्। तत्कथितानि फलानि भुक्त्वा तेन क्षीरेणानुपानं कर्तव्यमिति ॥१३८॥

कइरोअफलिंणिचन्दणमूलअवीआहिकुट्ठसमभाअं ॥
उव्वट्टणं सिह्माइ हरइ होइ सुअन्धअन्धं अ ॥१३६॥

कपिरोगफलिनीचन्दनमूलकवीजाहिकुष्ठसमभागम् ।
उद्वर्तनं सिध्मानि हरति [2]भवति सुगन्धगन्धं च ॥

कपिकच्छूस्तथा प्रियङ्गुस्तथा चन्दनं तथा मूलकबीजानि तथा नागकेसरं तथा कुष्ठमेतानि समांशानि पानीयेन लेपीकृतानि उद्वर्तनप्रयोगेण सिध्माख्यं त्वग्विकारं शमयन्ति, अतिसुभगं च सौरभं भवतीति ॥१३६॥

पलहीदलमूलअवीअमीसजंघाजडाकओ लेओ ॥
महिएण मंगलदिणम्मि दुब्भितसमूहविद्दवणं ॥१४०॥

कार्पासीदलमूलकबीजमिश्र[3]जङ्घाजटाकृतो लेपः ।
मथितेन मङ्गलदिने दुर्भितसमूहविद्रावणम् ॥

पलहीदलं कर्पासलतापत्रं तथा मूलकबीजं ताभ्यां सहितेन काकजङ्घामूलेन तक्रेण संपादितो लेपो भौमवारे प्रयुक्तः सिध्ममिति प्रसिद्धं दुर्भिताख्यं त्वग्विकारं नाशयतीति ॥१४०॥

[4]मोरअरसपिट्ठेहि विलेविअं मूलअस्स वीएहि ॥
णासइ [5]सिह्मं रंहाखारुम्मीसाइ व णिसाइ ॥१४१॥

मयूरकरसपिष्टै[6]र्विलेपितं मूलकस्य बीजैः ।
[7]नश्यति सिध्मं, रम्भाक्षारोन्मिश्रयेव निशया ॥

१ तच्छमयन्ति पथ्याशिनः-ख. । २ पदमेतन्न दृश्यये ख. पुस्तके. । ३ वायसजङ्घा-ख. । ४ मोरन्दर-रस-ख. । ५ सिह्मारंहो-ख । ६ लेंपितं-ख. । ७ नाशयति-ख. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अपामार्गं पिष्ट्वा तद्रसेन वर्तितानि यानि मूलकबीजानि तैः कृतो लेपः सिध्मं नाशयति, यथा कदलीदलानां पुटपाकदग्धानां भस्मना सह भावितया पिण्डहरिद्रया पानीयेन लेपीकृतया नश्यति तथैवेति द्वितीयः प्रयोग इति ॥१४१॥

मोरअकअलीक्खारं सतेल्लमेक्केक्कअं समुद्धसइ ॥
कुह्मंडणालखारं व गोजलुम्मोसिअं सिह्मं ॥१४२॥

मयूरकदलीक्षारं सतैलमेकैकं समुद्धंसयति ।
[1]कुष्माण्डनालक्षारं वा गोजलोन्मिश्रितं सिध्मम् ॥

अपामार्गस्यान्तर्धूमदग्धस्य भस्मनाऽथवा रम्भायाः पूर्ववद् गृहीतेन भस्मना, द्वयोरेकतरस्य तैलमिश्रितस्य लेपः सिध्मं नाशयति । अथवा कुष्मांडकं पुष्पफलं तस्य वृन्तं पूर्ववत् कृत्वा तत्क्षारेण गोमूत्रसहितेन लेपनं सिध्मं नाशयतीति तृतीयः प्रयोग इति ॥१४१॥

जलपिट्ठमहिसच्छाणवेढिआ मउअजलणसंसिद्धा ॥
अंगाइ कुणइ रअणी णित्ताविअकणअगोराइ ॥१४३॥

जलपिष्टा महिष[2]शाणवेष्टिता मृदुकज्वलनसंसिद्धा ।
अंगानि करोति रजनी [3]निस्तापितकनकगौराणि ॥

पिण्डहरिद्रा चूर्णीकृता पानीयेन गुलिकात्वमापादिता ततो दर्भेण वेष्टिता ततो माहिषपुरीषेण पृष्ठतोऽवगुण्ठिता मृद्वग्नौ पक्वा ततो निष्कृष्य लेपेनोपयुक्ता गात्राणि धाम(ध्मान?)निष्क्रान्तहेमोज्ज्वलानि करोतीति ॥१४३॥

जो मज्जइ तिलसरिसवरअणिणिसाकुठ्ठलेविअसरीरो ॥
सो होइ सुरहिदेहो मणहरवण्णुज्जलावअवो ॥१४४॥

यो मज्जति तिलसर्षपरजनीनिशाकुष्ठलेपितशरीरः ।
स भवति सुरभिदेहो मनोहरवर्णोज्ज्वलावयवः ॥

रजनी पिण्डहरिद्रा निशा दारुहरिद्रा शिष्टं गतार्थमिति ॥१४४॥

जंवूदलकउहपसूअसवरसमभाअमेलिअं कुणह ॥
उव्वट्टणअं गिह्मे सरीरदुग्गन्धविद्दवणं ॥१४५॥

जंबूदलककुभप्रसूनशवरसमभागमेलितं कुरुत ।
[4]उद्वर्तनकं ग्रीष्मे शरीरदुर्गन्धविद्रावणम् ॥

---

१ कुष्माण्डक-ख. । २ च्छाण-ख. । ३ तापित-ख. । ४ उद्वर्तनं-ख. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

जम्बूदलानि सुरभिपत्रापल्लवानि तथार्जुनकुसुमानि तथा लोध्रमेतैः समांशैर्मिश्रीकृतैरुद्वर्तनं निदाघे घर्मादिजनितदेहदुरामोदशमनं कुरुतेति ॥१४५॥

लामज्जअहेमसिरीससवरचुण्णेण मलिअदेहस्स ॥
तअदोषसेअपसरा गिम्हे वि ण होन्ति लोअस्स ॥१४६॥

लामज्जकहेमशिरीषसवरचूर्णेन मलितदेहस्य ।
त्वग्दोषस्वेदप्रसरा ग्रीष्मेपि नभवन्ति लोकस्य ॥

लामज्जकस्योशीरस्य तथा हेम्नः पद्मकस्य शिरीषस्य कीरतरोस्तथा लोध्रस्य चूर्णेनोद्वर्तितशरीरस्य घर्मकालेपि त्वग्दोषस्वेदयोर्विकारा नप्रसरन्तीति ॥१४६॥

दलजलरणमलआरुणविलेवणं हरइ देहदुग्गन्धं ॥
विमलारणालसहिअं पीअंव अलंवुसाचुण्णं ॥१४७॥

दलजलरणमलयारुणविलेपनं हरति देहदौर्गन्ध्यम् ।
विमलारनालसहितं पीतं वालंवुषाचूर्णम् ॥

दलं सुगन्धपत्रं जलं बालकं रणमुशीरं मलयं चन्दनमरुणं कुङ्कममेतैः कृतं विलेपनं शरीरदुरामोदं हरति । अथवा श्रमणशीर्षस्य चूर्णं [1]निर्मलकाञ्जिकपीतमुक्तकार्यं करोतीति ॥१४७॥

एक्को किरिमालअणिंबलोद्धदाडिमसिरीसछल्लीहि ॥
जलहरसामारअणीहि मणोहरो सलिलपिट्ठाहि ॥ ॥
अण्णो णिम्बदलसिवादाडिममाअन्दवक्कलरसेहि ॥
महिलाण अंगराओ णराण जंघाकसाओ अ ॥१४८–१४६॥

एकाः किरिमालकनिम्बलोध्रदाडिमशिरीषत्वग्भिः ।
जलधरश्यामारजनीभिर्मनोहरः सलिलपिष्टाभिः ॥
अन्यो निम्बदलशिवा[2]दाडिममाकन्दवल्कलरसैः ।
महिलानामङ्गरागो नराणां जङ्घाकषायश्च ॥

किरिमालस्यारग्वधस्य तथा पिचुमन्दस्य तथा सवरस्य तथा दाडिमफलस्य तथा कीरतरोस्त्वग्भिर्वल्कलैस्तथा मुस्तप्रियंगुपिण्डहरिद्राभिरेतैः सर्वैः समांशैर्जलपिष्टैः कृतो रम्यो महिलानामङ्गरागो गात्रशोभाजनकमुद्वर्तनकं भवत्येष एक आद्यः । अन्योऽपरः पिचुमन्दपत्रैस्तथा हरीतकीदाडिमफलाम्राणां [3]वल्कलै रसेन च कृतः कषायः सर्वसमुदायः पुरुषाणां जङ्घावर्णप्रकर्षद इति पूर्वापरगाथापठितौ [4]स्त्रीपुरुषयोर्द्वौ प्रयोगाविति ॥युगलकम्॥१४८–१४६॥

१ निर्मित-ख. । २ दाडिमाम्र-ख. । ३ वक्कलरसेन इत्यपिपाठः । ४ स्त्रीपुरुषविषयावित्यत्र ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

वासअरसोल्ललट्ठिमहुसक्करामहुविमीसिअं पीअं ॥
अवहरइ रत्तपित्तं सकामलं पांडुरोअं च ॥१५०॥

वासारसार्द्रयष्टिमधुशर्करामधुविमिश्रितं पीतम् ।
अपहरति रक्तपित्तं सकामलं पाण्डुरोगं च ॥

वासाया आटरूषस्य रसेन निस्यन्देनार्द्रा यासौ मधुयष्टी तथा सितशर्करा तथा माक्षिकमेतद्विमिश्रीकृतं सत् पीतं रक्तपित्तं कामलां पाण्डुरोगं च शमयति । पानद्रव्यं वासानिस्यन्द एव । तस्य पलत्रयेण मधुयष्टीशर्करयोः कर्षौ माक्षिककर्षश्च पेय इत्युपयोगः । सर्वत्र स्वरसाभावे तत्सम्पादनयुक्तिरियम्— द्रव्यसमं पानीयं पर्युषितं कृत्वा परेद्युस्तद्द्रव्यमुद्धृत्यान्यन्नवं द्रव्यं तस्मिन्नेव जले तन्मात्रमेव पर्युषितं कार्यमिति सप्तरात्रपर्युषितं तज्जलं स्वरससमानगुणमिति ॥१५०॥

वासअपल्लवसरसं कुसुमरसुम्मीसिअं पिअन्तस्स ॥
उपसमइ रत्तपित्तं सलिलेण हुआसपुंजोव्व ॥१५१॥

वासापल्लवस्वरसं कुसुमरसोन्मिश्रितं पिबतः ।
उपशाम्यति रक्तपित्तं सलिलेन हुताशपुञ्ज इव ॥

आटरूषकस्य पत्राणां स्वरसं चतुष्पलमात्रं माक्षिककर्षमात्रेण सह पिबतो रक्तपित्तं क्षणात् शाम्यति । आशुकार्यकारित्वप्रतिपादनार्थमुपमानमिति ॥१५१॥

अहिणवपीणसदुहिओ समरिअगुडदहिअपाणमत्तेण ॥
पणप्पइ गोहूमवल्लकिसरघअभोअणेणव्व ॥१५२॥

अभिनवपीनसदुःखितः समरिचगुडदधिपानमात्रेण ।
स्वस्थीभवति गोधूमवल्लकृशरघृतभोजनेन वा ॥

तत्कालोत्पन्नेन प्रतिश्यायेन कदर्थितो दध्नो गुडमरिचसंयुक्तस्य पानमात्रात् पुरुषो निरामयीभवति । अथवा निष्तुषीकृतेन गोधूमेन तथा निष्पावाख्येन शिम्बिधान्यविशेषेण सिद्धं गव्यघृतसंयुक्तं कृशरमश्नतः पूर्वोक्तकार्यसम्पत्तिरिति । घृतक्षीरनवनीतदधिमथितादीनामविशेषोक्तौ [1]गव्यमेव सर्वत्र बोध्यमिति ॥१५२॥

जो पिअइ सअणकाले सअणारूढो सुसीअलत्थोअं ॥
सलिलं पीणसदुहिओ पणप्पइ सो तिरत्तेण ॥१५३॥

---

१ गव्यत्वमेव सर्वत्र शोद्धव्यमिति–ख. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

यः पिबति शयनकाले शयनारूढः सुशीतलमस्तोकम् ।
सलिलं पीनसदुःखितः स्वस्थीभवति स त्रिरात्रेण ॥

इति स्पष्टार्था गाथा॥१५३॥

कलितरुफलसिन्धुकणाचुण्णं तक्केण लीढमवहरइ ॥
सरभेअं तम्मादुद्धेण पीअमामलअचुण्णं व ॥१५४॥

कलितरुफलसैन्धवकणाचूर्णं [1]तक्रेण लीढमपहरति ।
स्वरभेदं ताम्रादुग्धेन पीतमामलकचूर्णं वा ॥

विभीतकफलं तथा सैन्धवलवणं तथा पिप्पलीचूर्णं समांशमेकीकृत्य तक्रेणावलीढं सत् कण्ठवैस्वर्यं नाशयति । अथवा गोक्षीरेण पीतं धात्रीफलचूर्णमिति ॥१५४॥

समतुलिअपुरोम्मीसिअजणणीवसकोलपल्लअसिहाहि ॥
विउणाहिवलामूलो धूओ कासं समुद्धसइ ॥१५५॥

समतुलितपुरोन्मिश्रितजननीवृषकोलपल्लवशिफाभिः[2] ।
[3]द्विगुणाहिबलामूलो धूपः कासं समुद्ध्वंसयति ॥

जनन्याः सुमनसो वृषस्य वासायास्तथा[4]कोलम्याम्बुवदरस्य पत्रमूलाभ्यामित्येतैः समांशैरेतेषां सर्वेषां तुल्येन गुग्गुलुना कृतो धूपः । कीदृशः— एतेषां पुरवर्जं सर्वेषां द्विगुणपरिमाणं नागबलामूलं यस्मिन् स तथाविधः कासव्याधिं शमयति । अस्य धूमपानेन प्रयोग इति तस्यविधिः— जानुसमे सुखासने स्थित्वा शरावसंपुटान्तरस्थमृद्वग्निविनिक्षिप्तैश्चूर्णैः स्तोकादुत्थितं धूममूर्ध्वशरावमध्यकृत[5]कमलकाण्डपरिमाणच्छिद्रमार्गयोजितदशाङ्गुल[6]प्रमाणदीर्घ[7]नडनलिकादिना निराकुलं कृत्वा वक्षःप्रदेशपर्यन्तं फूत्कारैः प्रपीय तथैव तत्कालमेव मुखेनोद्वमेत्, ततो[8]निष्ठीवनस्यान्ते पुनरेव पिबेद् यावद्वारत्रयम् । ततः श्लेष्मशान्तौ सत्यामनुपानं गुडदुग्धमिति ॥१५५॥

पुरजाइजटाकिसलअमोरअफलकोलपल्लवशिलाहि ॥
वत्ती सरीरधूवा हरइ वअरग्गिणा कासं ॥१५६॥

पुरजातिजटाकिसलयमयूरकफलकोलपल्लवशिलाभिः ।
वर्त्तिः [9]शरीरधूपाद् हरति वदराग्निना कासम् ॥

गुग्गुलुना तथा सुमनोमूलपल्लवाभ्यां तथाऽपामार्गफलेन तथा वदरपत्रैस्तथा मनःशिलया, एवैः समांशैर्जलवर्तितैः कृता वर्त्तिर्वदरकाष्ठाग्निदग्धा[10] धूमेन देहाधिवासनादेव कासमपहरतीति ॥१५६॥

---

१ चुक्रेण–ख. । २ शिखाभिः–ख. । ३ द्विगुणो बलामूलो–ख. । ४ कोलस्याम्लवदरस्य–ख. । ५ मलकाण्ड–ख. । ६ प्रमाणदीर्घेण–ख. । ७ तललकादिना–ख. । ८ निष्ठीवनशान्तौ–ख. । ९ शरीरधूपो–ख. । १० दग्धधूमेन–ख. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

भोअणसमए महुणा पिप्पलितिहलाण चुण्णमवलीढं ॥
सिम्भुब्भवजडपीणससोसमहासासविद्दवणं ॥१५७॥

भोजनसमये मधुना पिप्पलीत्रिफलायाश्चूर्णमवलीढम् ।
श्लेष्मोद्भवजडपीनसशोषमहाश्वासविद्रावणम् ॥

मागधिकावरयोर्द्रव्यचतुष्टयस्य समांशस्य चूर्णं माक्षिकेण सहाग्रभोजनेऽ[1]वलेहेनोपयुक्तं कफोत्थजाड्यं तथा प्रतिश्यायं तथा शोषं तथात्युल्बणं श्वासमपसारयतीति ॥१५७॥

पवलं पि हरइ हिक्कं सासमइप्पवट्टं णिवारेइ ॥
सिहिपिञ्छभूइपिप्पलिचुण्णं महुमीसिअं लीढं ॥१५८॥

प्रबलामपि हरति हिक्कां श्वासमतिप्रवृत्तं निवारयति ।
शिखिपिच्छभूतिपिप्पलीचूर्णं मधुमिश्रितं लीढम् ॥

पुटपाकदग्धानां मयूरपिच्छानां भस्मना सह मागधिकानां चूर्णं माक्षिकसंयुक्तमवलेहेनोपयुक्तं बलवतीमपि हिक्कां श्वासं च प्रवृद्धं निवारयतीति ॥१५८॥

करिसं कलिफलचुण्णस्स लीढमच्चंतमीसिअं महुणा ॥
गुरुसासवाहिविहडणमुद्धंसिहरं च जिमिअम्मि ॥१५९॥

कर्षं कलिफलचूर्णस्य लीढमत्यन्तमिश्रितं मधुना ।
गुरुश्वासव्याधिविघटनमुद्ध्वंसिहरं च जेमिते ॥

विभीतकचूर्णस्य त्रिडालपदकं बहुमाक्षिकसंयुक्तं भुक्तोत्तरमवलेहोपयुक्तं प्रवृद्धश्वासकासहर-मिति ॥१५९॥

घअकुसुमसारलीढं खअं खअं णेइ गअबलामूलं ॥
पसुदुद्धेण व पीओ कुरङ्गपसुपलरओ विहिणा ॥१६०॥

घृतकुसुमसारलीढं क्षयं क्षयं नयति गजबलामूलम् ।
पशुदुग्धेन वा पीतं कुरङ्गपशुपलरजो विधिना ॥

गव्यसर्पिषा माक्षिकेण च सह नागबलाचूर्णमवलेहेनोपयुक्तं क्षयव्याधिं राजयक्ष्माणं क्षपयति । अथवा छागक्षीरेण पीतं कुरङ्गस्य मृगस्य तथा छागस्य पलरजः शुष्कमांसचूर्णमुक्तकार्यं करोतीति ॥१६०॥

घअसहिअं कइकव्वं णीलीमूलं व दुद्धसंजुत्तं ॥
विहडेइ राअमन्दं दन्तिसमूहं मइन्दो व्व ॥१६१॥

१ अवलेहत्वेनोपयुक्तम्, अथवाऽवलेहनोपयुक्तमिति ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

घृतसहितं कपिक्रव्यं नीलीमूलं वा दुग्धसंयुक्तम् ।
विघटयति राजमन्दं दन्तिसमूहं मृगेन्द्र इव ॥

गव्यसर्पिषा सह मर्कटमांसमथवा नीलीमूलं गव्यक्षीरसहितमुपयुक्तं नृपव्याधिं राजयक्ष्माणं नाशयति । शक्ततरत्वप्रतिपादनार्थमुपमानमिति ॥१६१॥

चुण्णं महुसंजोइअहअगन्धाकन्दगोक्खुरफलाणं ॥
सोसओसिअबलाणं दुद्धेण पीअं बलं कुणइ ॥१६२॥

चूर्णं [1]मधुसंयुक्तं हयगन्धाकन्दगोक्षुरफलयोः ।
शोषसमपसृतबलानां [2]दुग्धेन पीतं बलं कुरुते ॥

अश्वगन्धामूलश्वदंष्ट्राफलयोः समांशयोश्चूर्णं माक्षिकसहितं छागक्षीरेण क्वथितशीतेन सह पीतं क्षयेणापगतसामर्थ्यानां बलाधानं करोतीति ॥१६२॥

विण्हुक्कन्ता सोसं खवेइ सेलंजणेण संजुत्ता ॥
दुद्धेण केवलव्विअ वाअसजंघा व पिज्जन्ती ॥१६३॥

विष्णुक्रान्ता शोषं क्षपयति शैलाञ्जनेन संयुक्ता ।
दुग्धेन [3]केवलैव वायसजंघा वा पीयमाना ॥

विष्णुक्रान्ता नीलपुष्पी सौवीराञ्जनेन[4]सहिता क्षीरेण पीता शोषं नाशयति, अथवा [5]काकजङ्घैव क्षीरेण सह पीतेति ॥१६३॥

हअगंधादुद्धलिआचुण्णं दुद्धेण पिअइ जो मासं ॥
दुद्धाहारो सो दुव्वलो वि पीणत्तणं लहइ ॥१६४॥

हयगन्धादुग्धलिकाचूर्णं दुग्धेन पिबति यो मासम् ।
दुग्धाहारः स दुर्बलो पि पीनत्वं लभते ॥

अश्वगन्धार्कपुष्पिकयोश्चूर्णं गव्यक्षीरेण प्रत्यहं मासं यः पिबति स क्षीणबलोपि बललाभात् पीबरत्वं प्राप्नोतीति ॥१६४॥

जवतिलतुरंगगन्धाणाअवलामासगुडणिसेवेण ॥
होइ बलं णवजोव्वणवणवारणवारणसमत्थं ॥१६५॥

यवतिलतुरङ्गगन्धानागबलामाषगुडनिषेविणाम् ।
भवति बलं नवयौवनवनवारणवारणसमर्थम् ॥

---

१ मधुसंयोजितं-ख. । २ दुग्धपीतं-ख. । ३ केवलेन-ख. । ४ सह-ख. । ५ काकजङ्घा च-ख. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अस्रुततिलाश्वगन्धागांगेरुकीमाषान् समांशाँश्चूर्णीकृत्य गुडेन द्विगुणांशेन सह ये [1]समुपयुञ्जते ते तरुणारण्यकुञ्जरप्रतिषेधक्षमं [2]सामर्थ्यं प्राप्नुवन्तीत्यतिशयोक्तिरिति ॥१६५॥

तिहला सलोहचुण्णा महुणा परिणामसूलमपहरइ ॥
कढिअजलमिलिअगिलिअं व मसहसंवूअअक्खारं ॥१६६॥

त्रिफला [3]सलोहचूर्णा मधुना परिणामशूलमपहरति ।
कथितजलमिलितमागीर्णं वा सूक्ष्मशंबुकक्षारम्[4] ॥

हरीतकीविभीतकामलकानि त्रीणि यावत्प्रमाणानि तावत्प्रमाणेनैव शस्त्रचूर्णेन सहितानि माक्षिकेण सहोपयुक्तानि अन्नपरिणामकालजं हृच्छूलमपहरन्ति । अथवा [5]श्रृततोयेन मिलितं सत् पीतं सूक्ष्माणां मन्धलादिप्रदेशजानां पुटपाकदग्धानां शङ्खानां भस्मोक्तकार्यं करोतीति ॥१६६॥

दड्ढमणिग्गअधूअं मअसिङ्गं गोघएण सह पीअं ॥
हिअअणिरिप्पासूलं हरइ सिही दारुणिवहंव्व ॥१६७॥

दग्धमनिर्गतधूमं मृगश्रृङ्गं गोघृतेन सह पीतम् ।
हृदयपृष्ठशूलं हरति शिखी दारुनिवहमिव ॥

हरिणविषाणमन्तर्धूमदग्धं गोघृतेन सह पीतं हृत्पृष्ठशूलमपहरति । उपमानमाशुकार्यकरत्वप्रतिपादनार्थमिति ॥१६७॥

सोवच्चलहिंगुमहोसहेहि पीएहि कढिअजलेण ॥
दोग्गच्चेण सुहाइं व्व णासन्ति समत्थसूलाइं ॥१६८॥

सौवर्चलहिङ्गुमहौषधैः पीतैः क्वथितजलेन ।
दौर्गत्येन सुखानीव नश्यन्ति समस्तशूलानि ॥

रुचकरामठनागरैः श्रृतपानीयपीतैः सर्वशूलानि निवर्तन्ते । व्यक्तार्थमुपमानमिति ॥१६८॥

णासइ फुडमइसारो वरजलपिट्ठेहि तक्कपीएहि ॥
वडपाअपप्परोहंकुरेहि कुलमविणएण व्व ॥१६९॥

नश्यति स्फुटमतीसारो वरजलपिष्टैस्तक्रपीतैः ।
वटपादपप्ररोहांकुरैः [6]कुलमविनयेनेव ॥

वटपादपस्य न्यग्रोधवृक्षस्योर्ध्व[7]प्रवृत्तशाखोद्गतैर्मूलाङ्कुरैस्तण्डुलोदकसम्बलितैः पश्चाद् गोरसेन पीतैर्निश्चितमतिप्रवृत्तिर्नश्यति । सुबोधार्थमुपमानमिति ॥१६९॥

---

१ समुपयुज्यते-ख. । २ सामर्थ्यमाप्नुवन्तीति-ख. । ३ सलोहचूर्णे-ख. । ४...चारेण-ख. । ५ सिततोयेन-ख. । ६ कुलमविनयं व-ख. । ७ प्रवृत्तस्य...चोद्गतैः—ख. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

जलमसिणपिट्ठकोमलव[1]च्चूलदलेहि पीअमत्तेहि ॥
सआ पसरिओ वि थगइ अइसारो मुट्ठिगहिओव्व ॥१७०॥

जलमसृणपिष्टकोमल[2]बब्बूलदलैः पीतमात्रैः ।
सदाप्रवृत्तोपि स्थगत्यतिसारो मुष्टिगृहीतइव ॥

जलेन सुसूक्ष्मपिष्टानि यानि [3]बब्बूलस्य [4]किङ्किरातस्य पेलवानि पत्राणि तैः पीतमात्रै र्नित्य-प्रवृत्तोप्यतिसारो निरुध्यते यथा मुष्ट्यावष्टब्धः केनचिद् बलवता कश्चिन्निरुध्यत इति ॥१७०॥

महुसक्करासणाहं तण्डुलधुअणेण पीअमणुदिअहं ॥
हरइ रुहिआइसारं घणरवमूलं तिरत्तेण ॥१७१॥

मधुशर्करासनाथं तण्डुलधावनेन पीतमनुदिवसम् ।
हरति रुधिरातिसारं घनरवमूलं त्रिरात्रेण ॥

माक्षिकसितशर्कराभ्यां युक्तं घनरवस्य लोहितसालीसस्य मूलं ज्येष्ठोदकेन पिष्टं रक्तातिप्रवृत्तिं त्रिरात्राभ्यासान्निवारयतीति ॥१७१॥

तण्डुलजलपिट्ठंकोल्लमूलकरिसद्धपाणमपहरइ ॥
सव्वाइसारगहणीरोअसमूहं महाघोरं ॥१७२॥

तण्डुलजलपिष्टाङ्कोलमूलकर्षार्धपानमपहरति ।
सर्वातिसारग्रहणीरोगसमूहं महाघोरम् ॥

वरजलेनपिष्टमिरिकिल्लस्य मूलं*तोलकमात्रपरिमाणं पीतं सत् सर्वेषामतीसाराणां ग्रहणीगदानां च वृन्दं नाशयतीति ॥१७२॥

चुण्णं मरिअमहोसअकुडअतअंविउणभाअकमबढिअं ॥
गुडमीसमहिअपीअं गहणिमहावाहिविद्दवणं ॥१७३॥

चूर्णं मरिचमहौषधकुटजत्वचां[5]द्विगुणभागक्रमवृद्धम् ।
गुडमिश्रमथितपीतं ग्रहणीमहाव्याधिविद्रावणम् ॥

ऊषणस्य तथा नागरस्य तथा कुटजस्य वत्सकस्य त्वच एषामुत्तरोत्तरद्विगुणभागतया [6]विवृद्धं चूर्णं गुडमिश्रेण तक्रेण सह पीतं ग्रहणीशैथिल्यात्मकं महाव्याधिं विद्रावयतीति ॥१७३॥

---

१ वच्चल–ख. । वब्बूल ? । २ वच्चलदलैः–ख. । ३ वच्चलस्य–ख., वब्बूलस्य ? । ४ किंकिरालस्य ? ।
५ त्वग्द्विगुण–ख. । ६ विवृद्धमूलं–ख. । * कोलकमात्रपरिमाणम् ?

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मोरंदअतंडुलमहुअसारगिरिकण्णिआहलिद्दाहि ॥
अंजणगुलिआ णिहणइ विसूइअं तिअडुसणाहा ॥१७४॥

मयूरकतण्डुलमधुकसारगिरिकर्णिकाहरिद्राभिः ।
अञ्जनगुलिका निहन्ति विषूचिकां त्रिकटुकसनाथा ॥

एभिर्द्रव्यैः कृताञ्जनगुलिका विषूचिकाख्यमजीर्णरोगं नेत्राभ्यञ्जनेन शमयति। कैः-अपामार्गस्य बीजैस्तथा त्वग्रहितया मधुयष्ट्या तथा कटभ्या तथा पिण्डहरिद्रया तथा शुण्ठीमरिचपिप्पलीभि[1]रित्येतैः समांशैर्जलपिष्टैरिति ॥१७४॥

तिफलालोहशिलाजउहरडइचुण्णाण लीढमेक्केकं ॥
महुणा गुडूइसरसो व सव्वमेहे णिवारेइ ॥१७५॥

त्रिफलालोहशिलाजतुहरीतकीचूर्णानां लीढमेकैकम् ।
मधुना गुडूचीस्वरसो वा सर्वमेहान् निवारयति ॥

वरायास्तथा [2]शस्त्रस्य तथा शिलाजतोः शिलानिस्यन्दस्य तथा पथ्यायाः सम्बन्धिनां चूर्णानामेकतमं माक्षिकेन सहावलीढं सर्वप्रमेहान् बहुमूत्ररूपव्याधिभेदा[3]नपवारयति । अथवा गुडूच्या अमृतायाः स्वरसः पीतः सन् पूर्वोक्तकार्यं करोतीति ॥१७५॥

अत्तन्तमसिणमहिणवणिम्मलमहुमीसिअं णिसाचुण्णं ॥
आमलअरसुम्मीसं णासेइ पमेहसन्दोहं ॥१७६॥

अत्यन्तमसृणमभिनवनिर्मलमधुमिश्रितं निशाचूर्णम् ।
आमलकरसोन्मिश्रं नाशयति प्रमेहसन्दोहम् ॥

पिण्डहरिद्राचूर्णमतिमसृणमपुराणनिष्कलङ्कमाक्षिकसहितं तथामलकरसेन सह पीतमुपयोगात् प्रमेहव्याधिभेदान् सर्वान् विनाशयतीति ॥१७६॥

गोहावईइ मूलं कढिअं घअतेल्लगोरसुम्मीसं ॥
मुत्तमइरुद्धपसरं वि पीअमत्तं पवट्टेइ ॥१७७॥

[4]गोधापद्या मूलं क्वथितं घृततैलगोरसोन्मिश्रम् ।
मूत्रमतिरुद्धप्रसरमपि पीतमात्रं प्रवर्तयति ॥

गोधापद्याः [5]श्रीपर्ण्या मूलं गोरसेन तथा घृततैलाभ्यां [6]मृष्टं पक्वं ? पीतमत्यन्तगाढं मूत्रकृच्छ्रमाशु निवर्तयति । पूर्वं घृततैल[7]मृष्टं मूलं पश्चाद् गोरसेन [8]पक्वमिति ॥१७७॥

१ रित्येभिः-ख. । २ शस्त्रचूर्णस्य-ख. । ३ नपसारयति-ख. । ४ गोधापदीमूलं-ख. । ५ स्त्रीपर्ण्याः-ख. । ६-७ मृष्टं-ख. । ८ पक्वव्यमिति-ख. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पाहाणवाहिपीडं सोवच्चलमीसिआ सुरा हरइ ॥
महुदुद्धेहि तिरत्तं पीआ तिलनालभूइ व्व ॥१७८॥

पाषाणव्याधिपीडां सौवर्चलमिश्रिता सुरा हरति ।
मधुदुग्धाभ्यां त्रिरात्रं पीता तिलनालभूतीर्वा ॥

अश्मरीरोगरुजं वारुणी रुचकसंयुक्ता पीता सती नाशयति । अथवा तिलकाण्डानां पुटपाकदग्धानां भस्म माक्षिकक्षीराभ्यां सह पीतमेतत् कार्यं करोतीति ॥१७८॥

वच्छक्कडिआमूलं परिवसिअजलेण पीअमणुदिअहं ॥
पाडेइ पत्थणिरअस्स सक्करं तईअदिअहम्मि ॥१७९॥

वत्सकर्कटिकामूलं पर्युषितजलेन पीतमनुदिवसम् ।
पातयति पथ्यनिरतस्य शर्करां तृतीयदिवसे ॥

वत्सकर्कटिकाया गोपालकर्कटिकाया मूलं पर्युषितेन रात्रिमवस्थापितेन जलेन पिष्टं प्रातः प्रातः प्रत्यहं तेनैव सह पीतं सत् पथ्याशिनः शर्कराख्यं व्याधिविशेषं निस्सारयति तृतीयेह्नीति ॥१७९॥

पीआ दुद्धुम्मीसा कप्पोडिजडा दसाहमत्तेण ॥
अत्तंडसक्करं हित्तिऊण कढिणं पि पाडेइ ॥१८०॥

पीता दुग्धोन्मिश्रा कर्पोटीजटा दशाहमात्रेण ।
अत्यण्डशर्करां भित्त्वा कठिनामपि पातयति ॥

कपोत्या अर्कपुष्प्या मूलं गव्यक्षीरेण सह पीतं दिनदशकमात्राभ्यासादतिकर्कशामपि अण्डगतां शर्करां विदार्य पातयतीति ॥

गिम्हुप्पाडिअमालइमूलं पसुदुद्धसाहिअं ससिअं ॥
पीअं मुत्तणिरोहंडसक्करादुक्खविद्दवणं ॥१८१॥

ग्रीष्मोत्पाटितमालतीमूलं पशुदुग्धसाधितं ससितं ।
पीतं मूत्रनिरोधाण्डशर्करादुःखविद्रावणम् ॥

निदाघोन्मूलिताया मालत्याः सुमनोलताया मूलं छागक्षीरेण सितशर्करया सह साधितं सत् पीतं मूत्रकृच्छ्राण्डशर्कराव्यथानिवारणम् । अत्र साधनविधिः– पानीयपलानि षोडश द्रव्यपलेन सह क्वाथयित्वा चतुर्भागशेषात्ततो द्रव्यमपास्य तेनैव जलेन सह क्षीरपलानि चत्वारि क्वाथयित्वा क्षीरशेषं ग्राह्यमिति ॥१८१॥

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

गलगंडगंडमालाकुरंडरोआ क्खणेण णासन्ति ॥
कअलेवा तण्डुलधोअणपिट्ठदिअलट्ठिमूलेण ॥१८२॥

गलगण्डगण्डमालाकुरण्डरोगाः क्षणेन नश्यन्ति ।
कृतलेपा तण्डुलधावनपिष्टद्विजयष्टिमूलेन ॥

ज्येष्ठनीरसञ्चूर्णितेन ब्राह्मणयष्टिमूलेन विलिप्ताः सन्त एते व्याधयो विनश्यन्ति । गलगण्डो गलग्रन्थिः, बहवो गलगण्डा गण्डमालाऽपचीति प्रसिद्धा, कुरण्डो वृषणमूलवृद्धिलक्षण इति ॥१८२॥

वसहजलमसिणघट्टिन्दवारुणीमूललेविआ विहिणा ॥
लिंगाउ चम्मकीला पडन्ति सुहडा व्व संगामे ॥१८३॥

वृषभजलमसृणघृष्टेन्द्रवारुणीमूललिप्ता विधिना ।
लिङ्गाच्चर्मकीलाः पतन्ति सुभटा इव सङ्ग्रामे ॥

वृषमूत्रसूक्ष्मपिष्टेन विशालामूलेन विधिना [1]घर्षणरूपेण पुनः पुनः कृतलेपानि ध्वजोत्पन्नान्यर्शांसि सहसैव पतन्ति । अवश्यपातित्वमात्रप्रबोधनार्थमुपमानं स्पष्टार्थमिति ॥

पुटदड्ढमसिणवट्टिअतिफलाचुण्णेण गुंढिओ बहुशो ॥
णासइ सिवारसंजणलेवेण व झत्ति णररोओ ॥१८४॥

पुटदग्धमसृणवर्त्तितत्रिफलाचूर्णेन गुण्ठितो बहुशः ।
नश्यति शिवारसाञ्जनलेपेन वा झगिति नररोगः ॥

अन्तर्धूमेन दग्धं सत् सूक्ष्मपिष्टं यत् त्रिफलाचूर्णं तेन [2]समाच्छादितः सन् पुरुषवराङ्गव्याधिस्तत्कालमेव निवर्तते । अथवा हरीतक्या दार्वीक्वाथजेनाञ्जनेन च तुल्यमानेन पानीयभावितेन दत्तलेपो निवर्तत इति ॥१८४॥

णरकंदलहअरिवुकन्दघट्टपूगीफलाणमेक्केण ॥
णासइ मम्महरोओ कअलेजो जलणिघट्टेण ॥१८५॥

नरकन्दलहयरिपुकन्दघृष्ट[3]पूगीफलानामेकेन ।
नश्यति मन्मथरोगः कृतलेपो जलनिघृष्टेन ॥

नरकन्दलस्य नृशिरःकपालखण्डस्य करवीरमूलस्याति[4]कर्करस्य पूगफलस्येत्येतेषामेकतमेन जलनिघृष्टेन लेपाद् ध्वजव्याधिः शाम्यति । मन्मथशब्देनात्र लक्षणया ध्वजलेप उक्त इति ॥१८५॥

---

१ कर्षणरूपेण-ख. । २ सह आच्छादितं सत्-ख. । ३ पूगफलाना-ख. । ४ कर्कशस्य ? ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

गन्धव्वतेल्लमिलिअं सुरवारुणिमूलचुण्णमइमसिणं ॥
अवहरइ कुरण्डं सुरहिदुद्धपीअं तिरत्तेण ॥१८६॥

गन्धर्वतैलमिलितं सुरवारुणीमूलचूर्णमतिमसृणम् ।
अपहरति कुरण्डकं सुरभिदुग्धपीतं त्रिरात्रेण ॥

एरण्डतैलोपमिश्रितं विशालामूलचूर्णं गव्यक्षीरेण पीतमहोरात्रत्रयेण वृषणवृद्धिं शमयतीति ॥१८६॥

ईसरिमूलविलित्तो तालहडातलिनुचम्मविणिवद्धो ॥
उपसामइ कुरंडओ महीरजोव्व घणसलिलसिच्चन्तो ॥१८७॥

ईश्वरीमूलविलिप्तस्तालहडातलितचर्म्मविनिबद्धः ।
उपशास्यति कुरण्डो महीरज इव घनसलिलसिच्यमानम् ॥

ईश्वरी नागदमनी तन्मूलेन जर्लापिष्टेन लिप्तस्तथा, वनमूषिकसम्बन्धिना सूक्ष्माजिनेनाच्छादितः सन् कुरण्डाख्यो व्याधिराशु शाम्यति, भूरेणुर्मेघजलसिक्त इवेति ॥१८७॥

वामेण दाहिणं दाहिणेण विद्धेण वाममुपसमइ ॥
उवरितणभाए सवणेण कोमलं पच्चअ कुरंडं ॥१८८॥

वामेन दक्षिणं दक्षिणेन विद्धेन वाममुपशाम्यति ।
उपरितनभागे श्रवणेन कोमलं प्रतीहि कुरण्डम् ॥

अत्र प्रतीतिं भावय यदनेन प्रयोगेण कुरण्डव्याधिर्निवर्तते । केन— वामेन श्रोत्रेण पालीपृष्ठभागवर्त्तिशुक्तिभागे विद्धेन दक्षिणाण्डवृद्धिरूपं कुरण्डं विनश्यति, तथा दक्षिणेनैवमेव विद्धेन वामं निवर्तत इति ॥१८८॥

दंतिणिसामललेवो भअंदरं हरइ दुण्णिवारं पि ॥
कच्छुब्भवो व तिफलाजलेण पीओ पअत्तेण ॥१८९॥

दन्तिनिशामलकलेपो भगन्दरं हरति दुर्निवारमपि ।
कच्छोद्भवो वा त्रिफलाजलेन पीतः प्रयत्नेन ॥

दन्ती निकुम्भस्तथा पिण्डहरिद्रा तथा धात्रीफलमेतै र्जलसहितैः कृतो लेपो भगन्दराख्यं व्याधिं घोरमपि नाशयति । अथवा कच्छोद्भवो गुग्गुलुस्त्रिफलाक्काथेन पीत इति ॥१८९॥

खररुहिरपिट्ठमहिरोअचुण्णकविलत्थिलेविअमवसरइ ॥
काअरवलं व समरे कुविअं वि भअंदरं दूरं ॥१९०॥

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

खररुधिरपिष्टमहीरोगचूर्णकपिलास्थिलिप्तमपसरति ।
कातरबलमिव समरे कुपितमपि भगन्दरं दूरम् ॥

रासभरक्तेन पिष्टं यद् भूमिलताशरीरचूर्णं तथा कपिलस्य शुनोऽस्थि ताभ्यां निघृष्य लिप्तं सद् भगन्दरं कुपितमपि विकृतमपि प्रतरां निवर्तते । उपमानं व्यक्तार्थ[1]मिति ॥१८६॥

जलुआअरिसिअरत्तं भिण्णं वि भअन्दरं ण संठअइ ॥
लित्तं तिफलारसमसिणणिहट्टमज्जारअट्ठिणा ॥१६१॥

जलौकासमाकृष्टरक्तं भिन्नमपि भगन्दरं न सन्तिष्ठते ।
लिप्तं त्रिफलारसमसृणनिघृष्टमार्जारास्थ्ना ॥

जलसर्पिणीभिर्निष्कृष्टरुधिरं पूर्वं कृत्वा पश्चात् त्रिफलाक्वाथेन सुसूक्ष्मनिघृष्टं यद् वृषदंशकीकसं तेन लिप्तं सत् पाकावस्थातिक्रान्तत्वाद् भिन्नमपि भगन्दरं नात्रतिष्ठत इत्यर्थः ॥१६१॥

कुडअ[2]तआसूरणचुण्णतक्कपाणं खवेइ अरिसाइं ॥
गमिआ व सगुडजालिणिफलचुण्णविणिम्मिआ वत्ती ॥१६२॥

कुटजत्वक्सूरणचूर्णतक्रपानं क्षपयत्यर्शांसि ।
गमिता वा सगुडजालिनीफलचूर्णविनिर्मिता वर्त्तिः ॥

[3]वत्सकत्वचस्तथा सूरणाख्यकन्दस्य यच्चूर्णं तस्य तक्रेण गोरसेन सह पानमनामिका नाशयति । अथवा गुडसहितेन देवताल्लीफलचूर्णेन सम्पादिता वर्त्तिर्गमिता [4]गुदान्तर्निवेशिता सत्युक्तकार्यं करोतीति ॥१६२॥

लंबासुरवारुणिदेअदालिफलचुण्णगब्भिआ वत्ती ॥
पाडेइ पाउणिहिआ समूलाइ वि झत्ति अरिसाइ ॥१६३॥

लम्बासुरवारुणीदेवदालीफलचूर्ण[5]गर्भीकृता वर्त्तिः ।
पातयति पायुनिहिता समूलान्यपि झगित्यर्शांसि ॥

तिक्तालाबुविशालाजालिनीफलैः समैश्चूर्णितैर्गुडेन सह कृता वर्त्तिर्गुदान्तर्निवेशिता सत्यनामिकाः समूलाः क्षणेन पातयतीति ॥१६३॥

तुससलिलवीअवट्टिअकडुतुंबीसरसगिरकओ लेओ ॥
पाडेइ तक्खणं विअ पक्कफलाणिव्व अरिसाइ ॥१६४॥

---

१ मपि-ख. । २ तआइ-ख. । ३ वत्सकत्वक् तथा सूरणस्यकन्दस्य-ख. । ४ गुडान्तर्विवासिता-ख. । ५ गुडकृता इति प्राचीनवरपाठः ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तुषसलिलबीजवर्तितकटुतुम्बीसरसगिरकृतो लेपः ।
पातयति तत्क्षणमेव पक्वफलानीवार्शांसि ॥

तुषसलिलस्य काञ्जिकस्य यद् बीजमधोवर्ती घनसक्ततरो भागः कषाय इति क्वचित् प्रसिद्धस्तेन पिष्टं यत् तिक्तालावुन आर्द्रमन्तर्वर्तितबीजादि तेन कृतो लेपः शीघ्रमेव गुदजानङ्कुरान् पातयति । उपमानं व्यक्तार्थमिति ॥१६४॥

कुलिसतरुदुद्धभाविअरअणीलेवेण झत्ति णिपडन्ति ॥
अरिसाइ ससेन्धअदेवआलिफलविलेविआइं वा ॥१६५॥

कुलिशतरुदुग्धभावितरजनीलेपेन झगिति निपतन्ति ।
अर्शांसि ससैन्धवदेवतालीफलविलेपितानि वा ॥

सुधाक्षीरदत्तभावनं यत् निशाहरिद्राचूर्णं तत्कृतेन लेपेनार्शांसि क्षिप्रमेव पतन्ति । अथवा सैन्धवलवण[१]युक्तजालिनीफललेपेन पूर्वोक्तकार्यं [२]सम्पद्यत इति ॥१६५॥

तिअडुअसहिअं पक्कं तिउणेण पलासभूइसलिलेण ॥
उवउज्जन्तं विहिणा सुरहिघअं हरइ अरिसाइ ॥१६६॥

त्रिकटुकसहितं पक्वं त्रिगुणेन पलाशभूतिसलिलेन ।
उपयुज्यमानं विधिना सुरभिघृतं हरत्यर्शांसि ॥

पिप्पलीशुण्ठीमरिचैः सह पक्वं पलाशस्य दाहाद् [३]यदुत्पन्नं भस्म तन्मिश्रं जलं पटपूतं कृत्वा तेन शुद्धाम्बुस्थितया पक्वं गोघृतं पानेनैवोपयुज्यमानमर्शांसि नाशयतीति ॥१६६॥

रत्तारिसाहि मुच्चइ कोमलमालूरभोअणपसत्तो ॥
णवणीअकण्हतिलभोअणो व अलसो कलाहिव्व ॥१६७॥

रक्तार्शोभिर्मुच्यते कोमलमालूरभोजनप्रसक्तः ।
नवनीतकृष्णतिलभोजनो वाऽलसः कलाभिरिव ॥

प्रत्यग्राणां बिल्वानामाहारे कृताभ्यासो रक्तप्रधानैरर्शोभिः परिह्रियते । तस्य तानि निवर्तन्त इत्यर्थः । अथवा कृष्णतिलचूर्णेन सह नवनीतमभ्यासाद् भोजनं यस्य सोपि तैर्मुच्यते । यथा (न)नुयोगशीलः काव्यादिवैदग्ध्यैरिति ॥१६७॥

असिअचिरविल्लहुतासमुसलीमूलाण पिअइ जो एक्कं ॥
तक्कासी गोसलिलेण तस्स णिपडन्ति अरिसाइं ॥१६८॥

---

१ युक्तेन-ख. । २ करोतीति-ख. । ३ उत्पन्नं यद् ? ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

असितचिरविल्वहुताशमुशलीमूलानां पिबति य एकम् ।
तक्राशी गोसलिलेन तस्य निपतन्त्यर्शांसि ॥

असितचिरविल्वस्य कृष्णकरञ्जस्य तथा चित्रकस्य तथा मुशल्याः क्षुरिकाया मूलानां मध्यादेकतमं गोमूत्रेण यः पिबति गोरसं [1]चाहारादभ्यवहरति तस्यानामिका निपतन्तीति ॥१९८॥

समजवखारमहोसहचुरणं लीढं घएण वोसम्मि ॥
कुणइ खुहं कढिओअपीअं व महोसहं एक्कं ॥१९९॥

समयवक्षारमहौषधचूर्णं लीढं घृतेन प्रभाते ।
करोति क्षुधं कथितोदकपीतं वा महौषधमेकम् ॥

समेन तुल्यमात्रेण यवक्षारेण [2]यावशूकेन शुण्ठ्या च [3]कृतं चूर्णं घृतेन सह योऽवलेहेन प्रातरेव भुंक्ते तस्य सुतरां दीप्तोग्निर्भवति। अथवा शृतजलसंयुक्तं नागरमेवोपयुंजानस्य[4]पूर्वोक्तकार्यसम्पत्तिरिति ॥१९९॥

जो पिअइ कणासेन्धवजलणसिवाचुरणमुण्हसलिलेण ॥
ण क्खवेइ तस्स खुहा सघएण वि कोलपिहिएण ॥२००॥

यः पिबति कणासैन्धवज्वलनशिवाचूर्णमुष्णसलिलेन ।
न क्षपयति तस्य क्षुधा सघृतेनापि कोलपिशितेन ॥

पिप्पलीसैन्धवलवणचित्रकहरीतकीनां चूर्णमुष्णजलेन यः पिबति तस्यातिदीप्ताग्नित्वान्नित्यप्रवृत्तैव बुभुक्षा भवति या सूकरमांसेन सर्पिःसमेतेनापि न शाम्यतीति ॥२००॥

विल्लस्स गुलोइअस्स व सुसीअलं काढं महुम्मीसं ॥
तिविहं वि हरइ छद्दिं दुव्वा वा तंडुलजलेण ॥२०१॥

विल्वस्य गुडूच्या वा सुशीतलः क्वाथो मधून्मिश्रः ।
त्रिविधामपि हरति छर्दिं दूर्वा वा तण्डुलजलेन ॥

मालूरस्य मज्ज्ञः क्वाथः शृतशीतलो माक्षिकसंयुक्तो वातपित्तश्लेष्मजामपि वमिं विनाशयति। अथवा छिन्नरुहाया एवमेव क्वाथः, अथवा शाद्वलं तण्डुलधावनेन पिष्टं तेनैव सह पीतमुक्तकार्यं करोतीति । क्वाथद्रव्यपले पानीयपलानि षोडश, चतुर्भागशेषाणि ग्राह्याणीति सर्वत्र क्वाथेषु स्थितिः। पेष्यस्य द्वादशगुणं द्रवद्रव्यमालोडनाय देयमिति ॥२०१॥

जलमलअरत्तचन्दणपउमअलामज्जएहि सरिसेहि ॥
सीसम्मि कओ लेओ तुरिअं तण्हं णिवारेइ २०२॥

---

१ चाराद-ख. । २ यावशूकेन-ख. । ३ कृतेन-ख. । ४ पूर्वोक्तं कार्यं करोतीति-ख. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

जलमलयरक्तचन्दनपद्मकलामज्जकैः सदृशैः ।
शीर्षे कृतो लेपस्त्वरितं तृष्णां निवारयति ॥

वालकेन तथा श्वेतलोहितचन्दनाभ्यां तथा पद्मकेन कलशेन तथोशीरेणैतैः समांशै र्जलेन सह पिष्टैः शिरोलेपादाशु पिपासा शाम्यतीति ॥२०२॥

[1]णीलुप्पलवडप्परोहकुट्ठलाजमहुहि रइआइ ॥
गुलिआइ वअणविवरट्ठिआइ तण्हा समोसरइ ॥२०३॥

नीलोत्पलवटप्ररोहकुष्ठलाजमधुभी रचितया ।
गुलिकया वदनविवरस्थितया तृष्णा समपसरति ॥

कुवलयेन तथा न्यग्रोधवृक्षस्योपरिनिर्गतेन मूलेन तथा वाप्येन तथा लाजैर्भृष्टव्रीहिभिरित्येतैः समांशैश्चूर्णीकृतैर्माक्षिकेणालोडितैः कृतया गुलिकया मुखाभ्यन्तरस्थया तृष्णानिवर्त्तक इति ॥२०३॥

लंघणणिवाअसेवाकढिओअअपाणसेअखविअम्मि ॥
आमम्मि सअलजरदूषिआण जोआ पउज्जन्ति ॥२०४॥

लङ्घननिवातसेवाक्वथितोदकपानस्वेद[2]क्षपिते ।
आमे सकलज्वरदूषितानां योगाः प्रयुज्यन्ते ॥

वक्ष्यमाणाः क्वाथादयो योगा वातपित्तश्लेष्मसन्निपातजै र्ज्वरै र्व्यथितानामामे नवज्वरोपक्रमैः क्षपिते प्रयोक्तव्या न सहसैव। कैरुपक्रमैः— लङ्घनेन शरीरलाघवकरेणानाहारालपाहारादिना कर्मणा तथा निवातस्योष्णस्य स्थानस्य सेवया तथोष्णोदकेन केवलेन [3]द्रव्यशृतेन वा पीतेन तथा स्वेदेनाग्न्यादिजनितेनोष्मणेति ।

इति सामे पच्यमाने निरामज्वरलक्षणम् ।
ज्वरोपद्रवतीक्ष्णत्वमग्लानि र्बहुमूत्रता ।
न प्रवृत्ति र्न जीर्णानि न क्षुत् सामज्वराकृतिः ।
ज्वरवेगोधिकं तृष्णा प्रलापः स्वमनभ्रमः ।
मल(ा)प्रवृत्तिरुत्क्लेशः पच्यमानस्य लक्षणम् ।
जीर्णतामविपर्यासात् सप्तरात्रं च लङ्घनाद् ॥

इति वाग्भटः ॥२०३॥

---

१ णीलोप्पल-ख. । २ क्षपितेपि-ख. । ३ द्रव्यशृतेन पीतेन-ख. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पवणजरे छिण्णरुहाधणआसअसुंढिजलहरकसाओ ॥
पित्तजरे घणपप्पडअसुंढिहिमजलमणालाण ॥
सेम्होब्भवे महोसहम्मासअवसाण सघणाण ॥
पिज्जन्तो कुणइ सुखं सव्वेसु वि सुंढिपपडाणं ॥२०५-२०६॥

पवनज्वरे छिन्नरुहाधन्वयासकशुण्ठिजलधरकषायः* ।
पित्तज्वरे घन[१]पर्पटकशुण्ठिहिमजलमृणालानाम् ॥
श्लेष्मोद्भवे महौषधधन्वयासकवृषाणां सघनानाम् ।
पीयमानः करोति सुखं सर्वेष्वपि शुण्ठिपर्पटःकयो ॥

वातिकेज्वरे गुडूचीदुरालभानागरमुस्तानां समांशानां पलेन क्काथः, तथा पित्तज्वरे मुस्तस्य तथा सूक्ष्मपत्रस्य तथा विश्वभेषजस्य तथा मलयस्य तथा वालकस्य तथोशीरस्य पूर्वोक्तमात्रया क्काथः, तथा कफोत्थे शुण्ठीदुरालभाटरूषकानां मुस्तस्य च पूर्वमात्रया क्काथः पीतः सन्निरामस्य ज्वरस्यान्ते सौख्यं जनयति । सर्वेषु त्रिष्वपि दोषेषु ज्वरनिमित्तभूतेषु महौषधसूक्ष्मपत्रकयोः क्काथः पूर्ववत् सुखावहः । अस्य च योगस्य वातिकादिज्वरेषु पृथगपि प्रयोगमिच्छन्त्याचार्या इति युगलकम् ॥२०५-२०६॥

जलजलहरधम्मासअरोहिणिसुंठीओ कढिअजलेण ॥
पीआउ समत्थजरे हरंति उअरग्गिजणणीओ ॥२०७॥

जलजलधरधन्वयासकरोहिणिशुण्ठ्यः क्वथितजलेन ।
पीताः समस्तज्वरान् हरंत्युदराग्निजनन्यः ॥

वालकमुस्तदुरालभकटुकानागराणि क्काथक्रमेण [२]जलशोधितेन पीतानि सन्ति सर्वदोषोद्भवान् व्यस्तसमस्तान ज्वरान् नाशयन्ति जठरानलं च दीपयन्तीति ॥२०७॥

छिण्णरुहाघणभूणिंवसुंढिकढिअं जलं जरं हरइ ॥
घणसुरणिइद्धिआहि व मणालपाढाजलेहि व्व ॥२०८॥

छिन्नरुहाघनभूनिम्बशुण्ठीक्वथितं जलं ज्वरं हरति ।
घनसुरनिदिग्धिकाभिर्वा मृणालपाठाजलै र्वा ॥

गुडूचीमुस्तकिराततिक्तविश्वभेषजैः कथितं तोयं पीतं सज्ज्वरं हरति । अथवा मुस्तदेवदारुकण्टकारीभिः कथितमथवोशीरफञ्जीवालकैः कथितम् । क्काथत्रयस्यास्य दोषबलाबलं विचार्य सर्वज्वरेषु प्रयोग इति ॥२०८॥

---

* जलधराणां कषाय ? १ पप्पडअ-ख. । २ शोधितजलेन ? ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तिफलापडोलजलहरछिण्णरुहाणिम्बधाणअकसाओ ॥
हरइ समत्थं वि जरं पीओ महुसक्करासहिओ ॥२०६॥

त्रिफलापटोलजलधरछिन्नरुहानिम्ब[1]धान्यककषायः ।
हरति समस्तानपि ज्वरान् पीतो मधुशर्करासहितः ॥

हरीतक्यामलकविभीतकैस्तथा पटोलेन तथा मुस्तेन तथा गुडूच्या तथा पिचुमन्देन तथा धान्यकफलैः कृतः क्राथो माक्षिकसितशर्कराभ्यां सह शृतशीतः पीतः सन् सर्वज्वरान् निवारयतीति ॥२०६॥

अवहरइ समत्थजरं कुणइ खुहं मम्महं वि दीवेइ ॥
आमलअसिवाचित्तअपिप्पलिचुण्णं समब्भसिअं ॥२१०॥

अपहरति समस्तज्वरान् करोति क्षुधं मन्मथमपि दीपयति ।
आमलकशिवाचित्रकपिप्पलीचूर्णं समभ्यस्तम् ॥

धात्रीफलपथ्याग्निकणानां चूर्णमभ्यासेनोपयुक्तं सर्वान् ज्वरानरुचिं च क्षपयति, वृष्यकार्यं च करोतीति ॥२१०॥

आमलअमलअधाणअमआलपप्पडअघणगुलोईहि ॥
कढिअजलं समहुसिअं समत्थजरदप्पविद्दवणं ॥२११॥

आमलकमलयधान्यकमृणालपर्पटकघनगुडूचीभिः ।
क्वथितजलं समधुसितं समस्तज्वरदर्पविद्रावणम् ॥

धात्रीफलचन्दनधान्यकफलोशीरवरतिक्तकमुस्ताऽमृताभिः कृतः क्वाथः पीतो माक्षिकशर्कराभ्यां सहितः सर्वज्वरवेगविनाशन इति ॥२११॥

किरिमालअधम्मासअवासअभूणिंबमलअदक्खाहि ॥
कढिअजलंपि तहव्विअ हरइ जरं सअलदोसभवं ॥२१२॥

किरिमालकधन्वयासकवासकभूनिंबमलयद्राक्षाभिः ।
क्वथितजलमपि तथैव हरति ज्वरं सकलदोषभवम् ॥

आरग्वधदुरालभाटरूषककिराततिक्तकचन्दनमृद्वीकाभिः शृतं जलं पूर्ववन्मधुसिताभ्यां सह शृतशीतं पीतं पूर्वोक्तं कार्यं करोतीति ॥२१२॥

[2]मुत्थापडोलरोहिणितिफलासुरदारुणिंबरअणीहि ॥
सलहन्ति सण्णिवाए कसाअमिणमो महावज्जा ॥२१३॥

---

१ धनिकाकषायः—ख. । २ मुत्थापडुल्ल—ख. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

[1]मुस्तपटोलरोहिणी त्रिफलासुरदारुनिम्वरजनीभिः ।
श्लाघन्ते सन्निपाते कषायमेनं महावैद्याः ॥

घनकुलककटुकापथ्यामलकान्तदेवदारुपिचुमन्दहरिद्राभिर्नवभिः कृतो यो जल ? क्वाथस्तमेनं भिषग्वराः प्रशंसन्ति सन्निपातज्वरघ्नमिति ॥२१३॥

पुक्करगुलोइणाअरणिडिड्ढिआकाढओ तिदोसजरे ॥
सपवणवलासविअणाकासुब्भअसासपीडसंजणणे ॥२१४॥

पुष्करगुडूचीनागरनिदिग्धिकाक्वाथस्त्रिदोषज्वरे ।
सपवनवलासवेदनाकासोद्भवश्वासपीडासञ्जनने ॥

पुष्करस्य पद्माङ्कमूलस्य तथा छिन्नरुहायास्तथा शुण्ठ्यास्तथा कण्टकार्याः क्वाथः सन्निपातज्वरे योज्यः । कीदृशि— वातश्लेष्मसंयुक्ताया वेदनायास्तथा कासोद्भवस्य श्वासपीडायाश्च निर्वृत्तिहेतुभूते इति ॥२१४॥

छिण्णुब्भवामहोसहणिडिड्ढिआकाढओ कणासहिओ ॥
पिज्जन्तो जरपीणसमन्दाणलकाससाससूलहरो ॥२१५॥

छिन्नोद्भवामहौषधनिदिग्धिकाक्वाथः कणासहितः ।
पीयमानो ज्वरपीनसमन्दानलकासश्वासशूलहरः ॥

गुडूचीशुण्ठीकण्टकारीणां समांशानां क्वाथ उपरि पिप्पलीचूर्णेन युक्तः पीयमानो ज्वरं प्रतिश्यायमग्निमान्द्यं कासं [2]श्वासं शूलानि च हरतीति ॥२१५॥

किरिमालअसुण्ठिसिवाघणपिप्पलिमूलरोहिणिकसाओ ॥
सपवणसूले वि वलासजरहरो दन्तिपाअहरो ॥२१६॥

किरिमालकशुण्ठीशिवाघनपिप्पलीमूलरोहिणीकषायः ।
[3]सपवनशूलेपि वलासज्वरहरो दन्तिपादधरः[4] ॥

आरग्वधनागरपथ्यामुस्तग्रन्थिककटुकानां क्वाथः सर्वेषां चतु(र्थ)भागमात्रेण निकुम्भेन संयुक्तः सवातशूले आतुरे श्लेष्मप्रधानं ज्वरं हरतीति ॥२१६॥

किरिमालअरणरोहिणिदक्खापप्पडअचेअइकसाओ ॥
तण्हाउलाण मुच्छापित्तज्जरदाहवमिसमणो ॥२१७॥

किरिमालकरणरोहिणीद्राचापर्प्पटकचेतकीकषायः ।
तृष्णाकुलानां मूर्छापित्तज्वरदाहवमिशमनः ॥

१ मुस्ता–ख. । २ श्वासं च–ख. । ३ सपवनशूले–ख. । ४ धनः–ख. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

आरग्वधोशीरकटुकामृद्वीवरतिक्तकहरीतकीनां क्वाथस्तृषार्तानां हृद्व्याकुलत्वं पित्तज्वरकृतं सन्तापं वमनं च शमयतीति ॥२१७॥

मलअमणालमहोसहमुत्थापप्पडअवालअसणाहं ॥
जरतण्हादाहहरं कढिअं सिसिरं जलं पीअं ॥२१८॥

मलयमृणालमहौषधमुस्तपर्पटकवालकसनाथम् ।
ज्वरतृष्णादाहहरं क्वथितं शिशिरं जलं पीतम् ॥

श्वेतचन्दनोशीरशुण्ठीघनवरतिक्तकह्रीवेरसंयुक्तं शृतशीतलं सलिलं पीतं [1]सज्वरतृषं दाहमपनयतीति ॥२१८॥

पिप्पलिचुण्णो घअमहुविमीसिओ कढिअदुद्धसञ्जुत्तो ॥
पीओ विसमज्जरकासहिअअरोए विणासेइ ॥२१९॥

पिप्पलीचूर्णं घृतमधुमिश्रितं क्वथितदुग्धसंयुक्तम् ।
पीतं विषमज्वरकासहृद्रोगान् विनाशयति ॥

मागधिकाचूर्णं सर्पिर्माक्षिकाभ्यां सहितं शृतशीतेन गोक्षीरेण सह पीतं शीतज्वराँस्तथा कासाँस्तथा हृद्रोगान् विनाशयति । विषमज्वरस्य यावन्तः प्रभेदाः सम्भवन्ति तेष्वयं प्रतिपक्षः प्रयोगः । ते च भेदाः— सततोऽन्येद्युराश्रितस्तृतीयकश्चतुर्थकोद्विरिति पञ्च विषमज्वरभेदाः । वैषम्यं च- उद्भवचिकित्साकालवैषम्यात्तेषामुक्तम् । तत्राहोरात्रमध्ये द्वौ वारौ यो भवति स सततः। एकवारं भवति सोन्येद्युराश्रितः । एकाहान्तरितस्तृतीयकः । दिनमेकं भूत्वा दिनद्वयं नभवति पुनश्चतुर्थे प्रवर्तते [2]इति । तद्विपर्ययादिनद्वयं भूत्वा दिनमेकं न भवति पुनश्चतुर्थे [3]प्रवर्तत इति चतुर्थकः । सर्वेषु व्याधिषु निदानादिपञ्चकं देशकाला इत्यादि विचारं च कृत्वा योगाः प्रयोक्तव्या इति ॥२१९॥

गोमअरससञ्जुत्तं विसमज्जरपीडिआण गोदुद्धं ॥
सुंठिसहिअं व कढिअं छाअच्छीरं सुखं देइ ॥२२०॥

गोमयरससंयुक्तं विषमज्वरपीडितानां गोदुग्धम् ।
शुण्ठीसहितं वा क्वथितं छागक्षीरं सुखं ददाति ॥

गोक्षीरं कथितं त्रिभागमात्रेण गोशकृद्रसेन पश्चात् संयुक्तमुक्तप्रभेदैः सर्वैः शीतज्वरैः कदर्थितानां पीतं सत् [4]स्वास्थ्यं करोति । अथवा नागरेण सहितमजापयः कथितं पानादेवं करोतीति ॥२२०॥

[5]मुत्थाविहईफलसेन्धवेहि महुलट्ठिआसणाएहि ॥
वज्जइ वलिआ वि खअं णिद्दा णासे वितीएणेहि ॥२२१॥

---

१ ज्वरं तृषं-ख. । २ इति चतुर्थकः-ख. । ३ प्रवर्तते इति ।—ख. । ४ स्वा(स्था) त्म्यं-ख. । ५ मोत्था-ख. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मुस्तबृहतीफलसैन्धवैर्मधुयष्टिकासनाथैः ।
व्रजति बलवत्यपि क्षयं निद्रा नस्ये वितीर्णैः ॥

एतैः सजलैर्नावने दत्ते सुनिर्घ्नन्नपि नश्यति । कैः— मुस्तेन तथा कण्टकारीफलेन तथा सैन्धवलवणेन तथा मधुयष्ट्या एतैः समांशैरिति ॥२२१॥

मिरिअतुरंगमलालापसूअसारंजणं विणासेइ ॥
वाअसजंघाजडिआ जणेइ सिरसंठिआ णिद्दं ॥२२२॥

मरिचतुरङ्गमलालाप्रसूनसाराञ्जनं विनाशयति ।
वायसजंघाजटिका जनयति शिरःसंस्थिता निद्राम् ॥

ऊषणमश्वमुखस्यन्दो माक्षिकं चेत्येतैः कृतमञ्जनं नेत्रन्यस्तं निद्रां निवर्तयति । काकजङ्घामूलं तु मूर्ध्नि निबद्धं नष्टां निद्रामुत्पादयतीति ॥२२२॥

तेल्लं सज्जरसम्मिलपरिपक्कमथोहसिसिरजलमलिअं ॥
जरदाहपवणसोणिअतावहरं लेवमत्तेण ॥२२३॥

तैलं सर्जरसाम्लपरिपक्वमस्तोकशिशिरजलमलितम् ।
ज्वरदाहपवनशोणिततापहरं लेपमात्रेण ॥

रालागर्भेण काञ्जिकेन यथोक्तमात्रया पक्वं तैलं पश्चादतिशीतलेन बहुनोदकेन निर्म्मथितं लेपेनोपयुक्तमेव ज्वरकृतं दाहं वातरक्तकृतञ्च तापं हरतीति ॥२२३॥

[1]चुण्णीकअकुडजकुडअद्धरत्तवल्लिपलद्धसंजुत्तं ।
तेल्लस्स पत्थमेक्कं सअगुणतुससलिलसंसिद्धं ॥
एअं जरदारुणदाहपसमणं तुहिणकिरणपडिरूवं ।
तेल्लं उवजुज्जन्तं पहरिसजणणं च अंगाणं॥२२४-२२५॥

चूर्णीकृत[2]कुटजकुडवार्धरक्तवल्लीपलार्धसंयुक्तम् ।
तैलस्य प्रस्थमेकं शतगुणतुषसलिलसंसिद्धम् ॥
एतज्ज्वरदारुणदाहप्रशमनं तुहिनकिरणप्रतिरूपम् ।
तैलमुपयुज्यमानं प्रहर्षजननं चाङ्गानाम् ॥

इदं तैलमभ्यङ्गेनोपयुज्यमानं ज्वरकृतं दारुणं दाहं प्रशमयति गात्राणि चाह्लादयति । अत एव शशिकरसदृशम् । कीदृशं तैलम्—इन्द्रयवचूर्णस्य कुडवार्धं पलद्वयं तथा मञ्जिष्ठाया अर्धपलमेवद्गर्भीकृत्य द्वात्रिंशत्पलपरिमाणं तैलं शतगुणेन काञ्जिकेन सिद्धमिति युगलकम् ॥२२४-२५॥

१ चुण्णीकअजवकुडअद्द-ख. । २ यव-ख. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

भल्लाअअपिप्पलीमूलपिप्पलीकाढअं पिअन्तस्स ॥
जूआरसिरिव्विअ चिरमूरुत्थंभं ण संठाइ ॥२२६॥

भल्लातकपिप्पलीमूलपिप्पलीकाथं पिबतः ।
द्यूतकारश्रीरिव चिरमूरुस्तंभो न संतिष्ठते ॥

अरुष्करग्रन्थिकमागधिकाभिः सिद्धं काथं पानेनाभ्यवहरत ऊरुस्तम्भाख्यो व्याधिः शीघ्रं नश्यति । उपमानं गतार्थमिति ॥२२६॥

मूलअवीएहि समं असगन्धा रफमट्टिआसहिआ ॥
लेओम्मद्दणविहिणा ऊरुत्थंभं समं णेइ ॥२२७॥

मूलकवीजैः सममश्वगन्धा वल्मीकमृत्तिकासहिता ।
लेपोन्मलनविधिनोरुस्तम्भं शमं नयति ॥

मूलकस्य महाकन्दस्य वीजैः सह वाजिगन्धा वल्मीकमृदा सहिता । त्रीणि समांशानीत्यर्थः । सा जलेन सह लेपोद्वर्तनकर्मणोरुस्तम्भं शमयतीति ॥२२७॥

अइगरुअणिम्बमूलं सीअलजलवट्टिअं पिअन्तस्स ॥
विहडइ रंहणिवाओ वसणे अउलीणभित्तो व्व ॥२२८॥

अतिगुरुनिम्बमूलं शीतलजलवर्तितं पिबतः ।
विघटते रङ्खणीवातो व्यसनेऽकुलीनभृत्य इव ॥

महतः पिचुमन्दवृक्षस्य मूलं मद्देव शिशिरोदकेन सह पिष्टं तेनैव सह पानेनोपयुञ्जानस्यातुरस्य रंघण्योर्जङ्घयोर्वातोऽपगच्छति । उपमानं व्यक्तार्थमिति ॥२२८॥

अद्दतअरमूलं पिट्ठं तक्केण पीअमवहरइ ॥
सेहालिआदलेहि व कढिअजलं रंहणीवाअं ॥२२९॥

आर्द्रार्द्रतगरमूलं पिष्टं तक्रेण पीतमपहरति ।
शेफालिकादलैर्वा क्वथितजलं रंघणीवातम् ॥

अतिसरसस्य कुटिलस्य मूलं गोरसेन पिष्टं तेनैव सह प्रतिदिवस पीतं पूर्वोक्तं व्याधिं शमयति । अथवा शेफालिकायास्ताम्रवृन्तायाः पल्लवैः क्वथितं जलं पानेनोपयुक्तमेतदेव कार्यं करोतीति ॥२२९॥

अण्णेण समं खाइआ पीआ वा पिसिअरससंजुत्ता ॥
अवहरइ अट्ठिभंगं पवणं च सिआलसेहलिआ ॥२३०॥

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अन्नेन समं खादिता पीता वा पिसितरसकसंयुक्ता ।
अपहरत्यस्थिभङ्गं पवनं च शृगालमेखालिका ॥

शृगालमेखलिकाऽस्थिसंहारापरनामा, ओदनेन सह व्यञ्जनीकृत्य भुक्ता मांसरसेन सह कथिता वा पीता भग्नमस्थि रोहयति वातव्याधिं च नाशयतीति ॥२३०॥

घअमीसमसिणसत्तु अछाअच्छीरेणलित्तमत्ताणं ॥
सम्मलिलेवेणवि वा णासइ चरणाण संतावो ॥२३१॥

घृतमिश्रमसृणसक्तु कछागक्षीरेण लिप्तमात्रयोः ।
शाल्मलीलेपेनापि वा नश्यति चरणयोः सन्तापः ॥

गव्यघृतेन मलिता सूक्ष्मा यवसक्तवो यस्मिँस्तादृशेनाजापयसा लेपः समकालमेव पादयोर्वा[1]ऽरक्तादिजनितं दाहं शमयति । अथवा शाल्मल्याः कारायण्या जलपिष्टया त्वचा लेपेनैतत् कार्यं स्यादिति ॥२३१॥

गुलगेरुअपुररालासेन्धअमहुमअणघअकआलेआ ॥
फुडिआ वि होन्ति पईहि कमलोअरकोमला चरणा ॥२३२॥

गुडगैरिकपुररालासैन्धवमधुमदनघृतकृतालेपौ ।
स्फुटितावपि भवतः प्रतीहि कमलोदरकोमलौ चरणौ ॥

गुडेन तथा गैरिकेण गिरिमृदाख्येन धातुविशेषेण तथा गुग्गुलुना तथा सर्जरसेन तथा सैन्धवलवणेन तथा माक्षिकेण तथा सिक्थकेन तथा गोघृतेनैतैस्तुल्यैश्चूर्णद्रव्यैर्द्रवद्रव्यलेपीकृतैः कृतोभ्यङ्गो[1]ययोस्तादृशौ पादौ स्फुटितौ विपादिकादूषितावपि पद्मगर्भसुकुमारौ सम्पद्येतामिति ॥२३२॥

विअरिल्लिअघरकुमारिदलद्धवद्धाण तइअदिअहम्मि ॥
उद्देशो वि हु कहकहवि विणज्जइ चम्मकीलाण ॥२३३॥

विदारितगृहकुमारीदलार्धवद्धानां तृतीयदिवसे ।
उद्देशोपि खलु कथंकथमपि ज्ञायते चर्मकीलानाम् ॥

गृहकुमार्या [2]हठकुमार्याः पत्रेण द्विदलीकृतेनावच्छाद्य ग्रथितानां पादादिजानां कठिनग्रन्थिरूपाणां व्याधिविशेषाणां चर्मकीलसंज्ञानां बन्धादनन्तरं तृतीयेह्नि एवं नाम नाशः सम्पद्यते यद्तदीय उद्देश उत्पत्तिस्थानमेव क्लेशेन ज्ञायते । एतेन स्थूलमध्यसूक्ष्मरूपा जतुमणिचर्मकीलमसकसंज्ञया [3]प्रसिद्धा व्याधय स्त्रिविधा अप्यनेन योगेन वक्ष्यमाणैरन्यैर्वा सर्वे विनश्यन्ति । चर्मकीलादिसंज्ञाग्रहणमुपलक्षणार्थमिति॥२३३॥

---

१ पादयोः-ख. । २ फटकुमार्याः-ख. । हठकुमार्याः ? । ३ प्रसिद्धो व्याधिस्त्रिविधोप्यनेन ''सर्वो विनश्यति-ख. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

घट्टा वा वणदक्खाकन्देण मलिआ दलेहि वा तीइ ॥
णिपडन्ति चम्मकीला सरिअडविड्विणो व्व पूरेण ॥२३४॥

घृष्टा वा वनद्राक्षाकन्देन मलिता दलैर्वा तस्याः ।
निपतन्ति चर्मकीलाः सरित्तटविटपिन इव पूरेण ॥

वनद्राक्षाया गोष्ठाम्लिकाया मूलेन कृतनिघर्षणास्तस्या एव पत्रैर्वा मृदिताः सन्तः पूर्वोक्ताश्चर्मकीला निपतन्ति । नदीतीरतरव ओघेन यथेति ॥२३४॥

पवणारिपल्लवच्छेअगहिअचुण्णअणिहंससिहिलंगो ॥
वहलसमुग्गअरुहिरो सूरो व्व रणे मसो पडइ ॥२३५॥

पवनारिपल्लवच्छेदगृहीतचूर्णकनिघर्षशिथिलांगः ।
वहलसमुद्गतरुधिरः शूर इव रणे मशः पतति ॥

पवनारेरेरण्डस्य यः पल्लवस्तस्य [1]छेदस्थानैर्वृन्तसन्धिरूपै गृहीतं यच्चूर्णकं ताम्बूलरङ्गस्तेन यद् घर्षणं तेन मृदूभूतं गात्रं यस्य स तथा । अत एव भूरिसमुद्गतरक्तो मशाख्यो व्याधिः स्वस्थानात् पतति निवर्तत इत्यर्थः । व्यक्तार्थमुपमानमिति ॥२३५॥

णिसिवसिअसज्जिआजलणिव्वापिअसुडड्ढसंखअविलित्ता ॥
णस्सन्ति मसा दुग्गच्चणोणिआ सज्जणगुणा व्व ॥२३६॥

निशोषितस्वर्जिकाजलनिर्वापितसुदग्धशंखकविलिप्ताः ।
नश्यन्ति मशा दौर्गत्यनुन्नाः सज्जनगुणा इव ॥

रात्रिपर्युषितेन स्वर्जिकाक्षारस्य सुवर्चिकायाः कर्षमात्रयुक्तेन पानीयकुडवमात्रेण प्रशमितः पुटपाकदग्धो यः कम्बुस्तेन पिष्टेन सता दत्तलेपाः सन्तः प्रागुक्ता मशा अभावं यान्ति । दारिद्र्येण [2]ग्रस्ता यथा साधुगुणाः श्रुतशमादय इति ॥२३६॥

आदीविअपलहिकिलिव्व(स्व)अग्गंगारअसेइआ वहुसो ॥
पडइ मसो अहिकंचुअघट्टो वा तम्मि कुविअम्मि॥२३७॥

आदीपितकर्पासस्थूलदमदार्वग्राङ्गारस्वेदितो बहुशः ।
पतति मशोऽहिकञ्चुकघृष्टो वा तस्मिन् कुपिते ॥

कर्पासलतायाः सम्बन्धिनः सूक्ष्मदारुणोऽग्निदग्धो यः प्रान्तस्तद्गतेन स्फुलिङ्गेन, तेन पुनः पुनस्तापनाज्जनितस्वेदःसन् मशो नश्यति । अथवा सर्पनिर्मोकेण पुटपाकदग्धेन कृतनिघर्षणः सन् तस्मिन् क्लेदमापन्ने निपततीति ॥२३७॥

१ छेदस्थाने वृन्तसन्धिरूपे-ख. । २ ध्वस्ताः- ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

जीरअपक्कं पच्छा सित्थअसज्जरसमीसिअं हरइ ॥
घअमब्भंगेण हुआसडड्ढदुक्खं छणद्धेण ॥२३८॥

जीरकपक्वं पश्चात् सिक्थकसर्जरसमिश्रितं हरति ।
घृतमभ्यङ्गेन हुताशदग्धदुःखं क्षणार्धेन ॥

अजाज्या सिद्धं घृतं पश्चात् मधूच्छिष्टेन राजया च घृतपले प्रत्येकं तोलकमिति मात्रया मिश्रितं संल्लेपेनोपयुक्तमग्निदग्धव्यथां तत्कालमेव शमयति । अत्र साधनयुक्तिः पूर्वोक्तद्रव्यपलं पानीयपलानि षोडश घृतपलचतुष्टयं युगपत् क्वाथयित्वा घृतशेषं ग्राह्यमिति ॥२३८॥

तिलतेल्लडड्ढजवमसिविलित्तमइरा विमुक्तसन्दावं ॥
सिहिडड्ढं पगप्पइ तत्तेल्लब्भग्गिअं वहुसो ॥२३९॥

तिलतैलदग्धयवमसीविलिप्तमचिराद् विमुक्तसन्तापम् ।
शिखिदग्धं रोहति तत्तैलाभ्यक्तं बहुशः ॥

तिलतैलमध्यभृष्टान यवान् पिष्ट्वा कृतया मस्या विलिप्तं सदग्निप्लुष्टं तत्कालमेवोपशान्तदाहं तेनैव तैलेन पुनःपुनः कृताभ्यङ्गं निर्व्रणीभवतीति ॥२३९॥

माहिसणवणीअं दुद्धपिट्ठतिलमीसिअं समं णेइ ॥
लेवेण सूणिमं दुद्धरंवि भल्लाअअप्पहवं ॥२४०॥

माहिषनवनीतं दुग्धपिष्टतिलमिश्रितं शमं नयति ।
लेपेन [1]श्वयथुं दुर्धरमपि भल्लातकप्रभवम् ॥

महिषीनवनीतं माहिषीक्षीरचूर्णिततिलसहितं लेपेनारुष्करफलभोजनस्पर्शादिना जनितं श्वयथुं घोरमपि शमयतीति ॥२४०॥

सहसव्विअ घअघणसारपूरिओ धवलपट्टअणिवद्धो ॥
अप्पत्तपाअविअणो रोहइ सत्थुब्भवो पहरो ॥२४१॥

सहसैव घृतघनसारपूरितो धवलपट्टकनिबद्धः ।
अप्राप्तपाकवेदनो रोहति शस्त्रोद्भवः प्रहारः ॥

गोसर्पिषा तथा घनसारेण कर्पूरेण सहसैव लिप्तमात्र एव भरितः सन खड्गादेराघातः श्वेतांशुकबद्धः पाकमनपेक्ष्यैव तेनैव पट्टकबन्धेन निर्व्रणीभवति । आसप्ताहात् सद्योव्रणोक्ता चिकित्सा शस्त्रक्षतेषु कर्तव्या । सप्ताहादूर्ध्वं त्वन्येति ॥२४१॥

---

१ सूनूथं (सूनत्वं ?)-ख. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

रोहेइ दसणचव्विअसरपुंखामूलरसो पहरं ॥
महिसीसुअपढमपुरीसमसिणचुण्णंव णिमिसेण ॥२४२॥

रोहयति दशनचर्वितशरपुंखामूलरसः प्रहारम् ।
महिषीसुतप्रथमपुरीषमसृणचूर्णमिव निमेषेण ॥

शरपुंखाया बाणपुंखाया मूलस्य दन्तचर्वितस्य रसः पूरणात् शस्त्रघातं रोहयति। यथा तत्कालप्रसूतमहिषीवत्सस्यागृहीतग्रासस्य प्रथमप्रवृत्तं यत् शकृत् तस्य शुष्कस्य सम्बन्धि चूर्णमेनं रोहयतीत्युपमानद्वारेण द्वितीयः प्रयोग इति ॥२४२॥

भरिओ मिच्छिअभरिओ सहएविरसेण पट्टअणिवद्धो ॥
अहिणवपहरो रोहं वज्जइ तेणेव्व वन्धेण ॥२४३॥

भरितरिक्तीकृतभरितः सहदेवीरसेन पट्टकनिबद्धः ।
अभिनवप्रहारो रोहं व्रजति तेनैव बन्धेन ॥

सहदेवी दण्डोत्पलाख्या ओषधिः । तन्मूलस्य रसेन निष्पीडितेन प्रथमं पूरितस्ततो रिक्तीकृतः पुनस्तेनैव रसेन पूरितः पश्चाद् बद्धपट्टिकः सन् तत्काललग्नः शस्त्रघातो रोहति, तेनैव बन्धेन, [1]द्वितीयं [2]पट्टिकाकार्यं नापेक्ष्यत इत्यर्थइति ॥२४३॥

इक्कंविअ सरपुंखापाढालज्जालुआण जलपिट्ठं ॥
रोहेइ महापहरं वि मूलमालेवमत्तेण ॥२४४॥

एकमेव शरपुंखा[3]पाठालज्जालुकीनां जलपिष्टम् ।
रोहयति महाप्रहारमपि मूलमालेपमात्रेण ॥

बाणपुङ्खायास्तथा[4]..........स्तथा समङ्गायाश्च तिसृणां मध्यादेकस्या एव मूलं सलिलचूर्णितं सत् लेपेनैव दृढमपि शस्त्रप्रहारमचिरेण रोहयतीति ॥२४४॥

रोहेइ वणं विहडेइ वेअणं पूइपाअमवहरइ ॥
वाअसजंघालेओ तिरत्तमत्तं कओ पहरे ॥२४५॥

रोहयति व्रणं विघटयति वेदनां पूतिपाकमपहरति ।
वायसजङ्घालेपस्त्रिरात्रमात्रं कृतः प्रहारे ॥

काकजङ्घाया जलपिष्टायाः शस्त्रप्रहारे दत्तो लेपस्त्रिरात्रं व्रणं रोहयति व्यथां निवारयति पूतिपाकं चापनयति । [5]पूतिपाकावस्थामप्राप्तमेव व्रणमा रोहयतीत्यर्थः ॥२४५॥

---

१ द्वितीयेन-ख. । २ पट्टिकाकारं-ख. । ३ पाल-ख. । ४ हद्भ्या-ख. । ५ प्रतिपाकावस्था-ख. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कढिअं लज्जलिआसरसमूलखण्डेहि सञ्जुअं तेल्लं ॥
रोहेइ सेअविहिणा विअणापाउज्झिअं पहरं ॥२४६॥

कथितं लज्जालुकीसरसमूलखण्डैः संयुतं तैलम् ।
रोहयति सेकविधिना वेदनापाकोज्झितं प्रहारम् ॥

लज्जालुकी समङ्गा तस्या आर्द्राणां मूलानां शकलैः सहितं पक्वं तिलतैलं सेकविधिनाऽभ्यङ्गकर्मणा व्यथापाकरहितं शस्त्रक्षतं रोहयति । अत्र तैलपाकविधिर्न विवक्षितः, केवलं मूलखण्डानि क्षिप्त्वा तैलं पच्यत इति ॥२४६॥

ससलिलमोरन्दअमूलपक्कतिलतेल्ललद्धसेआण ॥
सहसत्ति दारुणाण वि वणाण विअणा समोसरइ ॥२४७॥

ससलिलमयूरकमूलपक्वतिलतैललब्धसेकानाम् ।
सहसेति दारुणानामपि व्रणानां वेदना समपसरति ॥

ससलिलैः सरसैरार्द्रैरपामार्गमूलैस्तैलपाकविधिना साधितं यत् तिलतैलं तेन प्राप्तः सेको यैस्तादृशानां व्रणानां घोराणामप्याशवेव वेदना (व्यथा)ऽपगच्छतीति ॥२४७॥

वणदक्खावणघरकुमारिकन्दभिंडुअमोरअविपक्कं ॥
अवहरइ घअं सेएण सअलपहरुब्भवं दुक्खं ॥२४८॥

वनद्राक्षावनगृहकुमारीकन्दभिण्टुकमयूरकविपक्वम् ।
अपहरति घृतं सेकेन सकलप्रहारोद्भवं दुःखम् ॥

वनद्राक्षाया गोष्ठाम्लिकायास्तथा वनकुमार्या वन्ध्यकर्कोट्या गृहकुमार्या हट्टकुमारीति प्रसिद्धायाश्च मूलैस्तथा गोपालपीठकेन तथाऽपामार्गेण चैतैः समांशैः सिद्धं घृतमभ्यङ्गेन सर्वशस्त्राभिघातजं दुःखं निवारयतीति । पाकविधिरत्र- शुद्धाम्बुक्रमेण द्रव्येभ्यश्चतुर्गुणः स्नेहस्तस्य चतुर्गुणं जलं सहैव पक्त्वा स्नेहशेषं ग्राह्यमिति ॥२४८॥

[1]करसंपुडणिप्पीडिअमोरन्दअदलरसेण दिण्णेण ॥
पहरा चिरप्पअट्टं पि सोणिअं थक्कइ खणेण ॥२४९॥

करसंपुटनिष्पीडितमयूरकदलरसेन दत्तेन ।
प्रहाराच्चिरप्रवृत्तमपि शोणितं रुध्यते क्षणेन ॥

हस्तयुग्मेन विमृद्य निष्पीडितानामपामार्गपत्राणां निस्यन्देन अंशुकेन शस्त्रक्षताद् बहुकाल-प्रसृतमपि रक्तं तत्कालमेव [2]रुध्यतीति ॥२४९॥

१ करसंफुडणिप्पीडिअ–ख. । २ रुध्यत इति ? ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

लंगलिआवट्टुलकन्दलेविए वणमुहम्मि णीसरइ ॥
चिरकालपणट्ठं पि हु सल्लं तेणेव्व मग्गेण ॥२५०॥

लाङ्गलिकावर्तुलकन्दलिप्ते व्रणमुखे निस्सरति ।
चिरकालप्रणष्टमपि खलु शल्यं[1] तेनैव मार्गेण ॥

लाङ्गलिका हलिनी तस्या वर्तुलेन वृत्तरूपेणादीर्घेण मूलेन जलपिष्टेन कृताभ्यङ्गे शस्त्रक्षतास्ये बहुकालमदृश्यमानमपि शस्त्रशकलादिरूपं शल्यं येनैव मार्गेण प्रविष्टं तेनैव निष्क्रामतीति ॥२५०॥

जलवट्टिउट्ठवारुणिमूलं मूलं व मेससिंगीए ॥
वणपेरन्तालेवेण णट्ठसल्लं समुद्धरइ ॥२५१॥

जलवर्तितोष्ट्रवारुणीमूलं मूलं वा मेषशृङ्ग्याः ।
व्रणपर्यन्तालेपेन नष्टशल्यं समुद्धरति ॥

उष्ट्रवारुण्याः करभवारुण्या मूलं जलपिष्टं शस्त्रक्षताभ्यङ्गेनादृश्यं शल्यमाकर्षति । अथवा मेषशृङ्ग्या मूलमिति ॥२५१॥

आअल्लिमूलरअणीण खंडखंडेहि काढिअं तेल्लं ॥
पूरणमत्तेणव्विअ णासेइ चिरुब्भवं णाडिं ॥२५२॥

[2]आपल्लिमूलरजन्योः खण्डखण्डैः क्वथितं तैलम् ।
पूरणमात्रेणैव नाशयति चरोद्भवां नाडीम् ॥

आपल्ली निष्पर्याया देशविशेषप्रसिद्धा । तस्या मूलं तथा रजनी पिण्डहरिद्रा तयोः शकलशकलैः क्वथितं तैलं व्रणस्य भरणमात्रेणैव कालान्तरप्ररूढां व्रणगतिं रोहयति । तैलस्य मूलखण्डैः सह क्वथनमात्रमत्र विवक्षितं न तु पाकविधिरिति ॥२५२॥

माहिसदहिकुद्दवकूरमीसिअं हरइ चिरप्परूढं पि ॥
खइअं कंगुलिआमूलचुण्णमइदारुणं णाडिं ॥२५३॥

माहिषदधिकोद्रवान्नमिश्रितं हरति चिरप्ररूढामपि ।
खादितं कङ्गुलिकामूलचूर्णमतिदारुणां नाडीम् ॥

कङ्गुलिका निष्पर्याया ओषधिस्तस्या मूलचूर्णं कोरदूषस्य तृणधान्यविशेषस्यान्नेन महिषीदधिसंयुक्तेन सह भुक्तं चिरप्रवृत्तामपि घोरां व्रणस्य गतिं शमयतीति ॥२५३॥

---

१ शस्त्रं-ख. । २ आषण्ण-ख. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

समतुलिअपुडपईविअतालघणणाअमूलमसीभरिआ ॥
णासइ णाडी दुट्ठं *च दूसहं चिरप्परूढंपि ॥२५४॥

समतुलितपुटप्रदीपिततालवननादमूलमसीभरिता ।
नश्यति नाडी दुष्टं *च दुःसहं चिरप्ररूढमपि ॥

तुल्यांशोन्मिश्रितस्यान्तर्धूमदग्धस्य च हरितालस्य तथा तण्डुलीयकमूलस्य मस्या पूरिता नाडी व्रणगतिः प्ररोहति । । दुष्टं च व्रणं [1]चिरकालोत्थितमसह्यवेदनमपि निवर्तते पूरणादेवेति ॥२५४॥

फेण[2]णिहंसुब्भवरत्तमंडलं सिसिरसलिलपिट्ठेण ॥
उवसमइ तक्खणंव्विअ विअतरुफललेवमत्तेण ॥२५५॥

फेननिघर्षोद्भवरक्तमण्डलं शिशिरसलिलपिष्टेन ।
उपशाम्यति तत्क्षणमेव द्विजतरुफललेपमात्रेण ॥

समुद्रफेननिघर्षणवशाज्जङ्घादिगात्रेषु यद् रक्तमण्डलं दूषितरुधिरबिन्दुकमुत्पद्यते तद् द्विजतरोः पलाशवृक्षस्य फलैः शीताम्बुपिष्टैर्लिप्तमात्रं निवर्तत इति ॥२५५॥

सरडरुहिरोल्लगन्धअविडंगजवभूइसुण्ठिलेवेण ॥
विद्दवइ अव्वुदं रविमऊहफिक्कं व हिमखण्डं ॥२५६॥

सरठरुधिरार्द्रगन्धकविडंगयवभूतिशुण्ठीलेपेन ।
विद्रवत्यर्वुदं रविमयूखस्पृष्टमिव हिमखण्डम् ॥

कृकलासस्य रक्तेनार्द्रीकृतं यद् गन्धपाषाणस्य चूर्णं तथा क्रिमिघ्नबीजानि तथा यवक्षारं तथा नागरमेतैर्मिश्रितैः[3] कृतेन लेपेन कठिनः पाकरहितः [4]शोफविकारोऽर्वुदाख्यो व्याधिर्विनश्यति । आशुनिवृत्तावुपमानं स्पष्टमिति ॥२५६॥

सोमदिसासंभूअं विहिगहिअं हरइ लेवमत्तेण ॥
दढगण्ठिगंडमालव्वुआइ उत्तंटईमूलं ॥२५७॥

सोमदिक्संभूतं विधिगृहीतं हरति लेपमात्रेण ।
दृढग्रन्थिगण्डमालार्वुदान्युत्तण्टकीमूलम् ॥

उत्तण्टकी निष्पर्याया । तस्या उत्तराशाभिमुखंप्रवृत्तं मूलं विधिना वनप्रवेशोचितेन संयमेन स्वीकृतं जलपिष्टं लेपमात्रेणैतान् विकारान् विनाशयति । तत्र ग्रन्थिरर्वुदापेक्षया सूक्ष्मः, किन्तु सपाकः, बहूनि गण्डानि गण्डमाला । अर्वुदमुक्तलक्षणमिति ॥२५७॥

१ चिरकालस्थितमपि-ख. । २ णिहसोब्भव-ख. । ३ मर्दितैः-ख. ; ४ श्लेष्मविकारः ! ।

* अत्र 'व्रण' मितिविशेष्यपदं किञ्चित् त्रुटित मिव प्रतिभाति ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अअसिसमीसिद्धत्थअजवमूलअसिग्गुवीअलेवेण ॥
अम्विललतक्कपिट्ठेण गंड़गंढीउ णासन्ति ॥२५८॥

अतसीसमीसिद्धार्थकयवमूलकसिग्रुबीजलेपेन ।
अम्लतक्रपिष्टेन गण्डग्रन्थयो [१]नश्यन्ति ॥

अतसी भङ्गा, शमी पवित्रपत्रा, तथा गौरसर्षपास्तथा यवास्तथा मूलका महाकन्दा स्तथा श्वेतमरिचमेतद्बीजैश्चुक्रगोरसपिष्टैः कृतेन लेपेन गण्डानि ग्रन्थयश्च नश्यन्तीति ॥२५८॥

क्खणमेत्तेण विविज्जइ वणकिणगण्ठी णराण कठिणो वि ॥
णिअजलणिवाहकीडअपिच्छिल्लविलेविओ णिउणं ॥२५९॥

क्षणमात्रेण विलीयते व्रणकिणग्रन्थिर्नराणां कठिनोऽपि ।
निजजलनिवाहकीटकपिच्छिलविलिप्तो निपुणम् ॥

निजजलनिवाहाख्यः कीटोऽर्कशलभ इति प्रसिद्धस्तस्याङ्गादिजं यत् पिच्छिलं सरसं वस्तु तेन अलिप्तो व्रणानां किणस्य रूढव्रणमांसस्योपरि ग्रन्थिः कठिनो विकारस्तत्कालमेव निःशेषं गलतीति ॥२५९॥

उल्लम्बिअणरगीवापासमसी सिसिरसलिलसञ्जुत्ता ॥
पीआ पह्मारं हरइ दुट्ठघरिणिव्व घरसारं ॥२६०॥

उल्लम्बितनरग्रीवापाशमसी शिशिरसलिलसंयुक्ता ।
पीताऽपस्मारं हरति दुष्टगृहिणीव गृहसारम् ॥

उद्बद्धस्य पुंसो ग्रीवापाशस्य पुटपाकदग्धस्य यद् भस्म तच्छीताम्बुना सह पीतमपस्मृतिं विनाशयति । उपमानं गतार्थमिति ॥२६०॥

वरसलिलपिट्ठसेआपराइआमूलणामणं सघअं ॥
भूअग्गहविद्दवणं समरिअमुणिकुसुमसलिलं वा ॥२६१॥

वरसलिलपिष्टश्वेतापराजितामूलनावनं सघृतम् ।
भूतग्रहविद्रावणं समरिचमुनिकुसुमसलिलं वा ॥

तण्डुलोदकपिष्टं श्वेतगिरिकर्णिकामूलं घृतसहितं नस्येनोपयुक्तं भूतानां पिशाचादीनां ग्रहाणामपस्मारादीनां विनाशनम् । अथवा कटुकेन सहागस्त्यतरुपुष्पाणां रस एवमेवोपयुक्त इति ॥२६१॥

---

१ द्रुतं नश्यन्ति–ग. । ׀ निजजन–ख. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

हिंगुवआसिद्धत्थअणिंवदलभुअंगकत्तिणिम्मविओ ॥
मारीमुद्दिअमोक्खं करेइ सिद्धो महाधूवो ॥२६२॥

हिङ्गुवचासिद्धार्थकनिम्बदलभुजंगकृत्तिनिर्मितः ।
[1]मारीमुद्रितमोक्षं करोति सिद्धो महाधूपः ॥

वाह्लीकोग्रगन्धागौरसर्षपपिचुमन्दपत्रसर्पकञ्चुकैः सम्पादित उत्कृष्टो धूपो डाकिन्यधिष्ठितानां मोक्षं ततः परित्यागं करोतीति ॥२६२॥

पक्कं गोजलवसिअं फलं विसालाइ णासणं दिण्णं ॥
णासेइ बह्मरक्खसमण्णां वि गहं सुदुव्वारं ॥२६३॥

पक्वं [2]गोजलोषितं फलं विशालाया नावनं दत्तं ।
नाशयति ब्रह्मराक्षसमन्यानपि गृहान् सुदुर्वारान् ॥

गोमूत्रपर्युषितं पूर्णपाकमिन्द्रवारुणीफलं निष्पीड्य नस्येनोपयुक्तं ब्रह्मराक्षसाख्यं महाग्रहमन्यानप्यपस्मारादीन् दुष्करनिवारणान् महाग्रहान् नाशयतीति ॥२६३॥

मागहिआसेन्धवसुरहिपित्तमहुमरिअरइअमइपअडं ॥
भूअहरमंजणमिणं दुद्धरगहदप्पविद्दवणं ॥२६४॥

मागधिकासैन्धवसुरभिपित्तमधुमरिचरचित[3]मतिप्रकटम् ।
भूतहरमञ्जनमिदं दुर्धरगूहदर्पविद्रावणम् ॥

उपकुल्यासैन्धवलवणगोपित्तक्षौद्रोषणैः सम्पादितं सुलभद्रव्यसाध्यत्वादत्यन्तस्फुटमिदमञ्जनं भूतदोषनाशनं तथा दुर्वारबलानां ब्रह्मराक्षसादिग्रहाणां मदविद्रावणमिति ॥२६४॥

दारुहलद्दिं पूसे पुप्फफलरसेण वट्टिआ रइआ ॥
अंजणगुलिआ गहविन्दवन्दिआ भूअविद्दवणी ॥२६५॥

दारुहरिद्रा पुष्ये पुष्पफलरसेन वर्तिता रचिता ।
अञ्जनगुलिका गूहवृन्दवन्दिता भूतविद्रावणी ॥

दार्वीं पिष्ट्वा कुष्माण्डरसेनालोड्य पुष्यनक्षत्रे सम्पादिताऽञ्जनार्थं गुलिकाऽञ्जनेनोपयुक्ता सर्वदुष्टग्रहै र्भीतैः सद्भिः स्तुता सर्वदुष्टभूतानां चापसारिणी सर्वग्रहभूतनिवारणीत्यर्थः ॥२६५॥

कसणंवरगाढणिवद्धसपुरकाआरिपिच्छधूवेण ॥
रविअरफिक्कोव्व तमो णासइ चातुत्थओ दूरं ॥२६६॥

१ लामामुद्रित-ख. । २ गोजलोत्क्वथितं-ख. । ३ मपि-ख. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कृष्णाम्बर[1]गाढनिबद्धसपुरकाकारिपिच्छधूपेन ।
रविकरस्पृष्टमिव तमो नश्यति चातुर्थको दूरम् ॥

कृष्णकर्पटखण्डे निविडं कृत्वा ग्रथिता ये महिषाक्षसहिताः कौशिकपक्षास्तैः सर्वैं दग्धैर्जनितेन धूपेन चातुर्थकज्वरो नश्यतीति । (तत्कालकार्यकारित्वप्रदर्शनार्थमुपमानमिति) ॥२६६॥

जो पिअइ पूसदिअहे जलपिट्ठं सिअपुणण्णवामूलं ॥
पासेण वि ण हु विअरन्ति तस्स अहिविच्छुआ वरिसं ॥२६७॥

यः पिबति पुष्यदिवसे जलपिष्टं सितपुनर्नवामूलम् ।
पार्श्वेनापि न खलु विचरन्ति तस्याहिवृश्चिका वर्षम् ॥

यस्तिष्यनक्षत्रे तोयसंचूर्णितं श्वेतवर्षाभूमूलं पिबति तस्य संवत्सरं यावत् सर्पवृश्चिकाः समीपेऽपि नगच्छन्तीति ॥२६७॥

जो विणअतणअपडिमं तरच्छुदढदसणविरइअं वहइ ॥
ओजग्गिउं ण तीरइ भीमेहि वि सो भुअंगेहि ॥२६८॥

यो विनतातनयप्रतिमां तरक्षुदृढदशनविरचितां वहति ।
अभिभवितुं न पार्यते भीमैरपि [2]स भुजङ्गैः ॥

यस्तरक्षोः श्वापदविशेषस्य ऋक्षाख्यस्य सम्बन्धिना दृढेन दन्तेन निर्मितां गरुडमूर्त्तिं कण्ठादौ धारयति [3]सोऽतिदारुणैरप्युरगै[4]राक्रमितुं न शक्यत इति ॥२६८॥

छम्मासमही ण डसइ पूसे पीएण गरुडिमूलेण ॥
अह डसइ कह वि पुरुसं ता मरइ खणद्धमत्तेण ॥२६९॥

षण्मासानहिर्नदशति पुष्ये पीतेन गरुडीमूलेन ।
अथ दशति कथमपि पुरुषं तन्म्रियते क्षणार्धमात्रेण ॥

गरुडी रक्तपुष्पा पुनर्नवा तन्मूलेन [5]जलपिष्टेन पीतेन मासषट्कं सर्पः पुरुषं न दशति । यदि वा कथंचिद् दशति तदासौ सर्पस्तत्कालमेव म्रियत इति ॥२६९॥

पाणंजणलेवणणावणेहि तंव्विअ विसं समुद्धसइ ॥
दट्ठस्स गरुडिमूलं जइ घट्टमसामलं होइ ॥२७०॥

पानाञ्जनलेपननावनैस्तदेव विषं समुद्ध्वंसयति ।
दष्टस्य गरुडीमूलं यदि घृष्टमश्यामलं भवति ॥

---

१ दृढग्रन्थित–ख. । २ विषभुजङ्गैः–ख. । ३ समयति–ख. । ४ राक्रमयितुं–ख. । ५ जलपिष्टपीतेन–ख. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तदेव गरुड्याः पुनर्नवाया मूलं पानाञ्जनलेपननस्यैः प्रयुक्तं दष्टस्य विषमशेषं नाशयति, यदि तन्मूलं घृष्टं सत् कृष्णवर्णं न भवति । श्वेतवर्णं तत् कार्यं करोतीत्यर्थः ॥२७०॥

लित्तकरो वद्धेण व लज्जालुमूलेण णिअसरीरम्मि ॥
उग्गाहेइ भुअंगं गरुडोव्व णरो णिरासंको ॥२७१॥

लिप्तकरो बद्धेण वा लज्जालुमूलेन निजशरीरे ।
उद्ग्राहयति भुजङ्गान् गरुड इव नरो निराशङ्कः ॥

लज्जालुः समङ्गा, तन्मूलेन जलपिष्टेन लिप्तहस्तोऽथवा तेनैव बाह्वादिशरीरैकदेशबद्धेन वैनतेय इव निर्भयः [1]सर्पान् निगृह्णातीति ॥२७१॥

अक्कजडावक्कलमसिणचुण्णमइसिसिरसलिलसंजुत्तं ॥
पीअमहिकणअगोणसहआरिअविसाण विद्दवणं ॥२७२॥

अर्कजटावल्कलमसृणचूर्णमतिशिशिरसलिलसंयुक्तम् ।
पीतमहिकनकगोनासहयारिजविषाणां विद्रावणम् ॥

रूपिकामूलस्य त्वचं सूक्ष्मचूर्णीकृतमतिशीतलजलसहितं पिष्टं सत् पानेनोपयुक्तं सर्पधत्तूर-मण्डलिकरवीरजानां विषाणां विनाशनमिति ॥२७२॥

तुससलिलमसिणवट्टिअकाअणिआमूलपाणलेवेण ॥
अवसरइ मण्डलिविसं मारुअविहुअं व घणविन्दं ॥२७३॥

तुषसलिलमसृणवर्तितकाकणिकामूलपानलेपेन ।
अपसरति मण्डलिविषं मारुतविधूतमिव घनवृन्दम्॥

काञ्जिकेन सूक्ष्मपिष्टेन गुञ्जामूलेन तेनैव[2] सह पानेन लेपेन चोपयुक्तेन गोनासविषमप-गच्छति वायुनिर्धूतमभ्रजालं यथेति ॥२७३॥

तण्डुलजलेण पिट्ठा पीआ घअमीसिआ समुद्धसइ ॥
घणणाअजडा णिम्मिअगरलमइ गरुअवेअं पि ॥२७४॥

तण्डुलजलेन पिष्टा पीता घृतमिश्रिता समुद्ध्वंसयति ।
घननादजटा निर्मितगरलमतिगुरुकवेगमपि ॥

तण्डुलीयकमूलं तण्डुलधावनसंचूर्णितं गोघृतेन सह पीतं सद् निर्मितं कृत्रिमं विषं तीव्रदर्प-मप्यपसारयतीति ॥२७४॥

---

१ सर्पादि गृह्णातीति–ख. । २ तेनैव–काञ्जिकेनैव ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

लज्जालुईइ मूलं णीलीमूलं व तण्डुलजलेण ॥
मण्डलिविसमइविसमं पि पीअमत्तं णिवारेइ ॥२७५॥

लज्जालुक्या मूलं नीलीमूलं वा तण्डुलजलेन ।
मण्डलिविषमतिविषममपि पीतमात्रं निवारयति ॥

समङ्गाया मूलं तण्डुलोदकेन पिष्ट्वा तेनैव सह पीतं सद् घोरतरमपि गोनासविषं तत्कालमेव नाशयति । अथवा नीलीमूलमेवमेवोपयुक्तमिति ॥२७५॥

सगुडं कोहलअरसं कमेण दुद्धं च सक्करासहिअं ॥
पीअमवहरइ मोहं कोद्दवधुद्दूरअप्पभवं ॥२७६॥

सगुडः कोहलकरसः क्रमेण दुग्धं च शर्करासहितम् ।
पीतमपहरति मोहं कोद्रवधत्तूरकप्रभवम् ॥

कुष्माण्डकरसो गुडसहितः पीतः कोरदूषकभोजनजनितं [1]मोहं नाशयति । तथा गोक्षीरं शर्करासंयुक्तं (पीतं सत्) मातुलप्रभवं मोहं नाशयतीति ॥२७६॥

गरुओ वि पोप्फलमओ जणिउब्भडपुलअसेअमइमोहो ॥
उवसमइ झत्ति सीअलजलेण चुलुएहि पीएण ॥२७७॥

गुरुकोपि पूगफलमदो जनितोद्भटपुलकस्वेदमतिमोहः ।
उपशाम्यति झगिति शीतलजलेन चुलुकैः पीतेन ॥

पूगफलेनोद्वेगेन महानपि कृतो मदः स्वेदरोमाञ्चबुद्धिभ्रमसहितः शिशिरोदकेन चुलुकैः पीतेन झगिति निवर्तत इति ॥२७७॥

अवहत्थिअमुहणीसरिअपउरलालाजलो समवसरइ ॥
पुरुसाण पुप्फलमओ जिग्घाए अटविहारे व ॥२७८॥

अपहस्तितमुखनिस्सृतप्रचुरलालाजलः समपसरति ।
पुरुषाणां पूगफलमदो घ्रातेऽटवीशुष्कगोमये वा ॥

अथवा पूगफलमदः पुंसामरण्यगोशकृच्छकले घ्राते सति निवर्तते । कीदृशः सन् — द्रव्यबलान्निवारित आस्यान्निष्क्रान्तो बहलः श्लेष्मनिःस्यन्दो यत्र स तथाविध इति ॥२७८॥

घअसक्करावलेहं पढमे काऊण पिअइ जो पच्छा ॥
उद्दाममणहरं पि हु तस्स ण मज्जं मअं कुणइ ॥२७९॥

---

१ मदं ! ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

घृतशर्करावलेहं प्रथमं कृत्वा पिबति यः पश्चात् ।
उद्दाममनोहरमपि खलु तस्य न मद्यं मदं कुरुते ॥

यो गोघृतमत्स्यण्डिकाभ्यामादाववलेहमुपयुज्य पश्चादुद्दामं बहु प्रगल्भवीर्यं वा मनोहरं हृद्यमपि मधु पिबति तस्य तन्मद्यं चित्तविकारं न जनयतीति ॥२७६॥

कसणंकोलजडाकाढओ व चुण्णो व तीणि दिअहाइ ॥
अवहरइ गरविसं दुज्जअं पि पीओ पअत्तेण ॥२८०॥

कृष्णांकोल्लजटाकाथो वा चूर्णं वा त्रीणि दिवसानि ।
अपहरति गरविषं दुर्जयमपि [1]पीतं प्रयत्नेन ॥

कृष्णस्येरिकिल्लस्य [2]मूलकाथचूर्णयोरेकतरो दिनत्रयमुपयुक्तः सन् सप्रयत्नं [3]दुस्तरमपि कृत्रिमविषं विनाशयतीति ॥२८०॥

[4]घुसिणसिलाभण्डिकरंजवीअकुट्ठेहि होइ संकामो ॥
अइविसमस्स वि विच्छुअवड्ढन्तविसवेअदुक्खस्स ॥२८१॥

कुङ्कुमशिलाभण्टिकरंजबीजकुष्ठैर्भवति संक्रामः ।
अतिविषमस्यापि वृश्चिकवर्धमानविषवेगदुःखस्य ॥

अरुणमनःशिलाशिरीषनक्तमालबीजवाप्यैस्तुल्यांशैः पानीयेन कृतया गुलिकया दंशस्थाने [5]गात्रं व्यवधाय केनचित् तृणादिना न्यस्तया वृश्चिकसंबन्धिनो वर्धमानविषदंशक्लेशस्य दुःसहस्यापि तत्र सङ्क्रामो भवति, दष्टः स्वास्थ्यं गच्छति । अतश्चहस्तेन निरन्तरतया सा तत्र न देयेति ॥२८१॥

[6]ओदारेइ अहोणीअमुद्धमारोविअं विवड्ढेइ ॥
डंकस्स विच्छुअविसं विहिणा वणमञ्जुआमूलं ॥२८२॥

अवतारयत्यधोनीतमूर्ध्वमारोपितं [7]विवर्धयति ।
दंशस्य वृश्चिकविषं विधिना वनमञ्जुकामूलम् ॥

वनमञ्जुकामूलं वनसुरसामूलं [8]गात्रश्लेषणरूपेण विधानेन दंशस्याधस्तान्नीतं तद्विषं ह्रासयति, ऊर्ध्वनीतं सदधिकीकरोतीति ॥२८२॥

माअंगमलुब्भवपुंडरीअवहुआरपक्कफलरइआ ॥
विच्छुअविससंकामं करेइ तिणसंठिआ गुलिआ ॥२८३॥

---

१ पीतः-ख. । २ मूलक्काथचूर्णाभ्यामेकतरो-ख. । ३ दुष्करमपि-ख. । ४ घुसूण-ख. । ५ गात्र-व्यवधायकेन (केन) चित्-ख. । ६ ओवारेइ-ख. । ७ वर्धयति-ख. । ८ गात्रश्लेष्माण-ख. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मातङ्गमलोद्भवपुण्डरीकवहुवार[1]पक्कफलरचिता ।
वृश्चिकविषसंक्रामं करोति तृणसंस्थिता गुलिका ॥

हस्तिशकृज्जातेन पद्माकारेण सिरट्टिकेति प्रसिद्धेन कंदप्रायेण द्रव्येण तथा वहुवारस्य श्लेष्मांतकवरोः पक्कफलेनेति द्वाभ्यां निर्मिता पिण्डी तृणादिना दंशे श्लेषिता दंशाद् वृश्चिकविषमाकृष्य तत्र तृणादौ सङ्क्रामयति । अतश्च हस्तेन साक्षान्न समर्पणीयेति ॥२८३॥

घुसिणसिला[2]अलकोसुम्भसहिअकुरविल्लपिसिअणिम्मविआ ।
रविसलहभवणगोहापुरीसरूविअरसुम्मीसा ॥
गुलिआ समत्थविच्छुअविसवेअं सअललोअपच्चक्खं ।
संकामेइ जहिच्छं धुत्ताहिवजणिअमाहप्पा ॥२८४–२८५॥

कुङ्कुमशिलालकुसुम्भसहितकुरुविल्लपिशितनिर्मिता ।
रविशलभभवनगोधापुरीषरूपिकरसोन्मिश्रा ॥
गुलिका समस्तवृश्चिकविषवेगं सकललोकप्रत्यक्षम् ।
संक्रामयति यथेच्छं धूर्ताधिपज्ञातमाहात्म्या ॥

कुङ्कुममरुणं शिला मनःशिला, अलं हरितालं कुसुम्भं महारजनम्[3], एतैः सहितं कर्कटमांसं तथा रविशलभोऽर्कतिपिडकाख्यः कीटः, तथा गृहगोधायाः कुड्यमत्स्याख्यस्य प्राणिनः शकृद् एतानि सर्वाणि समांशानि अर्कक्षीरेण समालोड्य कृता गुलिका सर्ववृश्चिकविषवेगं यथारुचि सर्वजनसमक्षं संक्रामयति । दृष्टादन्यत्रादृष्टेपि निवेशयति । एषा च [4]नागरेन्द्रेण मूलदेवेन विदितप्रभावेति । युगलकम् ॥२८४—२८५॥

विच्छुअडट्ठस्स स्सेअसलिलरोमंचवेविअठवाही ॥
णासेइ पीअमत्तं घअमुण्हं सेन्धउम्मीसं ॥२८६॥

वृश्चिकदष्टस्य स्वेदसलिलरोमाञ्चवेपितव्याधीन् ।
नाशयति पीतमात्रं घृतमुष्णं सैन्धवोन्मिश्रम् ॥

उष्णं गव्यं सर्पिः सैन्धवलवणेनाष्टमभागमात्रेण संयुक्तं पानेनोपयुक्तं वृश्चिकदष्टस्य विषविकारान् शमयति । कीदृशान्— घर्माम्बुलोमहर्षणकम्पैः सह ये वर्तन्ते तानिति ॥२८६॥

खज्जूरअडंकोवरि पईवतेल्लं विईण्णमवहरइ ॥
घोरं पि विसमसेसं चिन्ताहारो व्व लावण्णं ॥२८७॥

---

१ फलपक्क (पक्क) विरचिता-ख. । २ ताल-ख. । ३ महारजतम्-ख. । ४ नरेन्द्रराबेन-ख. । नागरराजेन ? ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

खर्जूरकदंशोपरि प्रदीपतैलं वितीर्णमपहरति ।
घोरमपि विषमशेषं चिन्ताभार इव लावण्यम् ॥

खर्जूरकः शतपदीति प्रसिद्धः प्राणी, तेन कृतस्य दंशस्य पृष्ठे दत्तं प्रद्योतकतैलं विषममपि विषं समस्तं विनाशयति शोकावेशो यथा सौन्दर्यमिति ॥२८७॥

गुग्गुलुधूए धरिए रत्तिकडंकम्मि जाव पस्सेओ ॥
रुविअकिसलअपिंडी सघआ वद्धा विसं हरइ ॥२८८॥

गुग्गुलुधूपे धृते रात्रिकदंशे यावत् प्रस्वेदः ।
रूपिककिसलयपिण्डी सघृता बद्धा विषं हरति ॥

रात्रिकः प्राणी उच्चिटङ्ग इति प्रसिद्धः । तत्कृते दंशे महिषाक्षं तावद् धूपयेद् यावत् तत्र स्वेदो भवेत् । पश्चादर्कप्रवालान् पिष्ट्वा कृता पिण्डिका सघृता तत्र दंशे वस्त्रादिना बद्धा रात्रिकविषं विनाशयतीति ॥२८८॥

पुणरुत्तसुरसासरसभाविअहरिआलकुवलअसिलाहि ॥
विसमं वि मूषिअविसं णासइ पाणेण दिण्णाहि ॥२८९॥

पुनरुक्तसुरसास्वरसभावितहरितालकुवलयशिलाभिः ।
विषममपि मूषिकविषं नश्यति पानेन दत्ताभिः ॥

पुनःपुनः सुरसाया मञ्जुकायाः पीडिताया निस्यन्देन दत्तभावनाभिरलकुष्ठमनःशिलाभि[1]र्जलेन सह पानेनोपयुक्ताभिर्घोरमप्युन्दुरुविषं विनश्यतीति ॥२८९॥

मूसिअविसमविसाउरणामग्गहणेण उद्धरेऊण ॥
जा खिप्पइ वडुफुलिआ ता तस्स विसं समोसरइ ॥२९०॥

मूषिकविषमविषातुरनामग्रहणेनोद्धृत्य ।
यावत् क्षिप्यते वटुफुल्लिका तावत् तस्य विषं समपसरति ॥

उन्दुरुदंशसंक्रान्तेन विषेण व्यथितस्य संज्ञां गृहीत्वोन्मूलिता वटुफुल्लिका निष्पर्याया यावद् दूरे पर्यस्यतेऽमुकस्य मूषिकविषं नश्यत्वित्युक्त्वा तावत् तत्कालमेव तस्य विषं निवर्तत इति ॥२९०॥

कडुएल्लकेससत्तुअधूविअडंकस्स णासइ खणेण ॥
अंकोल्लपत्तधूविअडंकस्स व मच्छविसविअणा ॥२९१॥

कटुतैलकेशसक्तुकधूपितदंशस्य नश्यति क्षणेन ।
अंकोल्लपत्रधूपितदंशस्य वा मत्स्यविषवेदना ॥

१ र्जलेन प्रयुक्ताभिः–ख. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सर्षपतैलनरबालयवसक्तुभिर्दत्तधूपः शृङ्गिमत्स्यदंशो यस्य तस्य पुरुषस्य तत्कृता व्यथा तत्कालमेव प्रशाम्यति । अथवेरिकिल्लस्य पल्लवैर्धूपितो दंशो यस्य तस्यापि शृङ्गिमत्स्यविषवेदना तथैव नश्यतीति ॥२६१॥

उण्होअअमसिणणिहट्टणाविअं हरइ विसमवेअं वि ॥
गोहेरअडंकविसं मूलमहिंसाइ णिमिसेण ॥२६२॥

उष्णोदकमसृणनिघृष्टनावनीकृतं हरति विषमवेगमपि ।
गोधेरकदंशविषं मूलमहिंसाया निमेषेण ॥

अहिंसाया गृध्रनख्या मूलमुष्णजलेन पिष्ट्वा तेनैव सह नस्यीकृतं सद् गोधेरकस्य प्राणिविशेषस्य आग्वाहुसंज्ञया प्रसिद्धस्य संबन्धिना दंशेन संक्रान्तं विषं क्षणेन नश्यतीति ॥२६२॥

घअमीसिअचिक्कसपिंडी सेअविहिणा वणाहि अवणेइ ॥
सिंगिअमच्छअविअणं मअंककन्तिब्व गोसग्गे ॥२६३॥

घृतमिश्रितचिक्कसपिण्डी स्वेदविधिना व्रणादपनयति ।
शृंगिमत्स्यकवेदनां मृगाङ्कक्रान्तिरिव निशान्ते ॥

गोघृतेन मिश्रिता [1]ईषद्भृष्टयवचूर्णपिण्डी कर्त्री स्वेदविधिना शृङ्गाख्यमीनदंशसंक्रान्तविषव्यथा व्रणादपसारयति । [2]यथैव रात्र्यवसाने ज्योत्स्नेतिॐ ॥२६३॥

डंकम्मि लोहघट्टे उद्धरिए कंटए व डंकाहि ॥
णासइ वरडीइ विसं दिराणे व फणिज्जअरसम्मि ॥२६४॥

दंशे लोहघृष्टे उद्धृते कण्टके वा दंशात् ।
नश्यति वरट्या विषं दत्ते वा फणिज्जकरसे ॥

शस्त्रेण कृतनिर्घर्षणे दंशस्थाने । अथवा दंशस्थानात् क्षामोदरीकण्टके आकृष्टे तद्विषं नश्यति । अथवा फणिज्जकस्य मरुवकस्य [3]कुवेरकस्य वा रसे दत्ते सति तद्विषं नश्यतीति ॥२६४॥

लेओ मिरिअमहोसहकेसरकुडिलेहि मच्छिआगरलं ॥
णासेइ घउम्मीसिअसअपुप्फासेन्धअकओ व ॥२६५॥

लेपो मरिचमहौषधकेसरकुटिलै मक्षिकागरलम् ।
नाशयति घृतोन्मिश्रितशतपुष्पासैन्धवकृतो वा ॥

[4]ऊषणनागरनागकेसरतगरै र्जत्नवर्तितैः समांशैः कृतो लेपो मक्षिकाणां सरघाणां सम्बन्धि विषं नाशयति । अथवा गोघृतेन मिश्रितया मिस्या सैन्धवलवणयुक्तया कृतो लेप एवं करोतीति ॥२६५॥

---

१ ईषद्भृष्ट(?) । २ अथवा–ख. । ॐ यथैव रात्र्यवसाने ज्योत्स्नाऽपसरति तथेत्यर्थात् अथवा निशातम इति पठित्वा रात्र्यन्धतमसमिति व्याख्येयमिति । ३ कठिन (ल्ल)कस्य–ख. । ४ । नागरऊषण–ख. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कुलिसतरुदुद्धवट्टिअसिरीसवीएहि लित्तमुपसमइ ॥
दद्दुरविसमइसअदारुणं वि सलिलेण जलणोव्व ॥२६६॥

कुलिशतरुदुग्धवर्तितशिरीषबीजैर्लिप्तमुपशाम्यति ।
दर्दुरविषमतिशयदारुणमपि सलिलेन ज्वलन इव ॥

सुधावृक्षस्य क्षीरेण पिष्टैः शुकतरुबीजैः कृतेन लेपेन लिप्तं मण्डूकविषं घोरमपि विनश्यति। व्यक्तमुपमानमिति ॥२६६॥

हरवल्लहरसुम्मीसिअदुद्धसमगुडघआण पलजुअलं ॥
उम्मत्तसुणअविसमविसवेअणं हरइ पाणेण ॥२६७॥

[1]हरवल्लभरसोन्मिश्रितदुग्धसम[2]गुडघृतयोः पलयुगलम् ।
उन्मत्तश्वविषमविषवेदनां हरति पानेन ॥

मातुलस्वरससहितेन क्षीरेण तुल्यांशयो घृतगुडयोः पलद्वयम्। एवमुक्तं भवति चतुर्णां द्रव्याणां प्रत्येकमर्धपलमेकत्र पलद्वयं पानेनोपयुक्तमलर्क[3]दशनसंक्रान्तां [4]घोरामपि विषव्यथां निवारयतीति ॥२६७॥

काउम्बरिआमूलं हरदइअफलाइ तंडुलजलेण ॥
समवीआइ व पीआइ कविलविसदोससमणाइ ॥२६८॥

काकोदुम्बरिकामूलं हरदयितफलानि तण्डुलजलेन ।
समबीजानि वा पीतानि कपिलविषदोषशमनानि ॥

*काकोदुम्बरिका फल्गूस्तस्या मूलं तण्डुलधावनेन सह पिष्ट्वा पीतं श्वदंशविषदोषं शमयति। अथवा हरदयितो मातुलस्तस्य फलानि असनतरुमूलतुल्यांशानि तेनैव तण्डुलजलेन युक्तानि पीतान्युक्तकार्यं कुर्वन्तीति ॥२६८॥

जलवट्टिआइ गोइब्भिआइ महुमीसिआइ कअलेओ ॥
णीसेसजीअसंभअणहदंतविसं खअं णेइ ॥२६९॥

जलवर्तितया गोजिह्विकया मधुमिश्रितया कृतो लेपः।
निःशेषजीवसंभवनखदन्तविषं क्षयं नयति ॥

गोजिह्विकया गोधूमिकया पानीयपिष्टया माक्षिकेण सहितया कृतो लेपः सर्वेषां विषवतां प्राणिनां नखदशनसमुद्भवं विषं क्षपयतीति ॥२६९॥

---

१ हरवल्लभस्वरसोन्मिश्र-ख. । २ गुडघृतानां-ख. । ३ दंशसंक्रान्तां-ख. । ४ घोरामपि व्यथां-ख. ।

* काकोदुम्बरिकेत्यादि प्रथमचरणांशोऽयं मूलपुस्तकवर्तिव्याख्यायां नोपलभ्यते ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

णिम्बसमीवडवक्कलकाढिअसलिलेण लित्तमुवसमइ ॥
णहदंतविसं गरुअं दारुणिसारअणिलित्तं व ॥३००॥

निम्बशमीवटवल्कलकथितसलिलेन लिप्तमुपशाम्यति ।
नखदन्तविषं गुरुकं दारुनिशारजनीलिप्तं वा ॥

पिचुमन्दपवित्रपत्रन्यग्रोधत्वग्भिस्तुल्याभिः कथितेन सलिलेन लिप्तं घोरमपि पूर्ववत् नखदन्तजं विषं विनश्यति । अथवा दार्वीपिण्डहरिद्राभ्यां लिप्तमेवं भवतीति ॥३००॥

पत्तंगणिसाकेसरमंजिट्ठारअणिलेविआ लूआ ॥
उवसमइ इंगुइतरुवक्कललेवेण गण्डं व्व ॥३०१॥

पत्रांगनिशाकेसरमंजिष्ठारजनीलेपिता लूता ।
उपशाम्यतीङ्गुदीतरुवल्कललेपेन गण्डमिव ॥

पत्राङ्गं पटुरङ्गद्रव्यं प्रसिद्धं तथा पिण्डहरिद्रा तथा नागकेसरं तथा मञ्जिष्ठा चित्रवल्ली तथा दार्वीत्येताभिर्जलपिष्टाभिर्दत्तलेपा लूता विनश्यति । यथेङ्गुदीवृक्षस्य तिल्वकस्य त्वचा जलपिष्टया लिप्तं गण्डं पिटकविशेष उपशाम्यतीत्युपमानद्वारेण द्वितीयः प्रयोग इति । तत्र लूता सूर्यकिरणमध्यसञ्चारिदुर्लक्ष्यप्राणिरूपा दंशविशेषानुमेया । आयुर्वेदात् तस्या लक्षणादि ज्ञेयमिति ॥३०१॥

मूलेहि व वीएहि व कंजिअपिट्ठेहि लित्तमुवसमइ ॥
कीडविडआदि दुट्ठं लम्बासुरआलिहलिणीणं ॥३०२॥

मूलैर्वा बीजैर्वा काञ्जिकपिष्टै र्लिप्तमुपशाम्यति ।
कीटपिटकादि दुष्टं लम्बासुरतालीहलिनीनाम् ॥

तिक्तालावुदेवतालीलाङ्गलीनामेकतमाया मूलैः फलैर्वाऽऽरनालसंचूर्णितैर्दत्तलेपस्य शरीरकीटपिटकादित्वग्दोषो विनश्यति । कीटा गुल्माकाराः । येषां लोहितोपगानां पाकेन विनापि श्वेतं कठिनं च मुखं दृश्यते ते पिटकाः प्रसिद्धा विकारा इति ॥३०२॥

तिलसरिसवमीसकरंजवीअलेवेण सअलपिडआणं ॥
तरुणफलदन्तिणीहिव भिज्जइ पसरो विलित्ताणं ॥३०३॥

तिलसर्षपमिश्रकरञ्जबीजलेपेन सकलपिटकानाम् ।
तरुणफलदन्तिनीभिर्वा भिद्यते प्रसरो विलिप्तानाम् ॥

तिलसिद्धार्थकचूर्णमिश्रैः करञ्जस्य नक्तमालस्य बीजैः पानीयपिष्टैः कृतेन लेपेन येकेचित्

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पिटकभेदाः शरीरे सम्भवन्ति तेषां [1]प्रसृतिर्निवर्तते । अथवा तरुणस्यैरण्डस्य [2]फलैस्तथा दन्तिन्या निकुम्भेनेत्येताभ्यां कृतलेपाभ्यामेतत् कार्यं भवतीति ॥३०३॥

जालागद्दहविअणं हरन्ति जलवट्टिआइ सघआइ ॥
णीलीतण्डुलमूलाइ णूणमुवलेवमत्तेण ॥३०४॥

ज्वालागर्दभवेदनां हरन्ति जलवर्तितानि सघृतानि ।
नीलीतण्डुलमूलानि नूनमुपलेपमात्रेण ॥

नीलिन्या मेघनादस्य च मूलानि तोयपिष्टानि घृतेन सहितानि लेपादेव निश्चितं ज्वालागर्दभाख्यस्य व्याधेः संबन्धिनीं व्यथां शमयन्ति । यस्य च लक्षणं पठन्ति—

"दोषैः पित्तोल्वणै र्मन्दैर्विसर्पति विसर्पवत् ।
शोथैः पाकै स्तनुस्ताम्रो ज्वरकृज्ज्वालगर्दभः ॥"

ज्वालागर्दभो जालगर्दभ इति द्विविधाऽस्य संज्ञा श्रूयत इति ॥३०४॥

गोइब्भिआइ मूलं अहवा उत्तण्डअस्स विहिगहिअं ॥
तण्डुलजलेण दिण्णं सीअलिआणिवारणं कुणइ ॥३०५॥

गोजिह्विकाया मूलमथवोत्तण्डकस्य विधिगृहीतम् ।
तण्डुलजलेन दत्तं शीतलिकानिवारणं करोति ॥

गोजिह्विका व्याख्याता[3] । तस्या मूलं ज्येष्ठोदकेन पिष्टं तेनैव सह पीतं सत् शीतलिकाव्याधेर्विस्फोटाख्यस्य विनाशं सम्पादयति । अथवोत्तण्डस्य पुनर्नवाया [4]मूलं विधिगृहीतमेवमेवोपयुक्तमुक्तकार्यं करोति । सर्वौषधीनां ग्रहणे विधिर्नियमविशेषो ग्रन्थसमाप्तौ वक्ष्यत इति ॥३०५॥

उपसग्गम्मि पअट्टे रअणी चिंचादलेहि सञ्जुत्ता ॥
सिसिरजलपिट्ठपीआ करेइ सीअलिअपडिसेहं ॥३०६

उपसर्गे प्रवृत्ते रजनी चिञ्चादलैः संयुक्ता ।
शिशिरजलपिष्टपीता करोति शीतलिकाप्रतिषेधम् ॥

पिण्डहरिद्राऽम्लिकादलैः सह शीतलजलेन संचूर्णिता तेनैव सह पीता पूर्वगाथोक्तस्य व्याधेः प्रसरनिरोधं करोति । कदा— उपसर्गे दैविक उपद्रवे बाहुल्येन प्रवृत्ते सति । उपसर्गजस्य शीतलिकादोषस्य निवर्तनेऽयं प्रयोग इति ॥३०६॥

जत्तिअमत्ता अङ्गे सीअलिआ तत्तिएहि पण्णेहि ॥
छिण्णेहि सेलुतरुणो आउरणामेण णासन्ति ॥३०७॥

---

१ प्रसूति–ख. । २ फलेन तथा–ख. । ३ ख्याता गोधूमिकेति । ४ मूलमेवमेवमुक्तकार्यकरम्–ख. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

यावन्मात्रा अङ्गे शीतलिकास्तावद्भिः पर्णैः ।
छिन्नैः श्लेष्मातकतरोरातुरनाम्ना नश्यन्ति ॥

यावन्मात्राः संख्यया यावत्य आतुरस्य गात्रे शीतलिका उत्पत्त्यवसरे दृश्यन्ते तावत्संख्यैरेव श्लेष्मांतकवृक्षस्य दलैर्देवदत्तस्य शीतलिका नश्यन्त्विति [1]आतुरनामग्रहणेन त्रोटितैस्ता निवर्तन्त इति ॥३०७॥

अन्तोसीअलिआसमुब्भवे गरुए वि देहसन्दावे ॥
परिवसिअसलिलपाणं महुमिसिअं णिव्वइं कुणइ ॥३०८॥

अन्तः शीतलिकासमुद्भवे गुरुकेपि देहसन्तापे ।
पर्युषितसलिलपानं मधुमिश्रं निर्वृतिं कुरुते ॥

रात्रिपर्युषितस्य माक्षिकसंयुक्तस्य तोयस्य पानं शीतलिकाजनितं शरीरस्यान्तर्दाहं शमयतीति ॥३०८॥

महिलाण तक्खणंविअ थक्कइ रुहिरं सिरम्मि विणिहित्ते ॥
जलकलसे दुद्धेण व पीए चक्कंकमूलम्मि ॥३०९॥

महिलानां तत्क्षणमेव स्थगति रुधिरं शिरसि विनिहिते ।
जलकलशे दुग्धेन वा पीते चक्राङ्कामूले ॥

स्त्रीणामतिप्रवृत्तं रक्तं प्रदराख्यो व्याधिस्तत्कालमेव निरुध्यते । कदा— शीतलसलिलपूर्णे कलशे मस्तकन्यस्ते सति । अथवा गोक्षीरेण सह सुदर्शनामूले पीते सतीति ॥३०९॥

कुसवडिआलअमूलाइ पीअमत्ताइ तंडुलजलेण ॥
महिलाण महारुहिरं धारेन्ति कअलीफलाइ व ॥३१०॥

कुशवाट्यालक[2]मूलानि पीतमात्राणि तण्डुलजलेन ।
महिलानां महारुधिरं धारयन्ति कदलीफलानि वा ॥

स्त्रीणामतिरजः कुशानां दर्भाणां तथा वाट्यालकस्य बलाया मूलानि समांशानि वरजलेन पिष्ट्वा पीतान्येव [3]निरुन्धन्ति । अथवा रम्भायाः फलं मोचाख्यं घृतेन सह पीतमेतत् कार्यं करोतीति ॥३१०॥

तंडुलसलिलेण बला पुराणगुड़विरइआ व वअराली ॥
महिलाण महारुहिरं वि पीअमत्ता णिवारेइ ॥३११॥

---

१ आतुरनामग्रहणोद्धितैः–ख. । २ तरुमूलानि–ख. । ३ निरोधयन्ति–ख. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तण्डुलसलिलेन वला पुराणगुडविरचिता वा वदराली ।
महिलानां महारुधिरमपि पीतमात्रा निवारयति ॥

ज्येष्ठजलेन पिष्टा तेनैव सह पीता वला [१]रिष्या ? महारुधिरं घोरमपि प्रदरं स्त्रीणां निवारयति । अथवा वदरचूर्णं जीर्णगुडसममात्रं ज्येष्ठजलपीतमुक्तकार्यकरमिति ॥३११॥

दुद्धेण बलामूलं घणरवमूलाइ तण्डुलजलेण ॥
महुमीसिअमेकेक्कं पीअं पअरं समं णेइ ॥३१२॥

दुग्धेन वलामूलं घनरवमूलानि तण्डुलजलेन ।
मधुमिश्रितमेकैकं पीतं प्रदरं शमं नयति ॥

वलाया भद्रोदन्या मूलं गोक्षीरेण पिष्टपीतं मधुसंयुक्तं प्रदरमतिरजः शमयति । अथवा ॐलोहितशालीस्य?स्य मूलानि ज्येष्ठोदकेनैव पीतानि माक्षिकसहितान्येवोक्तं कार्यं कुर्वन्तीति ॥३१२॥

पिट्ठं च रत्तसालीण दुद्धसिद्धं सुसीअलं समहु ॥
पीअमवहरइ पअरं सिवचिन्ता पापणिवहंव्व ॥३१३॥

पिष्टं च रक्तशालीनां दुग्धसिद्धं सुशीतलं समधु ।
पीतमपहरति प्रदरं शिवचिन्ता पापनिवहमिव ॥

रक्तशालीनां लोहितशालीनां शालिविशेषाणां सम्बन्धि पिष्टं तण्डुलचूर्णं गोक्षीरेण सह [२]क्षीरणीवत् पक्वं पश्चात् सिद्धं शीतं माक्षिकेण सहोपयुक्तमतिरजः शमयति । यथा महेश्वरस्मरणं किल्विषसमूहमिति ॥३१३॥

लक्खा घअसक्कढिआ पीआ दुद्धेण हरइ महिलाण ॥
मोरअरसो व सीसे अण्णाअणिप्पीडिओ पअरं ॥३१४॥

लाक्षा घृतसकथिता पीता दुग्धेन हरति महिलानाम् ।
मयूरकरसो वा शीर्षेऽज्ञातनिष्पीडितः प्रदरम् ॥

लाक्षा तरुव्याधिः पूर्वं घृतेन क्वथिता पश्चाद् दुग्धेन पिष्टपीता स्त्रीणामतिरजः शमयति । अथवाऽपामार्गस्यागृहीतसंज्ञस्यैवातुरशिरसि निष्पीडितस्य रस उक्तकार्यं करोतीति ॥

चुण्णं तिअडुअदिअलट्ठिआण तिलक्कढिअपीअमवहरइ ॥
विसमं वि रत्तगुम्मं कुसुमणिरोहं च तरुणीणं ॥३१५॥

चूर्णं त्रिकटुकद्विजयष्टिकानां तिलक्वथितपीतमपहरति ।
विषममपि रक्तगुल्मं कुसुमनिरोधं च तरुणीनाम् ॥

१ ऋष्या ? । २ क्षीरिणीवत् ? । ॐइदमेतदत्र प्रमादादापतितमिवप्रतिभाति ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

व्योषस्य चूर्णं ब्राह्मणयष्ट्याश्च मूलमेवं चतुर्णां समांशानां चूर्णं तिलक्वथितेन जलेन सह पीतं स्त्रीणां घोरमपि रक्तगुल्मं वातेन गुल्मत्वमापादितं रक्तं तथा कुसुमस्य ऋतुकालजस्य रक्तस्य रोधं स्तम्भं शमयतीति ॥

किण्णकणागुडमअणफलदन्तिजवक्खारतुंबिबीएहि ॥
सकुलिसदुद्धावत्ती जोणिगआ कुसुमसंजणणी ॥३१६॥

किण्वकणागुडमदनफलदन्तियवक्षारतुंबीबीजैः ।
सकुलिशदुग्धा वर्ति र्योनिगता कुसुमसंजननी ॥

किण्वं सुराबीजं तथा पिप्पली तथा गुडस्तथा मदनस्य [1]सुपर्णस्य फलं तथा निकुम्भस्तथा यवशूकस्य पुटपाकदग्धस्य भस्म तथा तिक्तालाबुबीजान्येतानि तुल्यांशानि सुधाक्षीरेण वर्तितानि कृत्वा तैः कृता वर्तिः स्त्रीणां वराङ्गन्यस्ता कुसुमस्यान्तर्भवस्य रजसः प्रवर्तनीति ॥३१६॥

णवणाएसरचुण्णं घएण पाऊण कुसुमदिअहेसु ॥
दुद्धरआ सआ णरसंगमेण णारी सुअं लभइ ॥३१७॥

नवनागकेसरचूर्णं घृतेन पीत्वा कुसुमदिवसेषु ।
दुग्धरता सदा नरसंगमेन नारी सुतं लभते ॥

नवस्य प्रत्यग्रस्य कनकस्य चूर्णं गोघृतेन सहावलेहेन प्रथमर्तुदिनान्युपयुज्य गोक्षीराहारा स्त्रीः पुरुषसंप्रयोगेन पुत्रं लभते । सदेति प्रयोगस्याव्यभिचारार्थं नित्यग्रहणमिति ॥३१७॥

सघअं णाअणविहिणा दिण्णं णासाउडम्मि उदुसमए ॥
वञ्झाणं देइ सुअं लिङ्गङ्किअलक्खणामूलं ॥३१८॥

सघृतं नावनविधिना [2]दत्तं नासापुटे ऋतुसमये ।
बन्ध्याभ्यो (ऽपि) ददाति सुतं लिङ्गाङ्कितलक्ष्मणामूलम् ॥

केनचिद् वस्तुना लिखितेन लिङ्गेनाङ्कितं कृतचिह्नं यल्लक्ष्मणायाः पुत्रजनन्या ओषधेर्मूलं तद् बन्ध्याभ्यो गर्भग्रहणरहिताभ्योऽपि पुत्रजन्म प्रयच्छति । केन प्रकारेण-दक्षिणनासिकाविवरे गोघृतेन सह नस्यविधिना ऋतुसमये पुष्पदिवसेषु प्रयुक्तमिति ॥३१८॥

इक्केण सिहिसिहालक्खणाण मूलेण दुद्धपीएण ॥
गब्भं धरेइ महिला कुसुमवई तीणि दिअहाइ ॥३१९॥

एकेन शिखिशिखालक्ष्मणयोर्मूलेन दुग्धपीतेन ।
गर्भं धारयति महिला कुसुमवती त्रीणि दिवसानि ॥

---

१ सुवर्णस्य-ख. । २ दक्षिण-ख. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मयूरशिखापुत्रजननीमूलयोरेकतरेण गोक्षीरेण सह त्रीणि दिवसानि पिष्टपीतेन पुष्पवती महिला गर्भमवश्यं गृह्णाति । बन्ध्या पतिसंयोगानि ‥ भवतीत्यर्थः ॥३१९॥

कुणइ कुरण्टअमूलं ऋद्धिं गब्भस्स पीअमणुदिअहं ॥
गोहामिसं व कमसो थोअत्थोअं समब्भसिअं ॥३२०॥

करोति कुरण्टकमूलमृद्धिं गर्भस्य पीतमनुदिवसम् ।
गोधामिषं वा क्रमशः स्तोकस्तोकं समभ्यस्तम् ॥

कुरण्टकस्याम्लातकस्य मूलं पानीयेन पिष्टं सत् तेनैव सह प्रतिदिवसं पीतं गर्भस्य ऋद्धिं सम्पूर्णचातुर्वं करोतोति । अथवा गोधा प्राणिविशेषः प्रसिद्धस्तन्मांसं क्रमेणाह्वियमाणमुक्तकार्यं करोतीति॥३२०॥

जलपिट्ठं जोणिगअं धरेइ ण धरेइ जेट्ठजलपीअं ॥
गब्भं जक्खेसदिसाभवमुन्दुरुकण्णिआमूलं ॥३२१॥

जलपिष्टं योनिगतं धारयति नधारयति ज्येष्ठजलपीतम् ।
गर्भं यक्षेशदिग्भवमुन्दुरुकर्णिकामूलम् ॥

उन्दुरुकर्णिकाया मूषिककर्णिकाया उदीचीप्रसूतं मूलं जलेन पिष्टं वराङ्गस्थं सद् गर्भं धारयति स्तम्भयति । तण्डुलधावनेन सह[1] पिष्टपीतं तु गर्भं नधारयति प्रवर्तयतीत्यर्थः ॥३२१॥

जा महुघअमीसपलासबीअलेवं करेइ भअकुहरे ॥
उदुसमए सा महिला ण कआइ वि होइ गब्भवई ॥३२२॥

या मधुघृतमिश्रपलाशबीजलेपं करोति भगकुहरे ।
ऋतुसमये सा महिला न कदाचिदपि भवति गर्भवती ॥

या स्त्री गोघृतक्षौद्राभ्यां सहितेन पलाशतरोः किंशुकस्य बीजानां चूर्णेन योन्यन्तरम् ऋतुकाले लिम्पति, सा न कदाचिदपि गर्भं गृह्णाति । प्रतिऋतुकमेष प्रयोगो न तु सकृदेवेति ॥३२२॥

रइविरमे तेल्लोल्लं गब्भासअवअणविणिहिअं विहिणा ॥
अवहरइ लोणखण्डं गब्भभअं दुट्ठरण्डाण ॥३२३॥

रतिविरामे तैलार्द्रं गर्भाशयवदनविनिहितं विधिना ।
अपहरति लवणखण्डं गर्भभयं दुष्टरण्डानाम् ॥

दुश्शीलविधवानां सैन्धवशकलं तिलतैलाभ्यक्तं गर्भसम्भवजं त्रासं हरति, गर्भं तासां नाशयतीत्यर्थः । किं कृतं सत्— सुरतावसाने गर्भग्रहणीमुखे विधिना तत्रैव सम्यक्समर्पणरूपेण प्रकारेण निक्षिप्तमिति ३२३॥

---

१ जलपिष्टपीतं–ख. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पूसुम्मूलिअहरदइअमूलिअं णिअकडीइ बन्धूण ॥
कामेह कामिणीओ कामेन्ति ण पसविउं जाओ ॥३२४॥

पुष्योन्मूलितहरदयितमूलिकां निजकटौ बद्ध्वा ।
कामयत[1] कामिनीः कामयन्ते न प्रसवितुं याः ॥

तिष्यनक्षत्रोत्खातां मातुलशिफां स्वनितम्बे ग्रथयित्वा रमणी [2]रमयत। कास्ताः— याः प्रसवं नेच्छन्तीति ॥३२४॥

जलकुसुमकन्दतिलसक्कराउ महुमीसिआउ पीआउ ॥
धारेन्ति गब्भपडनं धम्ममई कुगइगमणं व ॥३२५॥

जलकुसुमकन्दतिलशर्करा मधुमिश्रिताः पीताः ।
धारयन्ति गर्भपतनं धर्ममतिः कुगतिगमनमिव ॥

जलकुसुमस्य पद्मस्य कन्दो विसं तथा तिलास्तथा सितशर्करा एतानि समांशानि माक्षिकेण सहोपयुक्तानि गर्भस्य पतनं निरुन्धन्ति । यथा धर्मबुद्धिर्नरकपातमिति ॥३२५॥

धाअइकुसुमसमङ्गाणीलुप्पलसवरकुसुमसारेहि ॥
ण पडइ गब्भो जलसण्ठिआइ दुद्धेण पीएहि ॥३२६॥

धातकीकुसुमसमङ्गा नीलोत्पलशवरकुसुमसारेहि ।
न पतति गर्भो जलसंस्थिताया दुग्धेन पीतैः ॥

आनाभेः पानीयान्तर्गताया गर्भवत्या एतैर्द्रव्यै र्गोक्षीरेण सह पीतै र्गर्भो न पतति न [3]स्रवति। कैर्द्रव्यैः— धातकी मदयन्ती तत्पुष्पैस्तथा [4]लज्जावत्या तथा कुवलयैस्तथा लोध्रैर्गणैतैः समांशै र्माक्षिकेणालोडितैरिति ॥३२६॥

सिअसुरहिकलमतंडुलचुण्णं समसक्करं पिअन्तीइ ॥
उंवरिकन्दकसाएण पडइ गब्भो ण महिलाइ ॥३२७॥

सितसुरभिकलमतण्डुलचूर्णं समशर्करं पिबन्त्याः ।
उदुम्बरीकन्दकषायेण पतति गर्भो न महिलायाः ॥

शुक्लस्य [5]सुगन्धेश्च शालेः पिष्टं सितशर्करया समांशं का ोदुम्बरिकामूलकाथेन सह पिबन्त्या नार्या गर्भो न स्रवतीति ॥३२७॥

---

१ कामयताः १ । २ रमय ता याः प्रसवं नेच्छन्तीति-ख. । ३ विसूवति-ख. । ४ लजावत्याः-ख. ।
५ सुगन्धस्य च-ख. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

थंभेइ गब्भपडनं कुलालकरकद्दमं मुहुत्तेण ॥
समहुपसुदुद्धपीअं धिरिआ धिरिअरिणअजडाव्व ॥३२८॥

स्तम्भयति गर्भपतनं कुलालकरकर्दमं मुहूर्त्तेन ।
समधुपशुदुग्धपीतं धृता गिरिकर्णिकाजटा वा ॥

कुम्भकारपाणिलग्नो मृत्पङ्को माक्षिकयुक्तेन छागक्षीरेण सह पीतो गर्भं निरुणद्धि । अथवा श्वेतस्यन्दाया मूलं नारीनितम्बबद्धमेवं करोतीति ३२८॥

[1]पस्सवइ सोणिअं गब्भिणीइ गब्भाउ जाइ महिलाइ ॥
तस्सा पाणं तंडुलजलेण पारावअपुरीसं ॥३२९॥

[2]प्रस्रवति शोणितं गर्भिण्या गर्भाद् यस्या महिलायाः ।
तस्याः पानं तण्डुलजलेन पारावतपुरीषम् ॥

यस्याः स्त्रिया गर्भिण्या गर्भाद् रक्तं स्रवति तस्यास्तन्निवृत्तये कलरवमलं ज्येष्ठजलेन सह [3]पातुं देयमिति ॥३२९॥

महुअसिआकुवलअकन्दचुण्णपाणं परिच्चुए गब्भे ॥
महिलाण हरइ पीडं परिसेओ सीअलो तह अ ॥३३०॥

मधुकसिताकुवलयकन्दचूर्णपानं परिच्युते गर्भे ।
महिलानां हरति पीडां परिषेकः शीतलस्तथा च ॥

मधुयष्टीसितशर्करोत्पलमूलानां समांशानां चूर्णस्य पानीयेन सह पानं स्त्रीणां गर्भच्युतौ सत्यां वेदनां निवारयति । शिशिरश्च परिषेक इति ॥३२९॥

कढिआरणालपीअं सिन्धुब्भवहिंगुचुण्णमवलाण ॥
तुरिअं करेइ पसवं कडिबद्धा मातुलजडा व ॥३३१॥

क्वथितारनालपीतं सिन्धूद्भवहिंगुचूर्णमवलानाम् ।
त्वरितं करोति प्रसवं कटिबद्धा मातुलजटा वा ॥

सैन्धवलवणवाह्लीकयोश्चूर्णं क्वथितकाञ्जिकेन सह पीतं स्त्रीणामाशु गर्भमोक्षं करोति । अथवा हरवल्लभस्य मूलं स्त्रीनितम्बे ग्रथितमेवं करोतीति ॥३३१॥

एक्कं सुरतरुवाअसमोरअमूलाण विहिपरिगहिअं ॥
महिलाण कडिणिबद्धं सुहपसवं कुणइ णिमिसेण ॥३३२॥

१ पज्झरइ–ख. । पसरइ इत्यपि पाठान्तरम् । २ प्रसरतीत्यपि पाठान्तरम् । ३ पानं देयमिति-ख. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

एकं सुरतरुवायसमयूरकमूलानां विधिपरिगृहीतम् ।
महिलानां कटिनिबद्धं सुखप्रसवं करोति निमिषेण ॥

सुरतरुः पारिभद्रस्तथा वायसः काकजंघा तथा आपामार्ग एतन्मूलानामेकतमं स्त्रीणां नितम्बे ग्रथितं सुखेन शीघ्रं च प्रसवं करोतीति ॥ विधिरस्येति (?) ॥३३२॥

पाढाइ मोरअस्स व मूलं महिलाण जोणिविणिहित्तं ॥
कुणइ सुहं विअ पसवं दुक्खप्पसवाण वि खणेण ॥३३३॥

पाठाया मयूरकस्य वा मूलं महिलानां योनिविनिहितत् ।
करोति सुखमेव प्रसवं दुःखप्रसवानामपि क्षणेन ॥

भङ्ग्या अपामार्गस्य वा मूलं स्त्रीणां वराङ्गनिक्षिप्तं सत् सक्लेशप्रसवानामप्यक्लेशेनैव शीघ्रं गर्भमोक्षं सम्पादयतीति ॥३३३॥

जइ तं मोरअमूलं ताणीं तुट्टइ समुद्धरिज्जन्तं ॥
ता पसोस्सइ कुमारीं महिला तणअमतुट्टिअम्मि ॥३३४॥

यदि तन्मयूरकमूलं तदानीं खण्ड्यते समुद्ध्रियमाणम् ।
तत् प्रसोष्यते कुमारीं महिला तनयमखण्डिते ॥

यदि तदपामार्गमूलं पूर्वोक्तप्रयोगार्थमुन्मूल्यमानं तदानीमेव त्रुट्यति तन्नारी कन्यां जनयतीति ज्ञेयम् । अत्रुटिते तूद्धृते पुत्रमिति ॥३३४॥

पुडडड्ढसप्पकंचुअमसिणमसीकुसुमसारभरिअक्खी ॥
झत्ति विसल्ला जाअइ गब्भवई मूढगब्भा वि ॥३३५॥

पुटदग्धसर्पकंचुकमसृणमसीकुसुमसारभरिताक्षी ।
झगिति विशल्या जायते गर्भवती मूढगर्भाऽपि ॥

अन्तर्धूमदग्धेन भुजगनिर्मोकेण कृतं यत् सूक्ष्मपिष्टं भस्म तेन माक्षिकमिश्रितेन पूरितनेत्राऽपामार्गप्रवृत्तगर्भापि स्त्री तत्कालमेव विगतशल्या सम्पद्यते । सुखेन शीघ्रं गर्भं मुञ्चतीत्यर्थः ॥३३५॥

थोएणठिवअ [१]णिपडइ कुलिसच्छीरेण सीसणिहिएण ॥
महिलाण गब्भसल्लं सरपुंखामूलिआए व ॥३३६॥

स्तोकेनैव निपतति कुलिशक्षीरेण शीर्षनिहितेन ।
महिलानां गर्भशल्यं शरपुंखामूलिकया वा ॥

१ णिवतइ-ख. । (?)ग्रन्थान्ते वक्ष्यत इति ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सुधाक्षीरेणाल्पेनापि मूर्धन्यस्तेन स्त्रीणां जरायुः केवलं गर्भसहितो वा निपतति । अथवा बाणपुंखामूलेन शिरसि न्यस्तेनैवं भवतीति ॥३३६॥

पडइ पहावेणच्चिअ गब्भो महिलाण जोणिधरिआए ॥
सरसाइ सेअगिरिकण्णिआइ गुंजाइ व जडाए ॥३३७॥

पतति प्रभावेनैव गर्भो महिलानां योनिधृतया ।
सरसायाः श्वेतगिरिकर्णिकाया गुञ्जाया वा जटया ॥

(आर्द्रायाः) शुक्लापराजिताया [1]जटया मूलेन [2]वीर्यमात्रेणैव गर्भः प्रवर्तते । कीदृश्या वराङ्गान्तःस्थापितया । अथवा काकनिकायाः शिफयैवंकृतया गर्भः पततीति ॥३३७॥

पाडेइ जरसणाहं मअं पि गब्भं जरं वि पाडेइ ॥
महिलाण चरणणिसिअं उत्तरणीमूलिआवलअं ॥३३८॥

पातयति जरासनाथं मृतमपि गर्भं जरामपि पातयति ।
महिलानां चरणन्यस्तमुत्तरणीमूलिकावलयम् ॥

उत्तरण्या [3]उष्ट्रवारुण्या मूलं वलयीकृतं पादयोः क्षिप्तं स्त्रीणां तत्कालमेव जरायुसहितं विपन्नमपि गर्भं पातयति । तस्मिन् वा पूर्वं पतिते शिष्टं जरायुमपि पातयतीति ॥३३८॥

दरचुण्णिअगोसेनाडमूलखंडेण जोणिणिहिएण ॥
रमणीण तक्खणच्चिअ णिपडइ गब्भो पवेपन्तो ॥३३९॥

दरचूर्णीकृतगोसेनातमूलखण्डेन योनिनिहितेन ।
रमणीनां तत्क्षणमेव निपतति गर्भः प्रवेपमानः ॥

गोसेनाडस्य [4]अपामार्गस्य ईषत्पिष्टेन सिफाशकलेन वराङ्गन्यस्तेन तत्कालमेव गर्भः प्रवर्तत इति ॥३३९॥

जज्जरिअतेल्लतुप्पिअपुणण्णवासरसमूलखण्डेन ॥
गब्भासअमुहणिसिएण पडइ गब्भो मुहुत्तेण ॥३४०॥

जर्जरिततैलार्द्रितपुनर्नवासरसमूलखण्डेन ।
गर्भाशयमुखन्यस्तेन पतति गर्भो मुहूर्त्तेन ॥

जर्जरितं किंचिच्चूर्णीकृतं ततस्तिलतैलाक्तमार्द्रं वर्षाभूमूलं गर्भग्रहणीवदन (नि)क्षिप्तं प्रवर्तयति गर्भं शीघ्रमेवेति ॥३४०॥

---

१ जगयाः-ख. । २ पूर्यमात्रेणैव-ख. । ३ उत्तरवारुण्या इति प्राचीनतरपुस्तके । ४ पुनर्नवायाः-ख. । अपामार्गस्येत्ययं पाठस्तु प्राचीनतरपुस्तके ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मइरामण्डालोडिअपुराणगुडसुरसपत्तसरसेहि ॥
पीएहि जाइ णासं वरंगसूलं पसूआण ॥३४१॥

मदिरामण्डालोडितपुराणगुडसुरसपत्रस्वरसाभ्याम् ।
पीताभ्यां याति नाशं वराङ्गशूलं प्रसूतानाम् ॥

सुरास्वच्छभागेन[1] मिश्रितौ जीर्णगुडसर्जकापल्लवनिस्यन्दौ ताभ्यां । गुडस्य कर्षो द्रवद्रव्यस्य [2]पलत्रयेणेति मात्रया मिश्रीकृत्य, पीताभ्यां [3]वृत्तप्रसवानां नारीणां प्रसवजनिता योनिवेदना नश्यतीति ॥३४१॥

णासइ वरंगविअणा पुणरणवामोरआण एक्कस्स ॥
सरसेण झत्ति दढदूसहा वि अन्तो णिहित्तेण ॥३४२॥

नश्यति वराङ्गवेदना पुनर्नवा मयूरकयोरेकस्य ।
स्वरसेन झगिति दृढदुःसहाऽप्यन्तर्निक्षिप्तेन[4] ॥

वर्षाभ्वा अपामार्गस्य च मध्यादेकतरस्य स्वरसेन निजनिस्यन्देन निष्पीडनजेन योन्यन्तरक्षिप्तेन स्थिरतीव्रमपि योनिशूलं स्त्रीणां तत्कालमेव निवर्तत इति ॥३४२॥

विहडेइ जोणिविअणं पंचंगुलतेल्लसिञ्चिअं तूलं ॥
अन्तणिहिओ व फुडं संजावोलंबुसारइओ ॥३४३॥

विघटयति योनिवेदनां पञ्चाङ्गुलतैलसिक्तं तूलम् ।
अन्तर्निहितो वा स्फुटं संयावोऽलम्बुषारचितः ॥

कार्पासपिच्छमेरण्डतैलाभ्यक्तं योन्यन्तर्न्यस्तं तच्छूलं शमयति । अथवा श्रमणशीर्षकेन चूर्णीकृतेन घृतभर्जितेन सम्पादितः संयावो यावकसारप्रायः[5]प्रकारः । तद्भक्तलाख्यया प्रसिद्धं योनिशूलं नाशयति। संयावविरचने द्विधा युक्तिरियम्– तप्तघृतमध्ये श्रमणशीर्षकचूर्णं भृष्टं कृत्वा तत उद्धृत्य पानीयपिष्टं पिण्डीकृत्य यथासुखावहं घृताभ्यक्ततप्तं योनौ संयोज्यमित्येकः प्रकारः, द्वितीयस्तु पानीयेनैव सूक्ष्मपिष्टं पिण्डीकृत्य तप्तघृतेनार्द्रीकृतं पूर्ववद् योनौ संयोज्यमन्तर्वा निवेश्यमिति ॥३४३॥

अवहरइ जवक्खारो मक्कल्लं सूइआण महिलाण ॥
कढिअजलेण घएण व पीओ धेज्जं विसाओव्व ॥३४४॥

अपहरति यवक्षारो मक्कल्लं सूतिकानां महिलानाम् ।
क्वथितजलेन घृतेन वा पीतो धैर्यं विषाद इव ॥

---

१ स्वच्छन्दभागेन–ख. । २ पलत्रयमितिमात्रयेति पाठः साधीयान् । ३ वृत्तप्रसूतानां–ख. । ४ निक्षिप्तेन–ख. ।
५ कासारप्रायः–ख. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

वृत्तप्रसवानां नारीणां यादृशं शूलमुत्पद्यते यस्य मक्कलमित्याख्या तद् यावशूकः कफाधिकानां कथिततोयेन, वातपित्ताधिकानां घृतेनावलेह्योग्यं कृत्वा क्रमात् पानेनावलेहेन चोपयुक्तः शमयति । स्पष्टमुपमानमिति ॥३४४॥

दुद्धेण कलमतण्डुलचुण्णं पीओ विदारिकन्दो वा ॥
सत्ताहं दुद्धरआइ कुणइ दुद्धं पसूआइ ॥३४५॥

दुग्धेन कलमतण्डुलचूर्णं पीतो विदारीकन्दो वा ।
सप्ताहं दुग्धरतायाः करोति दुग्धं प्रसूतायाः ॥

गोक्षीरेण सह कलम(स्य)शालेस्तण्डुलानां सम्बन्धि पिष्टं सप्त दिनानि पानेनोपयुक्तं जातापत्यायाः स्वल्पक्षीरायाः क्षीरवृद्धिं करोति । कीदृश्याः— तान्येव सप्तदिनानि क्षीरप्रधानमेव भुञ्जानायाः । अथवा क्षीरविदारीमूलमेवमेवोपयुक्तमुक्तकार्यं करोतीति ॥३४५॥

[1]कुक्कुरमद्दअमूलं चव्विअधरिअं मुहम्मि महिलाया: ॥
हरइ थणकीकडं कुणइ थण्णउद्धिं च सत्ताहा ॥३४६॥

[1]कुक्कुरमर्दकमूलं चर्वितधृतं [2]मुखे महिलायाः ।
हरति [3]स्तनकीकटान् करोति स्तन्यवृद्धिं च सप्ताहात् ॥

कुक्कुरमर्दकस्य (।) रामशीतलिकाया मूलं [4]दन्तचूर्णितं सदास्याभ्यन्तरे स्थापितं नार्याः [5]कुचयोरुत्पन्नान् क्षीरदोषकृतान् कण्टकप्रायान् विकारान् नाशयति क्षीरं च वर्धयति सप्तदिनान्युपयुक्तमिति ॥३४६॥

हरइ विसालामूलं थणविअणं कामिणीण लेवेण ॥
तणअभवं सहरिद्दो कुमारिकन्दो व णिमिसेण ॥३४७॥

हरति विशालामूलं स्तनवेदनां कामिनीनां लेपेन ।
तनयभवां सहरिद्रः कुमारीकन्दो वा निमेषेण ॥

स्त्रीणामपत्यविपत्त्यादिवशाज्जातां कुचपीडामिन्द्रवारुणीमूलं पानीयपिष्टं लेपेनोपयुक्तं नाशयति । अथवा पिण्डहरिद्रासहितं फट(हट्ट)कुमारीमूलमेवमेवोपयुक्तमतिशीघ्रमेवं करोतीति ॥३४७॥

[6]तणुईकरेइ मज्झं पीअं महिएण माहवीमूलं ॥
लीढं व णिसाविअमे कसेरुअं घअमहुम्मीसं ॥३४८॥

---

१ कुक्कुरमन्दश्रमूलं–ख. । २ मु (मु)खेन–ख. । ३ स्तनकीटकान्–ख. । ४ दत्तचूर्णितंसदास्यान्तरे–ख. । ५ कुचयोरुत्पन्नायाः क्षीरदोषकृतायाः कण्टकप्रायायाः–ख. । ६ इइइकरेइ–ख. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तनूकरोति मध्यं पीतं मथितेन माधवीमूलम् ।
लीढं वा [1]निशाविगमे [2]कसेरुकं घृतमधून्मिश्रम् ॥

माधव्या अतिमुक्तकलतायाः मूलं तक्रेण सह पिष्टं पीतं स्त्रीणामुदरं कृशीकरोति । अथवा गोघृतमाक्षिकाभ्यां मिश्रितं कसेरुकं काकमाचिकं चूर्णीकृतं सदवलेहेनोपयुक्तमेवं करोतीति ॥३४८॥

गोमअविरुक्खिआइं जलवट्टिअसघअवरणअदलेहि ॥
उव्वट्टिआइं बहुसो किक्किसिआइं विणासन्ति ॥३४९॥

गोमयविरूक्षितानि जलवर्तितसघृतवरणकदलैः ।
उद्वर्तितानि बहुशः किक्किसिकानि विनश्यन्ति ॥

किक्किसिकानि गर्भिण्यास्त्वग्भदेजा [3]वैरूप्यहेतवो रोगविशेषाः । गोशकृता प्रथमं विरूक्षत्वं प्रापितानि पश्चाद् गोघृतसंयुक्तैः वरणकवृक्षस्य श्वेतपुष्पाख्यस्य पत्रैस्तोयपिष्टैः पुनःपुनः कृतोद्वर्तनानि शाम्यन्तीति ॥३४९॥

कप्पासवीअसाहिअघअपोणी जोणिसूलमवहरइ ॥
मूसिअपिसिअविपक्कं तेल्लं च वरङ्गविब्भंसं ॥३५०॥

कार्पासबीजसाधितघृतपोणी[4] योनिशूलमपहरति ।
मूषिकपिशितविपक्वं तैलं च वराङ्गविभ्रंशम् ॥

कार्पासबीजैः साधितेन घृतेनाक्ता कार्पासबीजचूर्णेनावचूर्णिता यासौ [5]पोणी कार्पासादिपिचुः सोष्णीकृता योनौ समर्पिता तच्छूलं निवर्तयति । तथोन्दुरुमांससिद्धं तिलतैलं वराङ्गस्य बहिर्निःस्सरणरूपं विभ्रंशमभ्यङ्गान्निवर्तयति । घृततैलपाकविधिः सामान्येनोक्त इति ॥३५०॥

पइसरइ णिग्गआ वि [6]हु कारल्लीकन्दलेविआ जोणी ॥
सिढिला पि होइ गाढा सुरगोपअघअकअब्भङ्गा ॥३५१॥

[7]प्रविशति निर्गता पि खलु कारल्लीकन्दलेपिता योनिः ।
शिथिलापि भवति गाढा सुरगोपकघृतकृताभ्यङ्गा ॥

बहिःप्रवृत्तमपि स्त्रीणां वराङ्गमन्तः प्रविशति प्रकृतिस्थं भवति । (कथं—) कारल्ली निष्पर्याया तन्मूलेन जलपिष्टेन कृतलेपं सत् । तथा शिथिलापि स्रस्तापि गाढा दृढा भवति योनिः । (कथम्-) इन्द्रगोपकाख्यकीटशरीरचूर्णसाधितेन घृतेनाभ्यक्ता सतीति ॥३५१॥

---

१ निशाविरामे । २ कसेरुकं ३ वैरुप्य(वैरुद्य)हेतवो-ख. । ४ घृतपोणी-ख. । ५ योणी-ख. । ६ खु-ख. । ७ प्रतिसरतीति प्राकृतानुसारिणी छाया ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

माआफलमहुकप्पूरपूरिअं होइ कामिणिजणस्स ॥
चिरगलिअजोव्वणस्स वि वरंगमइगाढसुउमारं ॥३५२॥

मायाफलमधुकर्पूरपूरितं भवति कामिनीजनस्य ।
चिरगलितयौवनस्यापि वराङ्गमतिगाढसुकुमारम् ॥

मायाफलानि प्रसिद्धानि तैस्तथा माक्षिकघनसाराभ्यां भरितं स्त्रीलोकस्य वृद्धस्यापि वराङ्गं विगतवलिशैथिल्यं मृदुस्पर्शं च भवतीति ॥३५२॥

धाअइतुरङ्गगन्धाकाराअणिखइरसाहिअं सलिलं ॥
पक्खालणेण जोणीइ कुणइ गाढत्तणं सुइरं ॥३५३॥

धातकीतुरङ्गगन्धाकारायणीनिर्यासाधितं सलिलम् ।
प्रक्षालनेन योन्याः करोति गाढत्वं सुचिरम् ॥

मद्यन्त्यश्वगन्धाभ्यां तथा कारायणीनिर्यासेन मोचरसेनैतेन[1] क्वाथविधिना साधितं जलं वराङ्गस्य प्रक्षालनेन प्रयुक्तं [2]बहुकालं तस्य शैथिल्यं निवारयतीति ॥३५३॥

खरतरणिकिरणताविअभेरण्डअरसारण्णमूसिअवसाहि ॥
मण्डूअवसासहिआहि कुणइ कुमारत्तणं लेओ ॥३५४॥

खरतरणिकिरणतापितभेरण्टकरसारण्यमूषिकवसाभिः ।
मण्डूकवसासहिताभिः करोति कुमारीत्वं लेपः ॥

तीव्रार्करश्मिभिस्तापितस्य भेरण्टकस्य वार्ताकस्य रसेन तथा तालहृदस्य तथा दर्दुरस्य वसयैतैस्तुल्यांशैः कृतो [3]भगलेपः कुमार्याः सत्याः [4]पुरुषोपभुक्तायाः पुनः कुमारीत्वमभग्नयोनित्वं सम्पादयतीति ॥३५४॥

लट्ठिमहुपञ्चपल्लवमालइकुसुमेहि रविअरविपक्कं ॥
णारीवरंगगन्धं घअमब्भङ्गेण णासेइ ॥३५५॥

यष्टिमधुपञ्चपल्लवमालतीकुसुमैः रविकरविपक्वम् ।
नारीवराङ्गगन्धं घृतमभ्यङ्गेन नाशयति ॥

मधुयष्ट्या तथा पञ्चभिः पल्लवैः- [5]कपित्थस्याम्रस्य जम्बीरस्य कुटबीजस्य बिल्वस्य चेति पञ्चानां वृक्षाणां पत्रैस्तथा सुमनःपुष्पैरेतैः सप्तभिस्तुल्यांशैरष्टगुणं [6]गोघृतं [7]क्षणमात्रं सूर्यकिरणैः क्वथितं वराङ्गाभ्यङ्गान्नारीणां तद्दौर्गन्ध्यं नाशयतीति ॥३५५॥

---

१ मिलितैर्नैतत्त्रयेणेत्यर्थः । २ बहुलं-ख. । ३ गर्भलेपः-ख. । ४ पुरुषोपयुक्तायाः-ख. । ५ आम्रकपित्थजम्बूबीजपूरकबिल्वानामिति ! । ६ गोघृते-ख. । ७ पक्षमात्रमिति पुस्तकान्तरेषु ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अवहरइ कमलकुवलअवीअविसोसीरजलहरविपक्कं ॥
दुग्गन्धसिढिलपिच्छिलविसमवरंगत्तणं तेल्लं ॥३५६॥

अपहरति कमलकुवलयबीजविसोशीरजलधरविपक्वम् ।
दुर्गन्धशिथिलपिच्छिलविषमवराङ्गत्वं तैलम् ॥

पद्मस्य बीजं [1]पद्माक्षमुत्पलस्य बीजं कुम्भिकाख्यं तथा मृणालं तथा रणं तथा मुस्तमेतैस्तुल्यांशैस्तैलपाकविधिना पक्वं तिलतैलं भगाभ्यङ्गेन तस्य दौर्गन्ध्यं तथा शैथिल्यं तथा पिच्छिलत्वं तथा वैषम्यं नतोन्नतत्वं च नाशयतीति ॥३५६॥

पक्खालिअं सुबहुसो णिम्बकसाएण धूविअं पच्छा ॥
णिम्बच्छल्लीइ वरंगकुहरमइसुन्दरं होइ ॥३५७॥

प्रक्षालितं सुबहुशो निम्बकषायेण धूपितं पश्चात् ।
निम्बत्वचा वराङ्गकुहरमतिसुन्दरं भवति ॥

पिचुमन्दक्वाथेन पुनःपुनर्निर्मार्जितं पश्चान्निम्बत्वचा दत्तधूपं स्त्रीणां वराङ्गं सौकुमार्यसौगन्ध्यादिगुणयोगादतिसुभगं सम्पद्यत इति ॥३५७॥

मअससिघुसिणरसाउरुचलतण्डुलमलअवलअणहेहि ॥
समहुहि लडहकामिणिवरंगधूओ समुद्दिट्ठो ॥३५८॥

[2]मदशशिकुङ्कुमरसागुरुचलतण्डुलमलयकुवलयनखैः ।
समधुभि र्लडहकामिनीवराङ्गधूपः समुद्दिष्टः ॥

एतैर्द्रव्यैरुत्तमस्त्रीणां भगधूपनमुक्तम् । कैर्द्रव्यैः— मदेन कस्तूरिकया तथा कर्पूरेण तथा काश्मीरेण तथा वोलेन तथा कृष्णागुरुणा तथा सिह्लकाख्येन तथा तण्डुलेन लाक्षया तथा चन्दनेन तथा कुष्ठेन तथा नखेन [3]शुक्तया- एतैस्तुल्यांशैर्माक्षिकमिश्रितैरिति ॥३५८॥

[4]चुण्णिअहरिआलपलासभूइछारेहि रोमणिउरुम्बो ॥
णासइ लेविअमत्तो सरचन्दमिअंकसरिसेहिं ॥३५९॥

चूर्णीकृतहरितालपलाशभूतिक्षारैः [5]रोमनिकुरुम्बम् ।
[6]नश्यति लिप्तमात्रं शरचन्द्रमृगाङ्कसदृशैः ॥

[7]श्लक्ष्णपिष्टं तालं तथा किंशुकदारुभस्म तथा यवक्षारमेतैः, हरितालस्य पञ्चभागाः क्षारयोर्द्वौ भागावितिमात्रया जलपिष्टैः, रोमसमूहो लिप्तमात्रः पततीति※ ॥३५९॥

---

१ पद्माख्यम्-ख. २ मदशशिघुसृणेत्यादि पुस्तकान्तरे पाठः । ३ युक्तया-ख. । ४ चुण्ण-ख. । ५ रोमनिरुद्धम्-ख. । ६ नाशयति-ख. । ७ मृगाङ्कः कर्पूरस्तथा तालं-ख. । ※ मृगाङ्कःकर्पूर इति ख. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

उप्पाडिऊण रोमाइ तुप्पिओ जस्स होइ पेरन्तो ॥
रोमरहिअं वरङ्गं पईहि कोसम्बितेल्लेण ॥३६०॥

उत्पाट्य रोमाण्यभ्यक्तो यस्य भवति पर्यन्तः ।
रोमरहितं वराङ्गं प्रतीहि कौशाम्बीतैलेन ॥

यस्य वराङ्गस्य रोमाण्युत्खाय कौशाम्ब्याः कोशातक्या बीजसंभूतेन तैलेन पर्यन्तभागोऽभ्यज्यते तद् वराङ्गं नित्यमेव रोमवर्जितं भवति । अत्र प्रत्ययं कुर्विति ॥३६०॥

हालाहलपुच्छचुण्णमीसिअं सत्तरत्तपरिवसिअं ॥
सरिसवतेल्लं व इमं करेइ अब्भंगमत्तेण ॥३६१॥

हालाहलपुच्छचूर्णमिश्रितं सप्तरात्रपर्युषितम् ।
सर्षपतैलं वेदं करोत्यभ्यङ्गमात्रेण ॥

इदमुक्तपूर्वं कार्यं गौरसिद्धार्थकतैलं वाऽभ्यङ्गमात्रेण सम्पादयति । कीदृशम्— ब्राह्मणिकाख्यस्य प्राणिनश्चूर्णीकृतेन पुच्छेन मिश्रितं सत् [1]सप्ताहोरात्राणि स्थापितमिति ॥३६१॥

महुमीसबीअपूरअदलचुण्णं पिबइ जा पओसम्मि ॥
सा लज्जावहमारुअणिरुद्धपसरा सुखं सुवइ ॥३६२॥

मधुमिश्रबीजपूरकदलचूर्णं पिबति या प्रदोषे ।
सा लज्जावहमारुतनिरुद्धप्रसरा सुखं [2]स्वपिति ॥

माक्षिकेण मिश्रितं यन्मातुलुङ्गतरुपत्राणां चूर्णं तदपराह्णसन्ध्यायामवलेहेन योपयुङ्क्ते सा व्रीडाकरस्य वातस्य स्तम्भितप्रवृत्तिः सती निराशङ्कत्वात् सुखं स्वपिति । समीपे निद्रामनुभवतीति ।

(बालपरिकर्म—)

जम्मदिअहाइ दिण्णो सत्ताहं बालआण सघएहि ॥
धूओ करेइ रक्खं दाहिणदिअपक्खपिञ्छेहि ॥३६३॥

जन्मदिवसाद् [3]दत्तः सप्ताहं बालकानां सघृतैः ।
धूपः करोति रक्षां दक्षिणद्विजपक्षपिच्छैः ॥

उत्पत्तिदिनादारभ्य सप्तदिनानि शिशूनामेतैर्द्रव्यैर्दत्तो धूपो ग्रहादिभ्यो रक्षां करोति । कैः— दक्षिणद्विजस्य दक्षसंज्ञस्य कुक्कुटस्योभयपार्श्ववर्तिभिः पक्षैस्तथा पिच्छैरपुच्छेन । कीदृशैः— सघृतैर्गोघृतालिप्तैरिति ॥३६३॥

---

१ सप्ताहोरात्रान्–ख. । २ वपति– इति प्राचीनतरपुस्तके पाठः । ३ अन्तइति पुस्तकान्तरेषु ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

विसवाहिभूअरक्खं मेहं सुरहित्तमंगलावण्णं ॥
कुणइ सिअकुट्ठमन्तरपाणअविहिणा डिंहाण ॥३६४॥

विषव्याधिभूतरक्षां मेधां सुरभित्वमङ्गलावण्यम् ।
करोति सितकुष्ठमन्तरपानकविधिना बालानाम् ॥

श्वेतवाप्यचूर्णं गोघृतक्षौद्रमिश्रितं जातमात्रस्यागृहीतस्तन्यस्यैव बालस्यावलेहत्वेनोपयुक्तं विषादिभ्यो रक्षां करोति सौगन्ध्यादींश्च गुणान् करोतीति ॥३६४॥

सिहिचुलिआइ मूलं अहिमअरविडप्पसंगमे गहिअं ॥
बालाण कंठबद्धं समत्थगहदोसविद्दवणं ॥३६५॥

शिखिचूडाया मूलमहिमकरराहुसंगमे गृहीतम् ।
बालानां कण्ठबद्धं समस्तग्रहदोषविद्रावणम् ॥

शिखिचूडा मयूरशिखा, तस्या मूलं ग्रहणकाले स्वीकृतं शिशूनां गलग्रथितं सर्वबालग्रहभयनिवारणम् । अहिमकरः सूर्यः, विडप्पो राहुरिति ॥३६५॥

संखुप्पलकुट्ठवआकालाअसधारणं कुमाराण ॥
कुणइ सआ सव्वत्तो रक्खं सअलोअसग्गेसु ॥३६६॥

शङ्खोत्पलकुष्ठवचाकालायसधारणं कुमाराणाम् ।
करोति सदा सर्वतो रक्षां सकलोपसर्गेषु ॥

आधिदैविकादिषु सर्वेषूपद्रवेषु जातेषु सर्वेभ्यो ग्रहादिभ्यो दोषेभ्यो बालकानां रक्षामेतेषां धारणं सम्पादयति । केषां — शङ्खस्य समुद्रजस्य कम्बोरुत्पलस्य[1] कुष्ठस्य वाप्यस्यैव तथोग्रगन्धायास्तथा शस्त्रस्यैषां व्यस्तानां समस्तानां वेति[2] ॥३६६॥

रूविअदुद्धमहोसहतम्माघअकुणडिआहि णिम्मविअं ॥
डिम्हाण विलेवणअं गहगणघणदोसविद्दवणं ॥३६७॥

रूपिकदुग्धमहौषधताम्राघृतकुनटीभिर्निर्मितम् ।
डिम्भानां विलेपनकं ग्रहगणघनदोषविद्रावणम् ॥

अर्कक्षीरेण तथा नागरेण तथा गोघृतेन तथा कुनट्या मनःशिलया- एतैर्मिश्रितैः कृतं समालम्भनं बालानां सर्वदुष्टग्रहवृन्दजानां सन्तवानां दोषाणामपसारणं करोतीति ॥३६७॥

---

१ उत्पलकुष्ठस्य वाप्यस्यैव-ख. । २ चेति-ख. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सिअसिंदुवारमूलं पुव्वदिसासंभवं समुप्पसइ ॥
बालाण गलणिबद्धं दसणुब्भववेअणादुक्खं ॥३६८॥

सितसिन्दुवारमूलं पूर्वदिक्भवं समुदर्ध्वंसयति ।
बालानां गलनिबद्धं दशनोद्भववेदनादुःखम् ॥

सितसिन्दुवारस्य श्वेतपुष्पस्य ·· ··· ·· मूलं प्राचीदिग्भागप्रसृतं कण्ठग्रथितं सत् कुमाराणां दन्तजन्मव्यथात्मकं क्लेशमपहरतीति ॥३६८॥

एकं दुद्धलिआसंखफुल्लितुंबीजवासमूलाण ॥
बालाण कण्ठबद्धं दसणुब्भवदुक्खमवहरइ ॥३६९॥

एकं दुग्धलिकाशंखपुष्पीतुम्बीयवासमूलानाम् ।
बालानां कण्ठबद्धं दशनोद्भवदुःखमपहरति ॥

अर्कपुष्प्यास्तथा शङ्खपुष्प्याःस्थिरेत्यास्तथा तिक्तालाब्वास्तथा यवासस्य दीर्घमूलस्य सम्बन्धिनां मूलानामन्यतमं शिशूनां गलग्रथितं सद् दशनोद्भवकालजां व्यथां नाशयतीति ॥३६९॥

महुणा ककरकविंजलवल्लूररओ करेइ ओलीढो ॥
दन्तुग्गममइतुरिअं बालाणमुवद्दवविमुत्तं ॥३७०॥

मधुना क्रकरकपिञ्जलवल्लूररजः करोत्यवलीढम् ।
दन्तोद्गममतित्वरितं बालानामुपद्रवविमुक्तम् ॥

क्रकरकपिञ्जलयोः सम्बन्धि शुष्कमांसचूर्णं क्षौद्रेण सहावलेहेनोपयुक्तं कुमाराणां शीघ्रमेव ज्वरातीसाराद्युपसर्गरहितं दशनजन्म सम्पादयति । क्रकरकपिञ्जलयोरभावे तित्तिरलावकौ ग्राह्याविति ॥३७०॥

बालाण विल्लधाअइगअपिप्पलिसवरसलिलसमभाओ ॥
सव्वाइसारहरणो समहु चुण्णो कसाओ व ॥३७१॥

बालानां विल्वधातकीगजपिप्पलीसवरसलिलसमभागः ।
सर्वातिसारधरणः समधुश्चूर्णः कषायो वा ॥

मालूरसंज्ञस्य तथा ताम्रपुष्प्यास्तथा चविकायास्तथा लोध्रस्य तथा बालकस्यैषां समे भागा यस्मिँस्तादृशश्चूर्णो माक्षिकेण सहावलेहेनोपयुक्तोऽतीसारं सर्वदोषजमपि निरुणद्धि । अथवा एतैरेव समांशैः क्वाथः समाक्षिक एवेति ॥३७१॥

घणफलिणीसोवीरअचुण्णो तण्डुलजलेण महुसहिओ ॥
अइसारछद्दितण्हाउ हरइ दिण्णो कुमाराण ॥३७२॥

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

घनफलिनीसौवीरकचूर्णस्तण्डुलजलेन मधुसहितः ।
अतिसारछर्दितृष्णा हरति दत्तः कुमाराणाम् ॥

मुस्तप्रियंगुशैलाञ्जनानां समांशानां चूर्णो ज्येष्ठजलेनालोड्य [1]तेनैव समाक्षिकेण सह पीतो बालानामतिप्रवृत्तिं वमिं तृषं च नाशयतीति ॥३७२॥

णिवडन्ति किमी वच्छारुहाण डिम्हस्स ह्विअमत्तस्स ॥
दाऊण उत्तमंगे .... पलासावलामूलं ॥३७३॥

निपतन्ति कृमयो वत्सारुषां डिम्भस्य स्नपितमात्रस्य ।
दत्त्वोत्तमाङ्गे सूक्ष्मपलाशाबलामूलम् ॥

वालस्य वत्सारूंषि व्याधिविशेषा मूर्ध्नि ये भवन्ति । तेषु ये कृमयो जायन्ते ते तस्य सूक्ष्मपत्राया वलाया भद्रोदन्या मूलचूर्णं शिरसि दत्त्वा स्नापितस्यैव पतन्ति ततो निवर्तन्ते व्रणं च रोहतीति ॥३७३॥

लक्खासुवर्णगेरिअसविलंङ्गसिलाहिदारुरअणीहि ॥
खुंखुणिआमुत्थइप्पमुहणअणरोअहरमंजणं भणिअं ॥३७४॥

लाक्षासुवर्णगैरिकसविडिङ्गशिलाहिदारुरजनीभिः ।
खुङ्खुणिकामुस्तकीप्रमुखनयनरोगहरमञ्जनं भणितम् ॥

[2]तरुव्याधिस्तथा सुवर्णगैरिकं प्रसिद्धं तथा कृमिघ्नसहिता कुनटी तथाऽहिर्नागकेसरं तथा दार्वीत्येतैः समांशैः कृतमञ्जनं कुकूणक [3]मुस्तकीप्रमुखानां चक्षूरोगाणां विनाशनमुक्तम् । कुकूणकस्य लक्षणमेवं पठन्ति—

कुकूणकः शिशोरेव दन्तोद्भेदनिमित्तजः ।
तेन स्याच्छिशुरुच्छूनस्ताम्राक्षो वीक्षणाक्षमः ॥इति॥

एष खुंखुणिकासंज्ञयेहोक्तः । पुनः मुस्तक्याख्यस्तु शिशूनामन्येषामपि च भवति । यस्या वर्त्माभ्यन्तरे [4]शूक्ष्मपिटकोद्गमादिरूपं लक्षणमाहुः । प्रमुखग्रहणेन कृच्छ्रप्रबोधादीनां चतुर्विंशतेर्वर्त्मरोगाणां ग्रहणमिति ॥३७४॥

मसिणवलामूलवआचुण्णसणाहं खराअवविपक्कं ॥
तुलिआमअमाहप्पं तेल्लं सुखदं कुमाराण ॥३७५॥

मसृणबलामूलवचाचूर्णसनाथं खरातपविपक्वम् ।
तुलितामृतमाहात्म्यं तैलं सुखदं कुमाराणाम् ॥

---

१ तेनैव सह समाक्षिकः पीता ? । २ लाक्षा तरुव्याधिरिति । ३ पुस्तकीप्रमुखानां–ख. । ४ पिटिकोद्गमादिरूपमिति प्राचीनतरपुस्तके ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सूक्ष्मपिष्टेन वाट्यालकमूलस्य तथा वचायाश्चूर्णेन संयुक्तं विलतैलं पद्ममात्रं तीक्ष्णार्ककिरणेन क्वथितं सदभ्यङ्गेन प्रयुक्तं बालानां बलपुष्टिवर्णादिकरत्वात् स्पर्धितामृतप्रभावमत एव सौख्यदायीति ॥३७५॥

एएण कअब्भङ्गो वलाजडाविगअतुसजवेम्मलिओ ॥
उण्होण्हवलाकाढिअजलेण बालो बलं लहइ ॥३७६॥

एतेन कृताभ्यङ्गो बलाजटाविगततुषयवोन्मलितः ।
उष्णोष्णवला[1]क्वथितजलेन बालो बलं लभते ॥

अनेनोक्तेन तैलेनाभ्यस्ताभ्यङ्गः शिशुः पश्चाद् वलामूलचूर्णेन निस्तुषीकृतयवचूर्णेन चैताभ्यां जलमिश्राभ्यामुद्वर्तितस्ततो वलाक्वथितेन सुखोष्णेन सलिलेन स्नापितो बलं प्राप्नोतीति ॥३७६॥

हअरिउकरंजरूविअसत्तच्छअपण्णपसुजलोम्मलिओ ॥
हिरिवेरदेविलंवुसकाढिअविक्खालिअसरीरो ॥
हिंगुवआपुरवेहिंणग्गुंडीणिंवपण्णकअधूओ ॥
घअकुसुमसारकउहवेणुब्भवकणअकअलेहो ॥
गअवसहविसाणुद्धरिअमट्टिआसुरहिरोअणातिलओ ॥
मोरअणिमन्तकंठअसुवण्णमणिमूलकअरक्खो ॥
सुसिणिद्धजणणिपरिअणणिव्वत्तिअविविहमंगलाआरो ॥
गहदोसवाहिरहिंओ होइ कुमारो कुमारव्व ॥३७७-३८०॥

हयरिपुकरंजरूपिकसप्तच्छदपर्णपशुजलोन्मलितः ।
ह्रीवेरदेव्यलंबुषाक्वाथविक्षालितशरीरः ॥
हिंगुवचापुरशिखिपिच्छनिर्गुण्डीनिम्वपर्णकृतधूपः ।
घृतकुसुमसारककुभवेणूद्भवकनककृतलेहः ॥
गजवृषभविषाणोद्धृतमृत्तिकासुरभिरोचनातिलकः ।
[2]मयूरनिमन्त्रकण्ठकसुवर्णमणिमूलकृतरक्षः ॥
सुस्निग्धजननीपरिजननिर्वर्त्तितविविधमङ्गलाचारः ।
ग्रहदोषव्याधिरहितो भवति कुमारः कुमार इव ॥

उक्तेन परिकर्मणा नित्यं परिचर्यमाणो बालो [3]धर्म्मस्कन्दसमो भवति । कीदृशः— करवीरनक्तमालार्कमूलानां तथाऽयुग्मदलपर्णानां चूर्णैनैतैः समांशैश्छागमूत्रमिश्रितैः कृतोद्वर्तनः,

---

१ क्वथित-ख. । २ मयूरानिमन्त्रेत्यादि प्राचीनतरपुस्तके पाठः । ३ धर्मस्कन्दसम इति पुस्तकान्तरे ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

बालकसहदेवीश्रमणशीर्षकैः क्वथितेन जलेन क्षालिताङ्गः । ततो बाह्लीकेनोग्रगन्धया महिषाक्षेण मयूरपक्षेण तथा भूतकेश्या तथा पिचुमन्दपत्रैः समांशैः प्रयुक्तधूपः । तथा गव्यसर्पिषा क्षौद्रेण चालोडितैरर्जुनपुष्पवंशरोचनापद्मकैः समांशैर्दत्तावलेहः । तथा दन्तिदन्तबलीवर्दशृङ्गोत्खातया मृदा तथा गोरोचनया रचितविशेषकः । तथा [1]सर्पभयघ्नैर्मन्त्रैः कृतेन कण्ठाभरणेन तथा सुवर्णेन तथा मणिभिर्मरकतादिभिस्तथा वलामोढाद्योषधीनां मूलैः कण्ठबद्धैः सम्पादितरक्षस्तथा सुस्निग्धैर्मातृप्रमुखैः परिचारकैः सम्पादिता नानाकाराः कल्याणप्रधानाः क्रियाविशेषा यस्य तथाविधोऽसौ बालो बालग्रहदोषैर्ज्वरादिभिश्च वर्जितः सन्नुक्तरूपो भवतीति [2]चतुर्भिः कुलकम् ॥३७७-३८०॥

इति बालपरिकर्म

कुट्ठमुराणाएसरचुण्णं जो लिहइ घअमहुम्मीसं ॥
सो होइ सुरहिगंधो तरुणीअणवल्लहो तह अ ॥३८१॥

कुष्ठमुरानागकेसरचूर्णं यो लेढि घृतमधून्मिश्रम् ।
स भवति [3]सुरभिगन्धस्तरुणीजनवल्लभस्तथा च ॥

वाप्यस्य तथा मुराया गन्धवत्यास्तथा कनकस्य सूक्ष्मपिष्टचूर्णं सर्पिःक्षौद्राभ्यामालोडितं यः पुमानवलेहेनोपयुङ्क्ते स सुगन्धिशरीरः कामिनीलोकदयितश्च भवतीति ॥३८१॥

तामरसणाअकेसरविसुद्धकुट्ठाण पलसअं विहिणा ॥
महुसुरहिघअकरम्भिअमअणं धण्णम्मि परिवसिअं ॥
थोअत्थोअं गोसे खज्जन्तमिणं करेइ सोहग्गं ॥
आअड्ढिअभमरउलं सरीरगन्धं च मासेण ॥३८२-८३॥

तामरसनागकेसरविशुद्धकुष्ठानां पलशतं विधिना ।
मधुसुरभिघृतमिश्रितमयनं धान्ये पर्युषितम् ॥
स्तोकस्तोकं प्रभाते खाद्यमानं करोति सौभाग्यम् ।
आकृष्टभ्रमरकुलं शरीरगन्धं च मासेन ॥

तामरसस्य पद्मपुष्पस्य तथा कनकस्य तथा निर्मलीकृतस्य वाप्यस्यैतेषां तुल्यांशकल्पनारूपेण विधानेन पलशतं माक्षिकेण गोघृतेन च समांशाभ्यामालोडितं षण्मासान् व्रीहिकूटमध्ये पर्युषितं कृत्वा ततःपरमग्निबलापेक्षिण्या मात्रया स्वल्पं स्वल्पं प्रात भुज्यमानं सुभगतां जनयति, देहामोदं चाक्षिप्तषट्पदवृन्दं मासेन जनयति । विधिरत्र [4]रसायनोपक्रमविहितशरीरशोधनादिर्विवक्षित इति युगलकम् ॥३८१-३८२॥

---

१ सर्पभयघ्नमन्त्रैरिति पाठान्तरं प्राचीनतरपुस्तके । २ चतसृभिः-ख. । गाथाभिरित्यर्थात् । ३ सुरभिगन्ध-ख. । ४ वारसाय (ध) नोपक्रम-ख. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सवअंअमलअघोसाडिआण जो पिवइ घअमहुम्मीसं ॥
लहुपच्छासी तइए दिणम्मि सो सुअहरो होइ ॥३८४॥

सवचमामलक[1]कोशातकीनां यः पिबति घृतमधून्मिश्रम् ।
लघुपथ्याशी तृतीये दिने स श्रुतधरो भवति ॥

धात्रीफल[2]घोषकयोश्चूर्णमुग्रगन्धाचूर्णेन सह त्रितयं समांशं घृतमाक्षिकाभ्यां समांशाभ्यामालोडितं यः पुमान् स्वल्पहितभोजनः सन्नवलेहेन दिनत्रयमुपयुङ्क्ते स तृतीय एव दिवसे यच्छास्त्रादिकं किञ्चिच्छृणोति तद् धारयति नविस्मरत्येकसन्धो भवति । गाथायामस्यां चूर्णशब्दोऽध्याहार्य इति ॥३८४॥

समहुघअं सविडिङ्गं पलासवीअरअमामलअरसेण ॥
पीअं मासेण जरं जअइ महाबुद्धिजणणं च ॥३८५॥

समधुघृतं सविडिङ्गं पलाशबीजरज आमलकरसेन ।
पीतं मासेन जरां जयति महाबुद्धिजननं च ॥

किंशुकवीजानां चूर्णं कृमिघ्नचूर्णेन समांशं घृतक्षौद्राभ्यामालोडितं धात्रीफलनिस्यन्देन सह पानयुक्त्योपयुक्तं सत् मासाभ्यासात् [3]पलितमभिभवति [4]प्रकृष्टां च प्रज्ञामुत्पादयतीति त्रिंशद्रात्रप्रयोगेणेति ॥३८५॥

घअमहुतिलमीसामलअचुण्णसेवाइ परिणअवओवि ॥
मासेण जोव्वणं पाविऊण वाईसरो होइ ॥३८६॥

घृतमधुतिलमिश्रामलकचूर्णसेवया परिणतवयस्कोऽपि ।
मासेन यौवनं प्राप्य वागीश्वरो भवति ॥

तिलचूर्णसमांशस्य धात्रीफलचूर्णस्य घृतक्षौद्राभ्यामालोडितस्य त्रिंशद्रात्रोपयोगेन वृद्धोऽपि पुरुषस्तारुण्यमासाद्य वादादौ स्वेच्छाविधेयभारतीकः सम्पद्यत इति ॥३८६॥

सघआमलअसिआमहुतिलसमतुलिअं पलासतरुवीअं ॥
मत्ताइ सअणकाले खाऊण णरो जरं जअइ ॥३८७॥

सघृतामलकसितामधुतिलसमतुलितं पलाशतरुबीजम् ।
मात्रया शयनकाले खादित्वा नरो जरां जयति ॥

किंशुकतरोर्बीजचूर्णं घृतेन तथा धात्रीफलचूर्णेन तथा सितशर्करया तथा माक्षिकेण तथा तिलचूर्णेनैतैः सर्वैः समांशैः समं कृत्वा सर्वेषां यावत्परिमाणं भवति तावत्परिमाणं तदिति तुलितं पुरुषोऽग्निबलानुसारेण निद्राकाले भुक्त्वा पलितं तिरस्करोतीति ॥३८७॥

१ कोशातकी-ख. । २ घोषयोश्चूर्ण-ख. । ३ पलितमभिनवं भवति-ख. । ४ प्रकृष्टां प्रज्ञामुत्पादयतीति-ख. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

[1]अमलअचुण्णं लीढं जलेण महुणा घएण व पओसे ॥
कुणइ मइणअणणासासवणाणलजोव्वणवलाइं ॥३८८॥

आमलकचूर्णं लीढं जलेन मधुना घृतेन वा प्रदोषे ।
करोति मतिनयननासाश्रवणानलयौवनबलानि ॥

धात्रीफलचूर्णं सलिलेन सह पीतं घृतमाक्षिकाभ्यां वा सहावलेहेन निशारम्भे उपयुक्तं प्रज्ञायाश्चक्षुषोर्घ्राणस्य कर्णयोर्जठराग्नेस्तारुण्यस्य चैषां बलानि स्वशक्तीर्जनयतीति ॥३८८॥

पीलणविहिगहिअंकोल्लबीअसिअसरिसवुब्भवं तेल्लं ॥
णावणजुत्तीइ जणं करेइ परमाउसंपुण्णं ॥३८९॥

पीडनविधिगृहीताङ्कोल्लबीजसितसर्षपोद्भवं तैलम् ।
नावनयुक्त्या जनं करोति परमायुःसंपूर्णम् ॥

इरिकिल्लबीजेभ्यस्तथा गौरसर्षपेभ्यः समांशेभ्यः पीडनकर्मणा संजातं तैलं नस्येनोपयुक्तमभ्यासात् पुरुषं परमेणायुषा त्रिंशत्यधिकवर्षशतपरिमाणेन संपूर्णं सम्पादयतीति । परमायुःप्रमाणं च—

"समाः षष्टिर्द्विघ्ना मनुजकरिणां पञ्च च निशाः ।
हयानां द्वात्रिंशत् खरकरभयोः पञ्चविकृतिः ॥
[2]विरूपा सैवायुर्वृषमहिषयोर्द्वादश शुनः ।
[3]स्मृतं छागादीनां दशकसहिता षट् च परमम् ॥" इति ॥३९१॥

जो लिहइ रअणिविरमे[4] घअमहुणा कुट्ठचुण्णमणुदिअहं ॥
सो सुरहिकठिणदेहो जिअइ णरो दीहरं कालं ॥३८६॥

यो लेढि रजनीविरामे[5] घृतमधुना कुष्ठचूर्णमनुदिवसम् ।
स सुरभिकठिनदेहो जीवति नरो दीर्घकालम् ॥

वाप्यचूर्णं घृतसमांशेन क्षौद्रेण सह प्रत्यहं प्रभात एव योऽवलेहेनोपयुङ्क्ते स सुभगामोदस्थैर्ययुक्तशरीरः सन् पुरुषायुषमात्रजीवी भवतीति ॥३९०॥

सिसिरे तुरङ्गगन्धाकन्दरओ पललघअमहुम्मीसो ॥
खज्जन्तो तारुण्णं थेराण वि करेइ मासेण ॥३९१॥

शिशिरे तुरङ्गगन्धाकन्दरजः पललघृतमधून्मिश्रम् ।
खाद्यमानं तारुण्यं स्थविराणामपि करोति मासेन ॥

---

१ आमलअचुण्णं–ख. । २ विरूपा–ख. । ३ स्मृतश्छागादीनां–ख. । ४ विरमे ? । ५ विगमे ? ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अश्वगन्धामूलानां चूर्णं तिलचूर्णेन समांशेन सहितं घृतमाक्षिकाभ्यामालोडितमवलेहेन शिशिरर्तुकाले मासं भुज्यमानं वृद्धानामपि यौवनं जनयतीति ॥३६१॥

रसलोहसिलाजउलोहदइअचक्कंकगअणविसचुण्णं ॥
खज्जन्तं घअमहुणा वाहिजरामरणविद्दवणं ॥३६२॥

रसलोहशिलाजतुलोहदयितचक्राङ्कगगनविषचूर्णम् ।
खाद्यमानं घृतमधुना व्याधिजरामरणविद्रावणम् ॥

रसः पारदः, लोहं शस्त्रचूर्णं, शिलाजतु शिलानिस्यन्दः, लोहदयितो [1]भ्रामकोऽयस्कान्तः, चक्राङ्कं [2]पट्टमाक्षिकं, गगनमभ्रकं, विषं स्थावरं मुस्तकादि, एषां विषरहितानां समांशानां चूर्णं, विषचूर्णस्य तु प्रत्येकं रसादीनां यदि पलं तत्तस्य तिलमात्रमिति मात्रया । घृतसहितेन माक्षिकेनालोडितं प्रत्यहं भुज्यमानमेतच्चूर्णं सर्वरोगाणां पलितस्य मृत्योश्च निवारणमिति ॥३६२॥

ववगअतुसघअसोप्पडिअमासअलिआइ पाअसं सिद्धं ॥
घअसक्करासणाहं जिमित्त महिलासअं रमेइ ॥३६३॥

व्यपगततुषघृतचुप्पटितमाषदलिकया पायसं सिद्धम् ।
घृतशर्करासनाथं जमित्वा महिलाशतं रमयति ॥

निस्तुषीकृतानां तथा घृतेनाभ्यक्तानां माषानां सम्बन्धिनी या दलिका द्विदलंचूर्णं तया स्विन्नां क्षीरिणीं घृतेन सितशर्करया च सहितां भुक्त्वा शतं स्त्रीणां पुरुषः कामयत इति ॥३६३॥

वितुसजवमासमोरअतेल्लरण्डअकच्छुवीअदुद्धाणि ॥
पिइऊण णरो रमणीसअं पि रमेइ रअणीए ॥३६४॥

वितुषयवमाषमयूरकतैलरण्टकच्छूबीजदुग्धानि ।
पीत्वा नरो रमणीशतमपि रमयति रजन्याम् ॥

निस्तुषीकृता यवास्तथा माषास्तथाऽपामार्गस्य [3]तण्डुलास्तथा कोकिलाक्षस्य तथा कपिकच्छ्वा बीजानि । एतानि समांशानि पिष्टानि क्षीरेण सह पीत्वा पुमानेकस्यामपि रात्रौ शतं कामिनीनां कामयत इति ॥३६४॥

सममासकलमतण्डुलजवगोहुमपिप्पलीण चुण्णेण ॥
घअपक्कं पूवलिअं खइऊण, ससक्करं दुद्धं ॥ ॥

---

१ द्राम (ब) को-ख. । २ वट्टमाक्षिकं-ख. । वद्द (वट्ट) माक्षिकमिति प्राचीनतरपुस्तकान्तरे । अत्र स्वर्णमाक्षिकस्य प्रयोगो ग्रन्थान्तरे दृष्टः । विड्माक्षिकमित्यपि क्वचित् । ३ तैलं-ख. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

जो पिअइ सो सकन्दप्पतरुणिजणदप्पपसमणसमत्थो ॥
कलविंकोव्व विजंभइ तोसविअविलासिणीसत्थो ॥३९५-३९६॥

सममाषकलमतण्डुलयवगोधूमपिप्पलीनां चूर्णेन ।
घृतपक्वां पूपलिकां खादित्वा, सशर्करं दुग्धम् ॥
यः पिबति स सकन्दर्पतरुणीजनदर्पप्रशमनसमर्थः ।
कलविङ्क इव विजृम्भते तोषितविलासिनीसार्थः ॥

समा माषा येषां तादृशा ये कलमस्य शालेस्तण्डुलास्तथा यवास्तथा गोधूमास्तथा मागधिका एषां समांशानां चूर्णेन कृतमपूपं घृतमध्ये पक्वं भुक्त्वा पश्चात् सितशर्करासहितं क्षीरं यः पिबति स मन्मथोद्दृप्तयुवतिवृन्दमदक्षपणशक्तः सन् चटकवत् विलसत्यत एवानन्दितसुन्दरीवृन्द इति ॥युगलकम्॥ ॥३९५-३९६॥

भणिअं णरणारीअणसरीरपरिअम्ममिह सुवित्थिणणं ॥
गोमहिसीपमुहाणं संपइ भणिमो समासेण ॥३९७॥

भणितं नरनारीजनशरीरपरिकर्मेह सुविस्तीर्णम् ।
गोमहिषीप्रमुखानां संप्रति भणामः समासेन ॥

उक्तार्थसंग्रहणार्था [1]वक्ष्यमाणोपक्षेपणार्था च स्पष्टा गाथा । [2]समासेन संक्षेपेणेति ॥३९७॥

[3]गण्हइ दुहाअणव्विअ तम्मा गब्भं सुपुट्ठसव्वंगं ॥
चव्विअलक्खणाजडिआसगब्भमुहफूइअवरंगा ॥३९८॥

गृह्णाति द्विहायनैव ताम्रा गर्भं सुपुष्टसर्वाङ्गम् ।
चर्वितलक्ष्मणाजटिकासगर्भमुखफूत्कृतवराङ्गा ॥

द्विहायना वर्षद्वयवयस्कैव गौर्गर्भमाधत्ते । कीदृशं- सुसम्पूर्णसकलावयवम् । कीदृशी गौः- चर्वितेन दन्तदलितेन लक्ष्मणायाः [4]पुत्रजनन्या मूलेन सगर्भं यद् [5]गोपस्यास्यं तेन दत्तफूत्कारं योनिदलं यस्याः सा तथा । या गौर्गर्भं न गृह्णाति सानेन योगेनाकालेऽपि गर्भवती भवतीत्यतिशयोक्तिरिति ॥३९८॥

तम्माइ संगवद्धं साम्मलिसंजाअसरसकुसखंडं ॥
तुरिअं पाडेइ जरं दिणणं गुंजाफलद्धं वा ३९९॥

१ वक्ष्यमाणोपक्षेपार्था-ख. । २ समासेनोपयुक्तेपेनेति-ख. । ३ गेण्हइ-ख. । ४ सुतजनन्या-ख. ।
५ गोपस्यास्यं-ख. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ताम्रायाः शृङ्गबद्धं शाल्मलिसंजातसरसकुशखण्डम् ।
त्वरितं पातयति जरायुं दत्तं गुञ्जाफलार्धं वा ॥

शाल्मलिवृक्षसमुत्पन्नानां कुशानां दर्भाणां प्रत्यग्रो भागो गोविषाणग्रथितो [1]गर्भशल्यमन्तःस्थं वहिर्निःसारयति । अथवा रक्तिकायाः फलं द्विधा कृत्वाऽर्धं गोरास्ये क्षिप्तमर्धं योन्यामुक्तकार्यं करोतीति ॥३९९॥

अच्छउ णिओ अण्णो वि हु गोरम्हातक्कजीरअमहुहि ॥
कअलेवो वच्छरुओ होइ पिओ सअलसुरहीण ॥४००॥

आस्तां निजोऽन्योपि खलु गोरम्भातक्रजीरकमधुभिः ।
कृतलेपो वत्सको भवति प्रियः सकलसुरभीणाम् ॥

गोरम्भा निष्पर्याया । तया तथा गोरसेन तथा जीरकेण तथा माक्षिकैरेतैर्लिप्तशरीरस्तर्णको द्वेष्यवत्सानां सर्वधेनूनां परकीयोऽपि पुरःस्थापितो वल्लभो भवति । आत्मीये तु का भ्रान्तिरिति ॥४००॥

पाहाणंपि विलित्तं इमिणा जोएण विणिहिअं पुरओ ॥
चट्टन्ती मअवच्छा वि रोहिणी झत्ति पह्नअइ ॥४०१॥

पाषाणमपि विलिप्तममुना योगेन विनिहितं पुरतः ।
लिहन्ती मृतवत्साऽपि रोहिणी झगिति प्रस्नौति ॥

अनेन पूर्वोक्तेन योगेनाभ्यक्तमश्मान[2]मप्यग्रतः स्थापितं [3]जिह्वयावलिहन्ती [4]मृतवत्सापि गौः सहसैव क्षीरं प्रस्रवति । पूर्वगाथोक्तप्रयोगातिशयप्रतिपादनपरमेतदिति ॥४०१॥

उम्मुहलित्तम्मि किमी वणाहि दसणा अहोमुहविलित्ते ॥
सुरहीइ संगजुअले पडन्ति किल बह्मदंडीइ ॥४०२॥

उन्मुखलिप्ते कृमयो व्रणाद् दशनादधोमुखविलिप्ते ।
सुरभेः शृङ्गयुगले पतन्ति किल ब्रह्मदण्ड्या ॥

द्विजयष्ट्या जलपिष्ट्या लिप्तेन हस्तेन गोशृङ्गे उन्मुखलिप्ते ऊर्ध्वगामिना [5]करेणाभ्यक्ते व्रणात् [6]कायगतात् [7]क्षताज्जन्तवो विश्लेष्यन्ति । तथाऽधोगामिना करेण शृङ्गे लिप्ते सति दन्ताज् जन्तवः पतन्तीति ॥४०२॥

---

१ गर्भशय्यामन्तःस्थां-ख. । २ मप्यग्रस्थापितं-ख. । ३ जिह्वयावलिहन्-ख. । ४ मृतवत्सोपि-ख. । ५ करेणाभ्यक्तेन-ख. । ६ कायगता-ख. । ७ दन्ताज्-ख. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

[1]सुरहीइ सेरिहीइ व मंडलहड्डेण कंठवद्धेण ॥
सुइरुब्भवं पि सहसा वणाहि किमिजालअं पडइ ॥४०३॥

सुरभ्या महिष्या [2]वा मण्डलास्थिकेन [3]कण्ठबद्धेन ।
सुचिरोद्भवमपि सहसा व्रणात् क्रिमिजालकं पतति ॥

मण्डलास्थ्ना तदीयेन कीकसेन गोर्महिष्या वा [4]गलग्रथितेन व्रणाज् जन्तुवृन्दं पतति, कालान्तरजातमपीति ॥४०३॥

करजुअलमलिअवारुणिफलभरिअवणाहि पडइ णीसेसं ॥
किमिजालं दुपअचउप्पआण पणप्पइ वणो वि ॥४०४॥

करयुगलमलितवारुणीफलभरितव्रणात् पतति निःशेषम् ।
क्रिमिजालं द्विपदचतुष्पदानां रोहति व्रणोऽपि ॥

हस्तद्वयनिर्मथितेन्द्रवारुणीफलरसेन पूरितात् [5]क्षतात् समग्रं जन्तुवृन्दं च्यवते । द्विपदानां मनुष्यपक्ष्यादीनां तथा चतुष्पदानां गवाश्वादीनां च । व्रणश्च तेषां रोहतीति ॥४०४॥

उण्होदअपक्खालणमन्तसिद्धत्थअतेल्लचुव्वडणं ॥
रालादललेवो वा मुहरोअं हरइ तम्माण ॥४०५॥

उष्णोदकप्रक्षालनमन्तः सिद्धार्थकतैलनिर्मलनम् ।
रालादललेपो वा मुखरोगं हरति ताम्राणाम् ॥

धेनूनामास्यव्याधिमन्तरुष्णजलनिर्मार्जनं गौरसर्षपतैलाभ्यङ्गश्चाथवा सर्जरसगन्धपत्राभ्यां जलेन पिष्टाभ्यां लेपनं हरतीति ॥४०५॥

[6]अम्मक्खणअं गोसेरिहीण णासेइ लेवमत्तेण ॥
चंडालचिआभूइइ फुल्लं वा घोणसक्खारं ॥४०६॥

नवनीतापहारं गोमहिषीणां नाशयति लेपमात्रेण ।
चाण्डालचिताभूतेः [7]पुष्पं वा [8]गोनासक्षारम् ॥

गवां महिषीणां च दुष्टभूतहिंसा(?)दिना यो नवनीतविनाश उत्पद्यते तं मातङ्गशरीरदाहस्थान[9]भस्ममध्यगतं शुक्लपुष्पाकारं भस्मैव दोहभाण्डबहिर्लेपमात्रेण शमयति । अथवा गोनासशरीरदाहजं भस्म तथाकृतं तच्छमयति । म्रक्षणं नवनीतनाम, तदभावोऽम्रक्षणमिति [10]केचिद् व्याचक्षत इति । ॥४०६॥

---

१ सुरहीए–ख. । २ श्च–प्रा. पु. । ३ गले ग्रथितेन–ख. । ४ गलाद्ग्रथितेनेति प्राचीनतरपुस्तकान्तरे । ५ क्षणात्–ख. । ६ अस्मत्खणअं–त्र. । ७ पुष्पमपि–ख. । ८ गोनाशक्षारम्–ख. । ९ भस्मगतं–ख. । १० क्वचिद्–ख. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ओसज्जइ तम्मासेरिहीण गअमुत्तसेअपाणेहि ॥
मरुअमुवसग्गदुक्खं हड्डेण व गोट्ठणिहिएण ॥४०७॥

[1]अपसज्जते [2]ताम्रामहिषीणां गजमूत्रसेकपानाभ्याम् ।
मरकमुपसर्गदुःखमस्थ्ना वा गोष्ठनिहितेन ॥

धेनूनां महिषीणां च मरकं समूहमरणमन्यच्च व्याध्याद्युपप्लवदुःखं गजानां सम्बन्धिनो मूत्रस्य पानेन तथाऽभ्युक्षणेन चापसर्पति। अथवा गजसम्बन्धिनैव कीकसेन गवादीनामास्पदस्थाने निखातेनापसर्पतीति ॥४०७॥

मोरअमुणाललाआपुरपेसिणरिन्दगोमअघएहि ॥
धूवो दज्झन्तो गोहणस्स गोट्ठे जरं हरइ ॥४०८॥

मयूरकमृणाललाजपुरपेसीनरेन्द्रगोमयघृतैः ।
धूपो दह्यमानो गोधनस्य [3]गोष्ठज्वरं हरति ॥

अपामार्गोशीरभृष्टधान्यगुग्गुलुमांसीतगरगोशकृत्सर्पिर्भिर्गवामास्पदे दह्यमानो धूपस्तासां ज्वरं निवर्तयतीति ॥४०८॥

भूमीकुरवअमूलं चक्कंकजडा व मत्थअणिवद्धा ॥
कुणइ णवणीअरक्खं रक्खइ थण्णं च चक्कंका ॥४०९॥

भूमीकुरवकमूलं चक्राङ्काजटा वा मस्तकनिबद्धा ।
करोति नवनीतरक्षां रक्षति स्तन्यं च चक्राङ्का ॥

गोमहिषीणां नवनीतस्य रक्षां हिंसानिवृत्तिं भूमीकुरवकस्य तिलकतरोर्मूलं शीर्षग्रथितं सत् सम्पादयति। अथवा सुदर्शनामूलमेवं करोति। सुदर्शना च शीर्षनिबद्धा क्षीरं रक्षति तस्य [4]दुष्टहिंसां निवारयतीति ॥४०९॥

पेच्छइ अन्धो वि हओ गुंजावीअंजिएहि अच्छीहि ॥
णवणीअपूरिएहि उण्होअअसेइएहिंव ॥४१०॥

प्रेक्षतेऽन्धोपि हयो गुञ्जावीजाञ्जिताभ्यामक्षिभ्याम् ।
नवनीतपूरिताभ्यामुष्णोदकसिक्ताभ्यां वा ॥

अचक्षुष्मानपि तुरगो रक्तिकासूक्ष्मचूर्णेन दत्ताञ्जनाभ्यां नेत्राभ्यां पश्यति। [5]अथवा पूर्वं नवनीतेन पूरिताभ्यां [6]पश्चादुष्णजलेन प्रसिक्ताभ्यां पश्यतीति ॥४१०॥

---

१ अपमुक्ते-ख. । अपध्वजते इति तु प्राचीनतरपुस्तकान्तरे । २ ताम्रमहिषीणामिति पुस्तकान्तरे । ३ गोष्ठे ज्वरं-ख. । ४ दुष्टहिंसा-ख. । ५ अथवा नवनीतेन-ख. । ६ पश्चादुष्णोदकेन-ख. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

क्खुरिणअसरपुंखापण्णलोणपिंडेण वेसरहआण ॥
णासन्ति वारिफोडा होइ बलं सुन्दरच्छाअं ॥४११॥

क्षुण्णशरपुङ्खापर्णलवणपिण्डेन वेसरहयानाम् ।
नश्यन्ति वारिस्फोटा भवति बलं सुन्दरच्छायम् ॥

बाणपुङ्खायाः पत्रैः सैन्धवलवणेन च कृतः कवलस्तेन दत्तेन वेसरतुरगाणां खरेण तुरगीतो जातानां तथा प्रकृतानामश्वानां वारिस्फोटा अन्तर्जलेन पूर्णाः शरीरविस्फोटकरूपा विकारा विनश्यन्ति । सामर्थ्यं (तथा) शोभना छवि र्भवतीति ॥४११॥

घरकुमरिपत्तपिंडो लोणसणाहो दसाहमत्तेण ॥
अवहरइ तुरंगमवेसराण सव्वंगिअं कंडुं ॥४१२॥

गृहकुमारीपत्रपिण्डो लवणसनाथो दशाहमात्रेण ।
अपहरति तुरङ्गमवेसराणां सर्वाङ्गिकीं कण्डूम् ॥

गृहकुमार्याः पत्रैश्चूर्णितैर्लवणसंयुक्तैः कृतः कवलो दशदिवसमात्रोपयोगादश्वानां वेसराणां चोक्तरूपाणां समस्तावयवजां कण्डूमपनयतीति ॥४१२॥

देसं पि णिअसिलिन्धं वडवा सेवइ तक्खणं वेअ ॥
सिन्धुब्भवकुट्ठसणाहकुसुमरसलेविअसरीरं ॥४१३॥

द्वेष्यमपि निजवत्सं वडवा सेवते तत्क्षणमेव ।
सिन्धूद्भवकुष्ठसनाथकुसुमरसलिप्तशरीरम् ॥

सैन्धवलवणवाप्यचूर्णेन युक्तं यन्माक्षिकं तेनाभ्यक्तदेहं स्ववत्सं द्वेष्यमप्यश्वा प्रीत्या भजत इति ॥४१३॥

पारावएसु कअसो धवलारुणसद्दलाइ जाअन्ति ॥
करडमसिणमसुरसअलमुग्गसुपुट्ठे सवत्ताणि ॥४१४॥

पारावतेषु क्रमशो धवलारुणशाद्वलानि जायन्ते ।
[1]करटामसृणमसूरसदलमुद्गसुपुष्टे[2]ष्वपत्यानि ॥

कलरवेषु करटिकाद्याहारपोषितशरीरेषु यथाक्रमं धवलादीन्यपत्यान्युत्पद्यन्ते । तेन करटिकया कुसुम्भबीजेन ये सुपुष्टा भवन्ति तेषां श्वेतवर्णाः पारावतका जायन्ते । ये सुविदलितेन मसूरेण तेषां लोहितवर्णाः, ये सदलैर्मुद्गैस्तेषां [3]पीवरा इति क्रमार्थ इति ॥४१४॥

---

१ करणमसूरशाद्वलमुद्गेत्यादिप्राचीनतरपुस्तके पाठः । २ सपुष्टेषु-ख. । ३ हरिता इति ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

इअ विविहजोअ[1]दंसणपरिउट्ठविअद्धवेज्जजणिअगोरओ ॥
[2]हरमेहलाइ विरमइ एत्थ चउत्थो परिच्छेओ ॥४१५

इति विविधयोगद[3]र्शनपरितुष्टविदग्धवैद्यजनितगौरवः ।
हरमेखलाया विरमतीह चतुर्थः परिच्छेदः ॥

इति यथोक्तक्रमेण प्रतिपादितो हरमेखलायाश्चतुर्थः परिच्छेदः समाप्तिं भजते कीदृशः—नानाकाराणां प्रयोगाणां निरूपणेन सानन्दैर्व्युत्पन्नैर्भिषग्भिः प्रशंसया प्रकटितमाहात्म्य इति ॥४१५॥

इअ हरमेहलाए चउत्थो परिच्छेओ

इति हरमेखलायाश्चतुर्थः परिच्छेदः

—शुभम्—

१ सन्दसण–प्रा० पु० । २ हरमेहलाए–प्रा० पु० । ३ सन्दर्शन–प्रा० पु० ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

श्रीः

शुद्धिपत्रम्

पृष्ठाङ्कः	पंक्तिः	अशुद्धम्	शुद्धम्
६	२५	लित्ताइं	लित्ताइं व
७	७	४तमिअ	४तमिअं
,,	६	५शमिताग्नि	४शमिताग्नि
८	२०,२२	नस्यति	नश्यति
९	२०	सर्वाङ्गा	सर्वाङ्गाः
१०	२७	लावर्व	लाघवं
१२	५	तृणेमनाग्	तृणे मनाग्
,,	१८	पत्तहपरलणधारा	पत्तलपहरणधारा
,,	२२	मूक्ष्मांशुक	सूक्ष्मांशुक
१३	१०	सर्षषान्	सर्षपान्
,,	१६	तण्डुल	तण्डुला
,,	२०	तक्ष्णातप	तीक्ष्णातप
१४	७	चयते	पच्यते
,,	१६	अष्टाक्द्केष्ठक	अष्टापद्कोष्ठक
,,	२४	युगलवम्	युगलकम्
,,	२६	व्हुआग	बहुआण
१५	२०	च्चीतरु	च्चीरतरु
१६	१३	भङ्गत्	भङ्गात्
,,	२४	तिहला खिम्ब	तिहलाणिम्ब
१८	७	च्छायम	च्छायम्
१९	१	प्रमथ	प्रथम
२३	५	लिख्यमानां	लिख्यमानं
२४	१९	गर्भेऽर्यन्तस्या	गर्भेऽन्तर्यस्या
,,	२५	वंसान्	वंशान्

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पृष्ठाङ्कः	पंक्तिः	अशुद्धम्	शुद्धम्
२४	२८	दशयति	दर्शयति
२७	१५	सव	सर्व
२८	८	खीरद्र्म	खीरद्रुम
”	२६	निच्प्रितज्जल	निक्षिप्तस्तज्जलं
३१	४	संकमग्य	संक्रमय्य
३३	६	भस्मीकृतपङ्कं	भस्मकृतपङ्कं
३५	१५	तात्पयम्	तात्पर्यम्:
”	२१	वह्निअ	वट्टिअ
३८	७	पुष्पामृन्त	पुष्पान्तम्
३६	६	ज्वलँश्च	। ज्वलँश्च
”	१४	पुरुषाकृति	पुरुषाकृतिं
४३	१२	व्यपगतजीमोपि	व्यपगतजीवोपि
४५	४	विडलं	त्रिदलं
”	२८	—	५ध्रियत इति पाठान्तरम् ।
४७	१६	प्रकारेणै	प्रकारेणै
४६	२२	फलाइ	फलानि
५३	२१	सत्त । हमत्ताण	सत्ताहमत्तेण
५५	२६	कर्पूः	कर्पूरः
५६	१६	वचस्करय	वर्चस्करय
”	२०	महादःखसज्जननः	महादुःखसञ्जननः
”	२१	गोमूत्रण ापष्टं	गोमूत्रेण पिष्टं
६३	१४	संज्ञावर्णा	(ययोः)संज्ञावर्गा
६४	२१	जोवहर	जीवहर
६८	७	शाधनप्रकारः	साधनप्रकारः
७६	५	तिलमेकतं	तिलकमेतं
८०	२४	मिश्रितो	मिश्रितः
८२	१६	देसर्षपः	सर्षपः
८३	४	तावम्	तावत्
८४	२३	गोरम्भा सुमसृण	गोरम्भासुमसृण

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पृष्ठाङ्कः	पंक्तिः	अशुद्धम्	शुद्धम्
८६	३	कतकफ	कतकफल
८७	२५	वशी भवन्तीति	वशीभवन्तीति
९३	५	परिकर्म जनित	परिकर्मजनित
९४	६	नालिप्त	नालिप्तं
”	१७	[1]गुण्ठित	[2]गुण्ठित
९७	२६	[2]नश्यति-ख. ।	[2]नश्यन्ति-ख. ।
९८	१७	शस्त्रचूण	शस्त्रचूर्ण
९९	२३	तया	तथा
”	२६	तैलस्थ	तैलस्य
१००	२६	स्वरससध्य	स्वरससाध्य
१०१	२६	सदभ्यङ्ग	सदभ्यङ्गा
१०४	१२	मुद्धर्तितं	मुद्वर्तितं
”	२४	दृढोन्मलित	दृढोन्मलितं
१११	६	त्तणेण	त्तणेन
११५	२८	[4]वारुणीत्वगवा-ख.	[4]वारुणीत्वग्वा-ख.
११६	१३	तेल्लभत्ता	तेल्लतुप्पिआ
१२१	६	मणंहरे	मणहरे
”	१४	चक्ल	वक्कल
१२४	१३	करज्ज	करञ्ज
१२५	२७	वितुषगुंजाफलेत्यादि	वितुषगुञ्जाफलेत्यादिना
१२६	२०	एका:	एक:
”	२६	वक्कलरसेन	वल्कलरसेन
१३०	२४	सविशेषाक्तौ	सविशेषोक्तौ
१३१	२७	र्जलवति तै:	र्जलवर्तितै:
”	”	वत्तिर्वदरक ष्ठाग्नि	वर्तिर्वदरकाष्ठाग्नि
१३२	४	त्रिफलाया	त्रिफलयो
१३४	२६	न्यग्रोधत्तक्ष	न्यग्रोधवृत्त

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पृष्ठाङ्कः	पंक्तिः	अशुद्धम्	शुद्धम्
१३६	२०	चूर्णं	चूर्ण
”	२६	गोधाप्चाः	गोधापद्माः
१३७	५	भूतीर्वा	भूतिर्वा
१३८	१५	बहुशो	बहुसो
”	२३	कअलेजो	कअलेओ
१४१	५	नङकुरान्	नङ्कुरान्
”	११	नाम् का	नामिकाः
”	१८	नाशयती त	नाशयतीति
१४२	२३	शतशीतलो	श्रृतशीतलो
१४३	११	तृष्णानिवर्तते	तृष्णा निवर्तते
१४४	४	म्मासअ	धम्मासअ
”	६	पर्पटःकयो	पर्पटकयोः
”	२०	काथक्रमेण	क्वाथक्रमेण
१४७	१२	विश्रितं	विमिश्रितं
१४६	२४	व्याधि	व्याधिं
१५०	१६	कृतोभ्यन्ते	कृतोभ्यङ्गो
१५१	२२	सेइआ	सेइओ
१५३	२७	व्रणमा रो	व्रणमारो
१५५	१७	चरोद्धवां	चिरोद्भवां
”	१६	व्रणगतिं	नाडीं व्रणगतिं
१५६	२५	मुखंप्रवृत्तं	मुखप्रवृत्तं
१५७	३	अम्विलल	अम्विलअ
”	२१	पिष्ठ	पिष्ट
१५८	२०	दारुहलदिं	दारुहलद्दी
१६०	१३	बिषाणां	विषाणां
”	२३	मइ गरुअ	मइगरुअ
१६३	२८	(पक)	(पंक)
१६५	७	नाव्रनी	मावनी

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पृष्ठाङ्कः	पंक्तिः	अशुद्धम्	शुद्धम्
१६५	१५	ईषद्धृष्ट	ईषद्घृष्ट
१७१	६	दुद्धावची	दुद्धा वत्ती
१७३	२५	का ो	काको
१७४	३	धिरिआ धिरि	धरिआ गिरि
१७५	८	विनिहितत्	विनिहितम्
१७६	१८	दरचूणी	दरचूर्णी
”	२०	सिफा	शिफा
१७७	११	पुनर्नवा मयूरकयो	पुनर्नवामयूरकयो
१७६	१०	गभिण्यास्त्वगभदेजा	गर्भिण्यास्त्वग्भेदजा
१८१	१५	वलअ	कुवलअ
”	२७	रामसमूहो	रोमसमूहो
१८३	१८	सर्वभ्यो	सर्वेभ्यो
”	”	दोषेभ्या	दोषेभ्यो
१८५	१०	ये भवन्ति । तेषु	ये भवन्ति तेषु
”	१३	विलंङ्क	विलङ्क
१८६	५	जवेम्मलिओ	जवोम्मलिओ
”	६	लरुइ	लहइ
१८७	२६	३८१-३८२	३८२-३८३
१८६	१६	विरूपा	द्विरूपा
”	१७	३६१	३८६
”	१६	३८६	३६०
१६०	”	पिइऊण	पाऊण
”	२६	खइऊण	खाऊण
१६१	१६	संन्ेपेणैति	संन्ेपेणेति

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

CC-0. Nepal Sanskrit Academy, Kathmandu